We have been able to complete this work with the help and encouragement of many kind souls. When the manuscripts of NR and ĀNTV were found by me at the house of my maternal uncle, I showed them to my teachers Late Professor Gopinath Bhattacharya and Late Pandit Pañchanana Shastri, who advised me to edit this work under the guidance of some eminent Naiyāyikas. I began the task of deciphering the manuscripts under the supervision of my teacher Late Pandit Madhusudana Nyayacharya, but for whose kind interest in my work, I could not have undertaken this job. An erudite scholar like him could easily detect readings in the text that needed to be checked from other manuscripts. When this work was in progress, Prof. Gopinath Bhattacharya lent me his personal copy of *Vaṅge Navya-Nyāya Carcā* by Prof. Dinesh Chandra Bhattacharya, who had provided enough information about the manuscripts of NR and ĀNTV in different libraries. Once the provisional transcript of these two texts was completed, I visited Varanasi and Poona for consulting the

manuscripts at Sarasvati Bhavana and Bhandarkar Oriental Research Institute. I could stay at these places and complete my work due to the kind cooperation of my good friends Dr. Chinmay Goswami and Prof. Moreswar Prabhakar Marathe, who were my hosts during my stay at Varanasi and Poona respectively. Thereafter, the manuscript at the Asiatic Society could be consulted due to the kind permission given by the then General Secretary, Asiatic Society.

Once all the manuscripts of NR and ĀNTV were consulted, the task of preparing a critical edition was begun by me in right earnest. There were often knotty textual problems that had to be solved, and here, I received some help from all my teachers of Nyāya— Late Pandit Madhusudana Nyayacharya, Pandit Visvabandhu Nyayacharya, Pandit Narayanachandra Nyayacharya and Pandit Shyamapada Nyaya-Tarka-Tirtha. I had also the good fortune of getting acquainted with Prof. Anantalal Thakur, the editor of many important texts including the *Caturgranthikā*, who very kindly invited me to visit him at Darbhanga. Once I reached Darbhanga, he virtually initiated me into the job of editing a text. He also kindly laid at my disposal the press copy of *Nyāyavārttikatātparyapariśuddhi* of Udayana, which had not been printed at that time, and also a transcript of the Varanasi mss. of NR and ĀNTV. He also introduced me to two veteran Naiyāyikas of Mithila— Pandit Kulananda Mishra, a disciple of Mahamahopadhyaya Balakrishna Mishra, and Pandit Ananda Jha, a disciple of Mahamahopadhyaya Phanibhusana Tarkavagisa. Inspite of their advanced age and failing health, these two scholars kindly helped me in settling the reading in some places. It is sad that when these manuscripts are being published, Pandit Madhusudana Nyayacharya, Pandit Kulananda Mishra and Pandit Ananda Jha are no more in this mortal world.

Once the press-copies of NR and ĀNTV were completed, the daunting task of getting it published stared me in the face. My teacher Late Prof. Bimal Krishna Matilal was kind enough to take up this matter with Late Dr. Chandan Roychaudhuri, the then General Secretary of the Asiatic So-

ciety, and Dr. Roychaudhuri showed much interest in publishing these works, provided they were recommended by referees. The press-copies were then submitted before the Publication Committee of the Asiatic Society, but due to some unforeseen and inexplicable circumstances, the printing of the work could not start. After a very long time, Prof. Ashin Dasgupta, who was working as Administrator of the Asiatic Society, promised to look into the matter after he was made aware of this situation by Dr. Nrisingha Prasad Bhaduri. Finally, the press-copy was sent to press, and the printing of it began. Then, due to my ill health and consequent indolence, the task of publication has been delayed considerably, often taxing the patience of the authorities and employees of the Asiatic Society. I thank all of them for bearing with my procrastination and frequent failures in keeping promises. I also thank the library staff at Sarasvati Bhavana ; Bhandarkar Oriental Research Institute ; Asiatic Society ; Sanskrit Sahitya Parishat, Calcutta and Government Sanskrit College, Calcutta — among whom the names of Pandit Madhusudana Vedantashastri, Shrimati Sushama Bhaduri, Shrimati Kumkum Guha and Shrimati Mitali Chatterjee deserve special mention. Words are not enough for expressing my gratitude to my teachers mentioned above, the two departed Maithila Naiyāyikas, and Prof. Anantalal Thakur, who also happens to be my spiritual mentor. It is indeed sad that Dr. Chandan Roychaudhuri and Prof. Ashin Dasgupta, who took interest in getting these texts published, are no longer in this mortal world. Nevertheless, it is my duty to express my gratitude to them. Dr. N.P. Bhaduri deserves my thanks for constantly prodding me for finishing the work at my end. Sm. Kuntala Bhattacharya, a former student of mine, helped me in preparing the indices of technical terms and proper names, and I thank her for this help. Last, but not the least, thanks are also due to my wife Rina and the other members of my family who saw to it that I get the necessary time and leisure for completing this work.

Due to inadvertence, some printing mistakes have crept in the published work, and many of them have been indi-

cated in the errata. For the mistakes that still remain, and for other lapses, if any, I crave the indulgence of the readers. Two such lapses may be noted here : (*i*) on page 1 in fn. 1, a variant reading that belongs to Manuscript E has been assigned to Manuscript B. (*ii*) *Nyāyavārttikatātparyapariśuddhi* of Udayana has sometimes been referred to as *Tātparyaṭīkāpariśuddhi.*

Kolkata
14.11.2003

Prabal Kumar Sen

CONTENTS

VOLUME I

NYĀYARAHASYA

VOLUME II

ĀNVĪKṢIKĪTATTVAVIVARAṆA

॥ श्रीः ॥

॥ न्यायसूत्रम् ॥

महर्षिगोतमप्रणीतम्

श्रीरामभद्रसार्वभौमविरचितन्यायरहस्यसहितम्

प्रथमाध्याये प्रथमाह्निकम्

[1]ब्रह्मोपेन्द्रप्रभृतिविबुधस्वान्तभृङ्गैः परीतं
जुष्टं सिद्धैः सनककपिलव्यासहंसैः समन्तात् ।
स्वर्गश्रेयो मधुरमधुभिः सर्वदोज्जृम्भमानं
नित्यं भास्वच्चरणकमलं भावयन्त्वम्बिकायाः ॥ १ ॥

आराध्यानादिमूर्त्तेरखिलसुरगुरोः [2]शङ्करस्याङ्घ्रिपद्मं
मग्नान् मोहान्धकारे तपन इव मुनिः प्राणिनः प्रोद्दिधीर्षुः ।
अक्षाङ्घ्रिः शास्त्रमेतत् परमकरुणया यद्व्यधात्तद्रहस्यं
श्रीभट्टाचार्यचूडामणितनय इदं रामभद्रस्तनोति ॥ २ ॥

भाष्यादीनां वचनरचना[3] केवलं शब्दचित्रं
प्रायो यत्र प्रकरणकथा प्राकृती भारतीव ।
सूते तत्त्वं न हि तदुभयं किन्तु मोहं प्रसूते
को जानीयाज्जगति मतिमानस्य शास्त्रस्य तत्त्वम् ॥ ३ ॥

अथ भगवताक्षपादेना[4]न्वीक्षिकीं[5] [6]समारिप्समानेन किमिति मङ्गलं न विहितम्[7], अफलत्वादित्येके[8], तन्न, विघ्नविशेषध्वंसजन्यसमाप्तेर्विघ्न-

---

1. श्रीगणेशाय नमः add. C, श्रीगणेशाय नमः । सांबसदाशिवाय नमः add. B. 2. ०संकर० C. 3. ०रना C. 4. भगवतानिष्कपादेना० C, भगवता कणादेना० E. 5. ०न्विक्षिकीं C, E. 6. समारी० A. 7. नाविहितम् B, C, E. 8. ०दित्येको C.

विशेषध्वंसस्य वा फलत्वेनान्यत्र व्यवस्थापितत्वात्। कृतमेव परन्तु नोपनिबद्धम्, न हि तन्निबन्धोऽप्यङ्गमिति सम्प्रदायविदः। न कृतमेव मङ्गलमात्मनो विघ्नरहितत्वनिश्चयादिति तु वयमिति दिक्। तत्र प्रेक्षावत्प्रवृत्तये अभिधेयोद्देशपूर्वकं स्वशास्त्रस्य प्रयोजनमाह[9]—

'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥

अत्र प्रमाणानि च प्रमेयश्च संशयाश्च प्रयोजनश्च[10] दृष्टान्तौ च सिद्धान्ताश्चा[11]वयवाश्च तर्काश्च[12] निर्णयश्च वादश्च जल्पश्च वितण्डा च[13] हेत्वाभासाश्च[14] छलानि च[15] जातयश्च निग्रहस्थानानि च तेषामिति द्वन्द्वसमासार्थककथन[16]वाक्यम्, निर्देशे यथावचनं विग्रह इति वदता भाष्यकारेण न्यवेदि। निर्देशः प्रत्यक्षादिसूत्रम्, वचनन्तु क्वचित् श्रूयमाणं क्वचिद्वार्थाक्षिप्तं[17] यथा संशये सिद्धान्ते[18] च [19] बहुवचनम्, यथा वा[20] दृष्टान्ते[21] द्विवचनम्। न चैवं प्रमेयेऽपि बहुवचनमेव युज्यते[22], संशयादेः परस्परनैरपेक्ष्येण[23] न्यायप्रवर्तकत्वात्[24], प्रमेयाणामतथात्वात्। एवञ्च निर्देशे वचनभेदप्रयोजन[25]मिहापि मन्तव्यमिति भाष्याभिप्रायः। अवयवानां सम्भूयैकार्थप्रतिपादकत्वेऽपि[26] अवयवान्तरार्थभेदसूचनाय बहुवचनमिति वदन्ति। वस्तुतो यथावचनन्तत्कथनेऽपि न क्षतिः, सर्वत्र तत्त्वान्वयित्वरूपप्राधान्यमात्रस्य ज्ञापनीयत्वात्, [27]तस्य च द्वन्द्वत एव[28] लाभसम्भवा-

9. MS B, which starts here, adds ओं नमो लम्बोदराय. 10. प्रयोजने च B. 11. ०न्ताश्च अव० B. 12. तुर्द्धाश्च C. 13. वितण्डाश्च B. 14. ०भासश्च B. 15. छलाश्च E. 16. ०सार्थकथन० A. E. 17. क्वचिदर्था० B, क्वचिच्चात्या० C, क्वचिद्वार्था० E. 18. सिद्धान्ते om. B. 19-20. om. B. 21. B adds बहुवचनम्. 22. वचनं प्रयुज्यते E. 23. ०स्मरनिरक्षेण B. 24. ०र्तकत्ववत् A, C, E. 25. वचनप्रयो० A, B, C. 26. ०त्वेनापि B, C, E. 27-28. om. B.

दिति[29] रहस्यम् । प्रमाणादीनां पौर्वापर्यकथने प्रमेयत्वेन लब्धस्यापि[30] संशयादेर्निग्रहस्थानत्वेन लब्धस्यापि जात्यादेः[31] पृथक् परिगणने च किं नियामकमिति चेदिच्छैव भगवतोऽक्षपादस्य,[32] सैव[33] कथमेतादृशीति चेत्, [34]तत्सामग्रीनियमात् । प्रयोजनन्तु [35]विशिष्य शिष्याणां ज्ञानमिति[36] । यत्तु—संशयत्वेन पृथगुपन्यासः संशयस्यानुमितिहेतुताबोधनार्थेति, तन्न, व्यभिचारान्मानाभावाच्च, संशयस्यानुमितावहेतुत्वात् । संशयपुरःसरमेव कथा प्रवर्तनीयेति सूचनार्थेत्यपि वदन्ति । तत्त्वं ज्ञायतेऽनेनेति तत्त्वज्ञानं शास्त्रं[37], अधिगमः प्राप्तिः, एवञ्च एतेषां तत्त्वज्ञापकाच्छास्त्रान्निःश्रेयस[38]प्राप्तिरित्यर्थः । प्रयोजकत्वे प्रयोज्यत्वे वा[39] पञ्चमी । प्रयोजकता[40] च तेषां तत्त्वज्ञानमर्जयित्वैवेति[41]तथोल्लेखः (?) । यत्तु—हेतुत्वे पञ्चमीति, तन्न,[42] शास्त्रप्रयोज्यषोडशपदार्थतत्त्वज्ञानस्यैव तावन्नापवर्गहेतुत्वम्, मानाभावात्, सुदूरत एव शास्त्रस्य, किन्तु शास्त्रे तावत्[43] पदार्थे निरूपिते विरोधि[44]मतनिराकरणपुरःसरमागमार्थाव[45]धारणम्, ततो देहाद्यन्य[46]त्वेनात्मनो मनना[47]दिक्रमेणापवर्ग इति प्रयोजकतैव शास्त्रस्य[48] । शास्त्रन्तु क्रमविशेषापन्ना[49] पञ्चाध्यायी[50], अध्यायस्तु तादृशाह्निकसमूहः, आह्निकन्तु तथाविधप्रकरणसमूहः, प्रकरणन्तु तथाविधसूत्रसमूहः, सूत्रन्तु

---

29. लाभादिति E. 30. तद्ध्वंसस्यापि C. 31. ज्ञात्यादेः A, इत्यादेः B. 32. ०पादस्यैव B. 33. सैव om. B. 34. तत्० om. B, E. 35-36. विशेष्य शिष्या० A, विशिष्टशिष्टज्ञान० B, विशिष्याणां जानमिति C, विशिष्य भाष्याणां ज्ञान० E. 37. अनेनेति तर्कशास्त्रं E. 38. ०ज्ञापकान्निःश्रेयस० C, E. 39. प्रयोज्यते वा om. C. 40. C adds ते. 41. इति om. B. 42. तदसत् C, E, which is equally correct. 43. भावात् C. 44. विरोध० B. 45. ०माम्नाव० C. 46. आदि om. B. 47. Ms E breaks off here. Folia 3 and 4 are missing. 48. शास्त्रस्य om. C. 49. ०विशेषायन्ना C. 50. पञ्चाध्यायो C.

तथाविधपदसमूह इति वदन्ति। केचित्तु—नन्विदं शास्त्रं कथं प्रेक्षावद्भिरुपादेयम्, प्रयोजनविरहात्, न च तत्त्वधीरेव प्रयोजनम्, तस्य सुखाद्यन्यत्वेनाप्रयोजनत्वादित्यतस्तत्त्वधियो[51] मोक्ष[52]प्रयोजकत्वेन[53]सप्रयोजनत्व[54]मित्यभिप्रायेणाद्यसूत्रम्। एवन्तु ज्ञानपदं धीपरमेव, न चैवं शास्त्रे प्रयोजन[55]सम्बन्धालाभः सूत्रेणेति वाच्यम्, शास्त्रे एतावत्तत्त्वधीप्रयोजकत्वस्य स्फुटप्रमाणलभ्य[56]त्वेन तत्र सूत्रानवकाशादित्याहुः। अथ निःश्रेयससम्बन्धो न पुरुषार्थः, किन्तु निःश्रेयसमेव, तथा चाधिगमपदं प्रकृतानुपयोगि, तस्य पुरुषार्थत्वेऽपि चाधिकमेतदिति [चेत्] सत्यम्, सम्बन्धवाचकपदसमभिव्याहारेण शास्त्रादेः[57] फलोपधायकत्वरूपप्रयोजकत्वलाभात्। परे तु—निःश्रेयसायाधिगमो निश्रेयसाधिगमः निःश्रेयसजनकीभूतात्मसाक्षात्कार इत्यर्थः, एवञ्चात्मसाक्षात्कार एव शास्त्रादिफलम्, स च निःश्रेयसजनकत्वादिष्ट[58]इति प्राहुः। आत्मेतरभिन्नतया मननरूपमेषां तत्त्वज्ञानं मोक्षबीजमिति जनकत्वमेव[59] पञ्चम्यर्थ इत्यपि कश्चित्[60]। निश्रेयसं पुनरात्यन्तिकी[61] दुःखनिवृत्तिः, आत्यन्तिकत्वन्तु [स्व]समाना[62]धिकरणदुःखासमानकालीनत्वम्, इदानीन्तनदुःखध्वंसस्तु भाविदुःखसमानकालीन एवेति नातिप्रसङ्गः। अत्र च[63] पदार्थलक्षणं प्रथमाध्यायार्थः, तत्र सपरिकरन्यायलक्षणं प्रथमाह्निकार्थः, तत्र प्रथमाह्निके सप्त[64] प्रकरणानि[65], तत्र प्रयोजनाभिधेयसम्बन्धप्रतिपादनैकार्थतया प्रथमद्वितीयसूत्राभ्यामेकं प्रकरणम्, प्रमाणप्रकरणम्, प्रमेयप्रकरणम्, न्यायपूर्वाङ्गप्रकरणम्,

---

51. ०तत्त्वविषया B. 52. मुख्य० C. 53. स० om. C. 54. ०जकत्व० B. 55. शास्त्रप्रयोजन० C. 56. स्फुटमालभ्य० B. 57. The import of आदि is not quite evident. 58. ०दिष्टि B. 59. जनकत्वेन B. 60. केचित् A, which is also correct. 61. ०रात्यन्तकी A, ०रत्यन्तिक C. 62. सामाना० C. 63. च om. B. 64. स C. 65. प्रकाराणि B.

न्यायाश्रयप्रकरणम्, न्यायस्वरूपप्रकरणम्, न्यायोत्तराङ्ग[66]प्रकरणमिति वदन्ति ॥ १ ॥

[67]नन्वात्यन्तिकदुःखनिवृत्तिरूपोऽपवर्गो न सम्भवत्येव, तथाहि—शरीरिणाऽवश्यं विहितनिषिद्धकर्मानुष्ठेयम्, तेन च भोगार्थं शरीरमुत्पादनीयम्[68], तत्रापि च तथाविध कर्म, तेनापि तादृशशरीरमुत्पादनीयमित्यनुच्छेद[69]एवास्य धर्माधर्मश[70]रीरप्रवाहस्येत्यत आह—

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः[71] ॥ २ ॥

उत्तरत्वं पाठक्रममादाय, तदुत्तरोत्तरमनन्तरं यस्य पूर्वपूर्वस्य तत्तदनन्तरं पूर्वपूर्वमित्यर्थः, तथा चोत्तरोत्तरापाये पूर्वपूर्वाभावादित्यर्थः[72]। मिथ्याज्ञानं तादात्म्येनात्मनि[73] देहप्रकारिका धीः[74] तादृशसविषयकमात्रं वा[75], दोषो रागो द्वेषश्च मिथ्याज्ञानसहितः, प्रवृत्तिर्धर्माधर्मौ, जन्म विशिष्टशरीरसम्बन्धः, एवञ्च[76]तत्त्वज्ञानेनात्मनि देहा[द्य] न्यत्वसाक्षात्कारात्मकेन मिथ्याज्ञानापाये तत्प्रतिबन्धे तत्सहितरागद्वेषाभावाद्धर्माधर्मयोरनुत्पत्तौ जन्माभावाद्दुःखासमानकालीनदुःखध्वंसरूपोऽपवर्ग इति भावः। उपात्तधर्माधर्मयोश्च भोगेन[77]क्षयान्न[78] तदधीनो दुःखप्रवाहानुच्छेद इति हृदयम्। तदनन्तराभावादिति प्रयोज्यत्वे पञ्चमी, प्रयोज्यत्वञ्च स्वरूपसम्बन्धविशेष इति ध्येयम्। यत्तु—मिथ्याज्ञानापाये रागद्वेषमात्राभाव इति, तन्न, तत्त्वज्ञानवतोऽपि प्रवृत्तिनिवृत्तिश्रुतेः रागद्वेषानुमानात्, रागद्वेषश्रुतेश्च। अथैवं तत्त्वज्ञानस्य न

---

66. न्यायोत्तरोत्तरप्र० B. 67. न स्वा० B. 68. उत्पाद्यम् B, which is also correct. 69. ०मिति अनु० B. 70. धर्म्याधर्म्य० C. 71. तदन्तरादपवर्गः B. 72. पूर्वपूर्वभावा० B. 73. तादात्मनात्मनि B, आत्मनि तादात्म्येन C. 74. प्रकारकाधीः B, प्रकारकधीः C. 75. तादृशं सवि० B. After वा, all MSS add तच्च धर्माधर्महेतुः, which seems to be redundant. 76. तद्विज्ञाने० in all the MSS. 77. भागेन B. 78. नन्वयार्थं C.

मोक्षहेतुत्वम्, चिरविनष्टत्वाद्[79]व्यापाराभावाच्च ; न च[80] मिथ्याज्ञान-निवृत्तिरेव व्यापारः, निवृत्तिर्हि न प्रागभावस्तस्याकार्यत्वात्, तत्त्व-ज्ञानिनस्तदभावाच्च, नापि ध्वंसः, तत्त्वज्ञानस्य[81] मिथ्याज्ञाननाशकत्वे मानाभावात् ; मिथ्याज्ञानान्तरोत्पन्नं तत्त्वज्ञानं नाशयत्येव[82] तत्,[83] स्वोत्तरोत्पन्नगुणस्य ज्ञानादिनाशकत्वादिति चेन्न, मिथ्याज्ञानस्य प्रति-बन्धकस्य[84] सत्त्वे तदनन्तरक्षणे तत्त्वज्ञानानुत्पत्तेः। अत्र केचित्[85]—श्रुत्या तत्त्वज्ञानस्य कारणत्वे बोधिते व्यापारान्तराभावाददृष्टमेव व्यापार इत्याहुः। श्रुत्या तत्त्वज्ञानस्त प्रयोजकत्वमेव बोध्यते, न[86] तज्जनकत्व-मित्यन्ये। 'दातव्य'मित्यादाविव 'आत्मा साक्षात्कर्तव्य' इत्या[87]दावपि विधेरिष्टसाधनार्थकत्वात् मुक्तेरव्यवहितपूर्वमेव तत्त्वज्ञानान्तरं[88] जायत इति तु[89] वस्तुगतिः। वस्तुत आत्मनि देहा[द्य]न्यत्वसाक्षात्कारो न जनकः किन्तु प्रयोजकः, जनकस्तु केवलात्मगोचरसाक्षात्कारः[90], "तमेव विदित्वे"[91]त्यादेरेकवाक्यत्वात्, स च मोक्षाव्यवहितपूर्वमेव जायत इति मन्तव्यम्। विस्तरस्तु मत्कृतसिद्धान्तरहस्येऽनुसन्धेयः। सन्निकर्षविशेषजतत्त्वज्ञानं[92] [93]प्रति मिथ्याज्ञानजन्यवासनात्मक-दोषस्य[94]मिथ्याज्ञानस्य[95] चाप्रतिबन्धकत्वात् [96]मिथ्याज्ञानोत्पत्तिकाले तदप्रामाण्यग्रहसत्त्वाद्वा[97] [98]मिथ्याज्ञानोत्तरजात[99]तत्त्वज्ञानेन मिथ्या-धीध्वंसो जन्यते, स एवास्य व्यापार इत्यपि केचित्। स्मृति-संस्कारनाशयो[100]र्विशिष्य[101] हेतुहेतुमद्भावविश्रामात् तत्त्वज्ञानं

79. चिररिववनष्टo B. 80. च om. B. 81. तद्विज्ञानस्य B. 82. नाशायात्म्य C. 83. तत् om. C. 84. oबन्धकत्वस्य C. 85. कश्चित् A, C. 86. न om. B. 87. oकर्तव्यमित्याo C. 88. ज्ञानानान्तरं C. 89. तु om B. 90. oगोचरः साक्षात्कारः A, C. 91. विदित्वा om A, C. 92. oज्ञाने C. 93-94. om. C. 95. च om C. 96-97. om. C. 98-99. om. A, B. 100. oसंस्कारयोo A, B. 101. oविशेष्य A, oविशिष्य om B.

मिथ्याधीजन्यसंस्कारमेव नाशयति, स एव व्यापार इत्यपि वदन्ति। भाष्यादिकृतस्तु[102]—[103]ननु तत्त्वज्ञानं न साक्षात्[104] मोक्षहेतुः, तत्त्वज्ञानवतोऽपि भोगश्रवणेनान्वयव्यभिचारादित्यत आह दुःखादिसूत्रं, तथा च कारणान्तरविलम्बकृतोऽन्वय[105] व्यभिचारो न दोषायेति भावः[106]। कारणान्तरं च[107] चरमदुःखमेवेति[108] ध्येयम्। केचित्तु—मिथ्याज्ञानादीनां परस्परहेतुहेतुमद्भावेऽप्रतिपादिते तदभावात्तदभाव इत्यस्य[109] प्रतिपादयितुमशक्यत्वात्तेषां कार्यकारणभावबोधनाय[110] योगविभागमिच्छन्ति ; तत्र मिथ्याज्ञानानामित्यन्त[111] एको योगः, समासेन कार्यकारणरूपेतरेतरसम्बन्धलाभात् कार्यकारणभावलाभः, मिथ्याज्ञानानामित्यनन्तरं कार्यकारणभाव इति वाऽध्याहरणीयम्;[112] उत्तरोत्तरेत्यादिरपरः, उत्तरोत्तरेत्यस्य[113] च तेषामित्यादिरिति। तन्न, तदभावात्तदभाव इत्युक्तेरर्थत एव कार्यकारणभावलाभेन तदर्थं सूत्रानवकाशात्, वाक्यभेदादिकल्पनाया अन्याय्यत्वाच्च। न [114]ह्यर्थलभ्यं सूत्रकारा दर्शयन्ति। यदाहु :—

> अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
> अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥[115]

सारवत् प्रयोजनवत्, विश्वतोमुखं बहुलार्थबोधकम्, अस्तोभमनधिकम् अर्थलभ्यबोधकम्, न पुनरधिकमेव, अनवद्यं सुबोधम्। अन्यत्रापि च—

---

102. भाष्यकृतस्तु B. 103. ननु om. B. 104. साक्षात् om. A, B. 105. ०कृतोन्वय० B. 106. भावात् C. 107. च om. A, B, D. 108. ०वेत्येव C. 109. B adds प्रति, which is superfluous. 110. MS E starts again from ०नाय. 111. ०त्यन्तत्र A, ०त्यत्र B, ०त्यत E. 112. ०त्तर इत्या० B. 113. उत्तरेत्यस्य B. 114. ह्यन्य० E. 115. विष्णुधर्मोत्तर ३।५।१.

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥[116]

लाघवं वाक्येषु पदकृतमिति[117], स्वल्पाक्षरेत्यनेनापौनरुक्त्य-मिति[118] ॥ २ ॥

॥ इति प्रथमप्रकरणम् ॥

तत्र प्रथमोद्दिष्टत्वात्[1] प्रमाणं लक्षयति विभजते च—

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥

अत्र च प्रशब्दोपसंहितेन [मा]धातुना तद्वति तत्प्रकारकत्वरूपप्रकर्ष-विशिष्टोऽनुभवः प्रत्याय्यते, ल्युटा च करणम्, तथा च[2] तादृशानुभव-करणत्वं प्रमाणत्वमिति[3] लक्षणं सूचितं भवति। प्रत्यक्षेत्यादि च विभागपरम्, [4]चत्वारीत्याक्षेपलभ्यम्। अत्र[5] प्रत्यक्षादिपदेन यथाकथञ्चिद्वृत्त्या[6] प्रत्यक्षानुमित्युपमितिशब्दप्रमाकरणानि बोध्यन्ते[7], प्रत्यक्षत्वादयश्च[8] साक्षात्करोमीत्याद्यनुव्यवसायसिद्धा[9] जातिविशेषा इति दिक्[10] ॥ ३ ॥

॥ इति न्यायरहस्ये त्रिसूत्रीरहस्यम् ॥

---

116. This verse is quoted also in तात्पर्यटीकापरिशुद्धि २।१।२. Its source is not known. 117. C adds उक्तं च शास्त्रकृता निग्रहस्थानविवेचनप्रस्तावे पुनरुक्तमित्यनुवृत्तौ अर्थादापन्नस्य स्वशब्देन पुनरभिधानमिति. 118. ०रुक्तमिति B.

1. मोपस्थितत्वात् B, C, D. 2. B adds तथा च. A case of dittography. 3. इति om. E. 4. च द्वावी क्षेप० B. 5. अतः C. 6. ०ञ्चिद्भूत्या C. 7. बोध्यते B, C, E. 8. त्वादिकञ्च C. 9. ०व्यनुभवसिद्धो C. 10. ०विशेष C.

तत्र क्रमप्राप्तं प्रत्यक्षप्रमाणं लक्षयति—

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्य[11]मव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥

अत्र च ज्ञानमित्यस्य यत इति शेषः, प्रत्यक्षमित्यस्य तदित्यादिः, तेन न प्रमाण[12]लक्षणाप्राप्तिः[13] । अत्र चेन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिज्ञानमिति लक्षणपरम्, इन्द्रियपदञ्चक्षुरादियत्किञ्चिद्बहिरिन्द्रियपरम्[14], तेनात्ममनःसंयोगजन्यानुमित्यादौ[15] नातिप्रसङ्गः । सन्निकर्षजन्यतायामिन्द्रियजन्यत्वाप्रवेशाच्च[16] न सन्निकर्षपदवैयर्थ्यम्[17], घटचक्षुः-[18]संयोगत्वाद्यवच्छिन्नजन्यताया निवेशनान्नार्थपदवैयर्थ्यमपि । इन्द्रियार्थपदे वा चक्षुर्घटादिसंयोगव्यक्तिपरिचायके इन्द्रिये चक्षुषि अर्थः समवायो यस्य स तथा[19], तथा च स्वविषये ज्ञानप्रत्यासत्तिरूपाऽनुमितिजनकपरामर्शा[20]दयो वारिता[21] भवन्तीत्यपि वदन्ति । इन्द्रियपदं[22] चक्षुराद्येकैकपरम्, उत्पन्नपदस्य प्रत्येकं सम्बन्धः, एवञ्च चक्षुर्जन्यं घटजन्यन्तत्संयोगजन्यमिति नानालक्षणपरमिदमित्यप्याहुः[23] । न च सर्व एव प्रकारः प्रत्यक्षान्तरेऽप्रसक्तः, तादृशजन्यज्ञानवृत्त्यनुभवत्वाव्यापकजातिमदिति तदर्थात् । अव्यभिचारि यथार्थम्, तेन तादृशजातिमत्प्रमाकरणत्वं[24] लक्षणमुक्तं भवति । निर्विकल्पके गुरूणां सविकल्पकप्रत्यक्षे[25] च बौद्धानां विप्रतिपत्तेस्ते न स्त[26]—

---

11. ०देस्य A. 12. प्रमा० E. 13. च add. A. 14. ०राद्येकैकयत्किञ्चित्परम् A, B. 15. तेनाशेनः संयोगजन्यात्मानु० B. C supports ०जन्यात्मानु० in B. 16. ०त्वा- वेशाच्च B. 17. ०वैयार्थ्यम् B. 18. ०गत्वाव० A, B, E. 19. तथा om. A, D. 20. ०मर्षा० A. 21. बाधिता A, वारिता om. B. 22. ०परं A. 23. ०परमिदमित्याहुः B, ०परमित्यप्याहुः E. 24. ०प्रमत्- करणत्वं E. 25. ०कप्रामाण्ये B, C, E: 26. ०पत्तिस्ते न स्त A, पत्तेस्तेन ज्ञाने न स्त B,

इति शिष्या न[27] प्रतियन्त्विति[28] तादृशज्ञानं विभजते—अव्यपदेश्यं व्यवसायात्मकमिति। व्यपदेश्यं विशिष्टज्ञानं तदन्यदव्यपदेश्यम्, ज्ञानमिति प्रकृतम्। व्यवसायो विशिष्टज्ञानम्, तदात्मकं व्यवसायात्मकम्। अत्र च[29] प्रमाणमभिधेयमिति भावः।[30] वस्तुतः प्रत्यक्षानुमानेत्यादिसूत्रेणाभिहिते[31] प्रत्यक्षप्रमाणलक्षणे विशेषणीभूता[32] प्रत्यक्षप्रमैव लक्षिताऽनेन सूत्रेणेति न यत[33] इत्यादेरध्याहार इति ध्येयम्। परे तु समस्तमेव लक्षणमाहुः, तेषामयमाशयः—इन्द्रियार्थसन्निकर्षोत्पन्नमित्यस्य कपालचक्षुःसंयोगवृत्तिज्ञानत्वाव्यापक[34]जातिमदर्थस्तेन स्मृतिनिरासः। कपालचक्षुःसंयोगजन्यघटचक्षुःसंयोगवृत्तिसंयोगत्वादिमत्यतिप्रसङ्गवारणाय ज्ञानमिति। शाब्दोपमित्योरतिप्रसङ्ग[35]वारणायाऽव्यपदेश्यमिति। व्यपदेशः शब्दस्तज्जन्यं व्यपदेश्यम्, शब्दधीजन्यत्वाव्यभिचारिजातिमदिति यावत्, तदन्यदित्यर्थः[36]। एवमप्यनुमितावतिप्रसङ्ग इत्यतो व्यवसायात्मकमिति। विगतोऽवसायो[37] व्याप्तेरवसायः कारणत्वेन यत्र स व्यवसायः, व्याप्तिधीजन्यमात्रवृत्तिर्या[38] जातिस्तच्छून्यमिति[39] यावत्। भ्रमवारणायाव्यभिचारीति। यदि च भ्रमप्रमासाधारणप्रत्यक्षमात्रस्यैवेदं लक्षणं तदाऽव्यपदेश्यमित्यस्या[40]शब्दमित्यर्थः। [41]अव्यभिचारीत्यस्य व्यभि[42]

---

27. शिष्याण A, शिष्यान् B, शिष्टा न E. 28. प्रतियन्दिति A, प्रतोयन्तीति D, E. 29. च om A, तत्र च C. 30. The sentence अत्र…भावः seems to be out of context. Some portion of the text may be missing. 31. ०त्यादिना अभि० B, ०त्यादिना सूत्रेऽभि० C. 32. विशेष्यभूता C. 33. न चात्र A, न नियत E. 34. ०ज्ञानत्वव्यापक० B. 35. ०पमितितिप्रसङ्गः० A, संयोगत्वादावतिप्रसङ्ग० B. 36. ०न्यमित्यर्थः A. 37. ०तोऽव्यवसायो A. 38. ०वृत्तिर्वा यो A, B. 39. ०स्तज्जन्यमिति A, 40. ०मित्यश्या० B. 41-42. अभिचारीत्यस्याव्यभि० A.

चारधीजन्यमात्रवृत्ति[43]जातिरहित इत्यर्थः। तेनानुमितिनिरासः, तत्राव्यभिचारधीहेतुत्वेन प्रतियोगिविधया[44] व्यभिचारधियोऽपि[45]हेतुत्वात्। उपमितिवारणाय व्यवसायेति। विगतोऽवसायः सादृश्यावसायः[46] कारणत्वेन यत्र तदात्मकं सादृश्यधीजन्य[47]मात्रवृत्तिजाति[48]रहित इत्यर्थः ॥ ४ ॥

क्रमप्राप्तमनुमानं लक्षयति विभजते च—

अथ तत्पूर्वकं त्रिविधमनुमानं[49] पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च ॥५॥

अथ प्रत्यक्षनिरूपणानन्तरम्। अनुमानं (? ०मानमिति।) निरूप्यत इति शेषः। तत्पदं प्रत्यक्षविशेषरूपतत्परामर्शव्यक्तिपरम्, तथा च समानाधिकरणतत्परामर्शाव्यव[50]हितपूर्वकं यज्ज्ञानं तत्समवेतानुभवत्वाव्यापक[51]धर्मवदित्यर्थः, तेनानुव्यवसायादिनिरासः। अव्यभिचारीत्यनुषञ्जनीयम्। यतस्तदित्यध्याहरणीयम्, तथा च प्रमात्मकं तादृशधर्मवद् यतस्तदनु[52]मानमित्यर्थः। प्रमारूपतादृशधर्मवत्करणत्वमनुमानत्वमिति[53] तु निष्कर्षः। पूर्वसूत्रोपात्तानुमाने विशेषणीभूताया अनुमितेरेवेदं लक्षणमिति मते तु नाध्याहारो न वा[54]ऽनुषङ्ग इति[55] ध्येयम्। तदनुमानं त्रिविधम्, पूर्ववदादि[56]भेदादित्यभिप्रेत्य विभजते— पूर्ववदिति। [57]पूर्वमन्वयस्तद्वत्तन्मात्रवत्, केवलान्वयीत्यर्थः। शेषो व्यतिरेकस्तद्वत्तन्मात्रवत्, केवलव्यतिरेकीत्यर्थः। सामान्यतोऽन्वयतो[58] व्यतिरेकतश्च दृष्टमन्वयव्यतिरेकीत्यर्थः।[59] तत्र लिङ्गकरण[60]तापक्षे[61]-

43. ०मात्रप्रवृत्ति० B. 44. प्रतियोगिविधया om. A, B, D. 45. ०धीयोपि A. 46. ०श्यावयसः A. 47. ०जन्य० om. A. 48. ०वृत्तिरजाति० E. 49. अनुमानं त्रिविधं A. 50. ०मर्षाव्यव० A. 51. ०भवत्वव्याप्य० A. 52. यत्रदनु० B. 53. ०मानमिति A. 54. वा om. B. 55. तु add. C, E. 56. पूर्ववत्त्वादि० B. 57-58. ०अन्नय for अन्वय in B. 59. सामान्यतोऽन्वयतो add. A. 60. लिङ्गप्रकरण० C.

ऽन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वम्, व्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वं केवलव्यतिरेकित्वम्, उभयसहचारगृहीतव्याप्तिकत्वमन्वयव्यतिरेकित्वम्; मतान्तरे तु व्यतिरेकसहचारग्रहाजन्यव्याप्तिज्ञानत्व[62]मन्वयसहचारग्रहाजन्यव्याप्तिज्ञानत्व[63]मुभयसहचारग्रहजन्यव्याप्तिज्ञानत्वं[64] केवलान्वयित्वादीति प्राञ्चः। नव्यास्तु—व्यतिरेकव्याप्तिग्रहाजन्यानुमितिकरणत्वमत्य[65]न्ताभावविशेषाप्रतियोगिसाध्यकतादृशानुमितिकरणत्वम्वा केवलान्वयित्वम्, आद्ये 'वह्निमान् धूमादि'[66]त्यादिरपि केवलान्वयी, द्वितीये 'इदं वाच्यं ज्ञेयत्वादित्यादिरेव[67] सः[68], अन्वयव्याप्तिग्रहाजन्यानुमितिकरणत्वं केवलव्यतिरेकित्वम्, उभयव्याप्तिग्रहजन्यानुमितिकरणत्वं केवलान्वयीतरान्वय[69]व्याप्तिग्रहजन्यानुमितिकरणत्वम्वाऽन्वयव्यतिरेकित्वमिति वदन्ति। परे तु—पूर्वं कारणं तद्वत्तल्लिङ्गकं यथा कपालसंयोगविशेषेण[70] कपालादौ घटादेरनुमानम्[71]; शेषः कार्यं तद्वत्तल्लिङ्गकं यथा धूमादिना वह्नेरनुमानम्;[72] सामान्यतो दृष्टं तदितरलिङ्गकं पृथिवीत्वादिना द्रव्यत्वादेरनुमानमिति वदन्ति। अन्ये तु—पूर्वं पूर्वोपस्थितं[73]पक्षीयसाध्यमात्र[74]वृत्तिधर्मेण पूर्वमुप[75]स्थितं तद्वत्तत्साध्यकानुमितिकरणं यथा द्रव्यत्वत्वादिना[76] द्रव्यत्वादिसाध्यकमनुमानम्; शेषः परिशेषस्तद्वत् परिशेषानुमानमित्यर्थः, व्यापकतानवच्छेदकप्रकारकानुमितिकरणमिति तु निष्कर्षः; यथा 'इच्छा द्रव्याश्रिता गुणत्वादि'त्यादौ द्रव्याश्रितत्वत्वेन[77] सामान्येन व्याप्तिग्रहे पृथिव्याद्यष्टद्रव्याश्रितत्वे बाधावतारे 'इच्छा पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्या-

---

61. ०तामते A. 62, 63, 64. B reads uniformly ०कत्व in place of ०नत्व. 65. ०त्वमित्य० A. 66. धूमात् om. B. 67. ०त्यादावेव C. 68. सः om. A. 69. ०यीभवान्वय० C. 70. ०षण B. 71. घटाद्यनु० E. 72. वगीरनु० C. 73. क्षीय० B. 74. ०साध्यमते C. 75. पूर्वंवनुप० A. 76. द्रव्यत्वादिना B, D. 77. द्रव्याश्रितत्वेन B, D.

श्रिते’त्यनुमानम्, एतस्य च[78] क्वचित्[79] पूर्ववदादिरूपत्वेऽपि न क्षतिः, शेषवत्त्वानपायात्, पूर्ववदादिलक्षणं वा शेषवदन्यत्वविशे[80]षितम्; यद्वा—शेषः शेषोपस्थितम्, अनुमितेः[81] पूर्वमनुपस्थितमिति यावत्, तद्वत्तत्[82]साध्यकं यथा ‘धूमाभावव्याप्य[83] वह्न्यभाववान् ह्रद’ इति व्यतिरेकिपरामर्शात् ‘ह्रदे धूमाभाव’ इत्यज्ञातधूमाभावानुमानम्; सामान्यतः पक्षीयसाध्यव्यक्तितदि[84]तरसाधारणधर्म[85]वत्तया दृष्टन्तत्-[86]साध्यकमित्यर्थः, यथा वह्नित्वादिप्रकारेण वह्न्यादेरनुमानमित्याहुः। अनुमितिलक्षण[87]परत्वे पुनरनुमितेरेव विभागः; तत्र च तादृशसाध्यकानुमितित्वादिकं पूर्ववत्त्वादि, अनुमानत्रैविध्यन्त्वनुमितित्रैविध्येनैव लब्धमिति तु ध्येयम्, व्याप्त्यादिकन्तु विवेचितमन्यत्रेति दिक्॥ ५॥

उपमानं लक्षयति—

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥६॥

प्रसिद्धं गवयादि[88]पदवाच्यत्वसमानाधिकरणतया ज्ञातं यत्साधर्म्यं [89]गवादिसादृश्यं ततो गवयादौ तज्ज्ञानाद् या[90] साध्यस्य[91] गवयवाच्यत्वादेः सिद्धिस्तत्करणम्, तत्सिद्धिसमवेतप्रत्यक्षासमवेतधर्मवत्करणमिति यावत्, तेन नानुव्यवसायादावतिप्रसङ्गः,[92] न वा वैधर्म्यकरणकोपमितावप्रसङ्गः,[93] अव्यभिचारीत्यनुषङ्गान्नाप्रमाणो[94]पमाना-

78. च om. B, E. 79. क्वचित् om. A, B. 80. ०न्यत्वं विशे० A. 81. अनुमानं E. 82. तदुक्त० A. 83. धूमव्यापक० A. 84. व्यक्ति च तदि० A. 85. ०तरवृत्तिधर्म० C. 86. दृष्टान्त० A. दृष्टतत्० B. 87. ०लक्षण० om. E. 88. प्रसिद्धगवयादि० A, B, D. 89. यत् add. C, E. 90. या om. B. 91. साध्यं B. 92. ०सायादौ नाति० E. 93. ०मितावतत् सङ्गः A. 94. ०षङ्गार्थाप्रमाणो० C.

तिप्रसङ्गः। साधनपदस्य सिद्धिमात्रपरतया[96] उपमितेरेवेदं लक्षणमित्यप्याहुः[97]। सादृश्यन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमित्यन्यत्र विस्तरः॥ ६॥

शब्दं लक्षयति—

आप्तोपदेशः शब्दः॥ ७॥

शब्द इति लक्ष्यनिर्देशः। शाब्दप्रमाकरणमिति तदर्थः। उपदेशः शाब्दज्ञानम्। आप्तो यथार्थ उपदेशो[98] यस्मात् स[99] शाब्दप्रमाकरणमित्यर्थः। न च लक्ष्यतावच्छेदकलक्षणयोरभेदः[100], प्रमात्वस्य एकत्र तद्वति तत्प्रकारकत्वस्य, अपरत्र तत्प्रकारकत्वे सति [101]तद्विशेष्यकत्वादेर्निवेशात्[102]। यद्वा—उपदेशः[103]शब्दधीजन्यत्वव्याप्यशब्दाविषयकजातिमान् बोधः, शब्दाविषयकेत्यनेनोपमिति निरास इति सर्वं रमणीयम्। आप्तश्च प्रकृतवाक्यार्थगोचरयथार्थज्ञानवान्[104], [M]भावप्रत्ययान्तेन[105] तादृशज्ञानं वा, तस्य[106] ततो वा उपदेशः शब्दः[107] तज्ज्ञानम्वा तादृशज्ञानवदादिजन्यवाक्यत्वं[108] तादृशज्ञानवदादिपूर्वकवाक्यत्वं वा[109] पर्यवसितार्थः। ईश्वरज्ञानमादाय[110] [111]शुकादिवाक्यपरिग्रह इत्यपि केचित्॥ ७॥

॥ इति न्यायरहस्ये [112]प्रमाणलक्षणप्रकरणम्॥[M]

---

96. साधनपदस्य सिद्धिमात्रपरतया om. A, B. 97. ०मित्याहुः A, B. 98. उपदेशौ A. 99. वा A. 100. ०लक्षणमेव भेदः C. 101-102. तत्तद्विशेष्यकत्वादेरितरस्य निवेशात् A, तत्तद्विशेष्यकत्वादेरेकतरस्य निवेशात् C. 103. ०जन्य तु व्याप्य० A, C. 104. इति न्यायरहस्ये प्रमाणलक्षणरहस्यम् add. B. M—M, om. B. 105. भावेनाश्रितया A. 106. ०ज्ञानमात्रस्य A. 107. ०देशबुद्धिः A. 108. ०जन्यप्रत्यक्षत्वं A, 109. ०वाक्य इति दिक् A. 110. ०दायापि C, E. 111. शुकादिवाक्य० om. A. 112. प्रमालक्षण० E.

क्रमप्राप्तं प्रमेयं लक्षयति विभजते च—

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥८॥

प्रमेयमिति प्रमाविषयत्वं सामान्यलक्षणमभिप्रेतम्। अथैवं [1]दिगादीनां संख्यादीनाञ्च प्रमेयत्वाद्विभागन्यूनत्वम्, तेषामलक्ष्यत्वे[2] च लक्षणमति[3]व्याप्तमिति चेन्न, लक्षणस्थ-प्रमापदेनात्मादिमात्रविषयकप्रमाया उक्तत्वात्[4]। यत्तु—मुक्तिजनकात्मसाक्षात्कारजनकधीविषयत्वं प्रकृते प्रमेयत्वम्, तादृशात्मसाक्षात्कारजनकञ्चात्मादिद्वादशमात्रविषयकं ज्ञानमिति, तन्न, तादृशज्ञानस्य तज्जनकत्वे मानाभावात्। यदपि च—दिगाद्यपि लक्ष्यमेव, विभागश्च [5]मुक्त्युपयोगिज्ञानविषय[6]प्रमेयाणामिति, तदपि न, तत[7] एव। तु शब्दो दिगादि सूचयतीति न विभागव्याघात इति वार्त्तिककृदाह; तन्न, तेषां विशेषलक्षणाकरणान्न्यूनता[8]पत्तेः। [9]अर्थपदं विषयमात्रपरम्, यथा च गन्धादि[10]सूत्रात् तल्लाभ[11]स्तथा वक्ष्यत इति तु वार्त्तिकानुयायी पन्थाः। आत्मेत्यादि च विभागपरम्। [12]अत्रात्मा च शरीरञ्च इन्द्रियाणि चार्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च[13] प्रेत्यभावश्च फलञ्च दुःखञ्चापवर्गश्चेति विग्रहप्रतिरूपकं वाक्यम्, अत्रापि निर्देशे यथावचनं विग्रह इति वदता वार्त्तिककृता [14]सुहृस्तितम्। अत्र च दुःखादीनां फलादिरूपत्वेऽपि न क्षतिरुपधेयसङ्करे[15]प्युपाधेरसङ्करात्। गोवृषन्यायेन विभाग इत्यपि कश्चित् ॥ ८ ॥

तत्र प्रथमोद्दिष्ट[16]मात्मानं लक्षयति—

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥ ९ ॥

---

1. दिगादिसंख्या० E. 2. लक्षत्वे A. 3. ०णमिति० B. 4. उत्तेजकत्वात् B. 5. युक्त्यु० C. 6. ०ज्ञानजनक० B, E. 7. तदपि लभत C. 8. ०करणात् पूनता० C. 9. अत्र० A, B, आत्म० C. 10. यथा चाद्यादि० C. 11. तत्त्वाभ० B. 12. अत्र om. E. 13. प्रवृत्तिश्च मादायश्च C. 14. स्वहृ० B, C. 15. ०संस्कार० A, D. 16. ०मोपदिष्ट० B.

लिङ्गमितरभेदानुमापकम्, तेनेच्छावत्त्वादि[17] लक्षणषट्कं पर्यवस्यति। सुखदुःखद्वेषास्तु संसारिणो लक्षणमितरदात्ममात्रस्येत्यवधेयम्। सूत्रमिदमात्मन्यनुमानप्रमाणपरमपि। न चात्मनि प्रत्यक्षमेव मानम[18]स्तीति किं तत्र प्रमाणान्तरोपन्यासेनेति वाच्यम्, नीरूप[19]त्वेनात्मनोऽप्रत्यक्षत्वात्, लाघवेन द्रव्यप्रत्यक्षमात्र[20] एव रूपवत्त्वस्य[21] तन्त्रत्वात्। न चा"हमि"ति प्रत्यक्षस्यानुभवसिद्धत्वादयुक्तमिदमिति[22] वाच्यम्; तत्रात्मत्वेन शरीरादेर्बुद्ध्यादेर्वा भानात्, आकाशाग्रहे शब्दग्रहवदाश्रयाग्रहे क्वचिज्जातिग्रहस्यापीष्टत्वात्। तदुक्तमिहैव भाष्यकृता—"तत्रात्मा तावत्[23] प्रत्यक्षतो न गृह्यत" [न्या. भा. १।१।१०] इति, उक्तञ्च प्रशस्तपादाचार्यैरपि—"त्रयाणां पृथिव्यादीनां प्रत्यक्षत्व[24]रूपवत्त्व[25]द्रवत्ववत्त्वानी"[26]ति [प्र. पा. भा. साधर्म्यप्रकरणम्]। अत एव च तैर्योगिप्रत्यक्ष एवात्मा गणितः। भवतु वा वार्त्तिककारादिसिद्धमात्मनः[27] प्रत्यक्षत्वम्, तथाप्यनुमानप्रमाणस्य सूत्रोपन्यस्तस्याविरोधितैव[28]। प्रयोगश्च—इच्छा द्रव्याश्रिता, गुणत्वाद् गुणाद्वे[29]त्यादिः। एतावल्लिङ्गकथनञ्चैतेषां लाघवतर्केणैकाश्रयसिद्ध्यर्थमिति दिक्॥ ९॥

क्रमप्राप्तं शरीरं लक्षयति—

चेष्टेन्द्रियार्थाश्रयः शरीरम्॥ १०॥

अत्र चेष्टाश्रयत्वमिन्द्रियाश्रयत्वमर्थाश्रयत्वमिति लक्षणत्रयम्। चेष्टात्वञ्च "चेष्टत"[30] इत्यनुभवसिद्धः शरीरतदवयवक्रियाविशेषसाधारणो जाति-

17. तेमे वत्त्वादि B. 18. प्राणम्० B. 19. नीलरूप० B. 20. द्रव्यमात्र E. 21. रूपपरत्वस्य C, रूपत्वस्य E. 22. ०युक्तमिति B. 23. भाव D. 24. प्रत्यक्ष० C. 25. रूपत्व B. 26. ०द्रव्यत्ववत्त्वानि B, ०द्रव्यत्वानि C, E. 27. च add. A. 28. ०विरोधात् C, E. 29. गुणत्वागुणाद्वेति B. The portion गुणाद्वा seems to be redundant. 30. चेष्टा E.

विशेषः । न च चेष्टाश्रयत्वं निष्क्रिये विनष्टे[31]ऽव्याप्तमतिव्याप्तञ्च शरीरावयव इति वाच्यम्, चेष्टावत्समवेतान्त्यावयवि[32]मात्रवृत्तिजातिमत्त्वस्य चेष्टाश्रयत्वशब्देनोक्तत्वात्, चेष्टावत्समवेतेत्यनेन[33]घटत्वादेरन्त्यपदेन[34] करत्वादे^{x}र्मात्र[35]पदेन द्रव्यत्वादेर्जातिपदेन नित्यार्थकेन[36] घटशरीरसंयोगादे^{x}र्निरासः । तादृशी च जातिर्मनुष्यत्वादिचैत्रत्वादिरूपा, वृक्षादावपि चेष्टाङ्गीकारान्न तत्रातिव्याप्तिः । यत्तु—मनुष्यपशुपक्षि[37]प्रभृति[38]शरीरेषु तावदनुभवसिद्धा पृथिवीत्वव्याप्या काचन[39] जातिरस्ति[40], सैव च वृक्षादिवृत्तिरिति न तत्राव्याप्तिरिति, तन्न, तादृशजातेर्मांसलशरीर एवानुभवेन वृक्षादिवृत्तित्वे मानाभावात्[41] । अथेन्द्रियाश्रयत्वं समवायेन संयोगेन वा, आद्येऽसम्भवः, इन्द्रियावयवानामेव तथात्वात्, अन्त्ये घटादावतिप्रसङ्ग इति चेन्न, इन्द्रियपदेन तज्जन्यज्ञानस्योक्तत्वात् । आश्रयत्वञ्चावच्छेदकताख्यस्वरूपसम्बन्धेन, [42]तथा च तेन[43] सम्बन्धेन साक्षात्कारस्याश्रये [44]वर्तते यान्त्यावयविमात्रवृत्तिजातिस्तद्वत्त्वं[45] लक्षणं पर्यवस्यति । इन्द्रियपटुत्वप्रयोजकधातुसाम्य[46]वद्वृत्तितादृशजातिमत्त्वं तत्त्वम्[47], पटुत्वञ्च दूरसूक्ष्मग्राहकत्वमिति तु वार्त्तिककृदनुयायी[48] वर्द्धमानः ।' चैत्रस्येदमिन्द्रियं न

31. निष्क्रियविनष्टेo A. 32. oवेतान्वयित्यावयविo C. 33. oवेतेत्यनेन C. 34. घटत्वादे अन्तपदेन B. X—X—om. 35. oत्वादे सतिपदेन C. 36. नित्यात्मकेन A, D. 37. oपक्षिo C. 38. oमांसलo add. C. 39. सा च न A. 40. अस्ति om. A, C, E. 41. oवृत्तानुमानाभावात् C. After this, C has the extra reading—"वस्तुत एतस्योपाधेरनुसन्धानेऽपि मानुषपशुवृक्षादिशरीरेषु शरीरमित्यनुगतमतेः पृथिवीत्वव्याप्यैका शरीरत्वजातिरवश्याभ्युपेया, तयैव च वृक्षादावतिप्रसङ्गनिरासः, चेष्टाघटितञ्च पार्थिवत्वव्याप्यादिशरीरानुगमकमिति तु मन्तव्यम् ।' The portion चेष्टाघटितञ्च…मन्तव्यम् occurs also in E. This portion does not seem to be a part of the text. 42-43. एवं चात्र न C. 44-45. समवेतवदन्त्यावयविमात्रवृत्तिसामान्यं तदाश्रयत्वं A, B, D. 46. oसम्येo C. 47. मत्त्वं C. 48. वार्त्तिकाकृदनुयायी B, वार्त्तिकादिहृदयानुयायी C, वार्त्तिकापिहृदयानुयायी D.

तु घटस्ये'त्यादिबुद्धिनियामकेन संयोगविशेषेणेन्द्रियाश्रयत्वमित्यर्थः[49]। अस्ति च गोलकेन्द्रियाणां सम्बन्धविशेषस्तथा च तेन सम्बन्धेनेन्द्रियवदारब्धं वाऽर्थः[50], जातिगर्भलक्षणकरणाच्च[51] न दोष इत्यपि वदन्ति। अर्थाश्रयत्वमित्यत्रार्थ[52]पदं सुखदुःखान्यतरपरम्, न तु वक्ष्यमाणगन्धाद्यन्यतमत्वम्, घटादावतिव्याप्तेः। तदाश्रयत्वञ्च[53] 'शरीरे मे सुखम्, पादे मे[54] दुःखमि'त्यनुभवसिद्धेनावच्छेदकताख्यस्वरूपसम्बन्धेन वाच्यम्[55], [56]तेनात्मनि नातिप्रसङ्गः[57]। तद्वत्त्वञ्च तद्वत्समवेतान्त्यावयविमात्रवृत्तिजातिमत्त्वम्, तेन नाप्रसङ्गः, वृक्षादीनामपि भोगश्रुतेः न तत्राव्याप्तिः। न च नरसिंहशरीराव्याप्तिस्तत्र भोगाभावात्, नरत्वसिंहत्वयोश्च जातिसाङ्कर्यभयेन तत्राभावादिति[58] वाच्यम्, उक्तमांसलशरीरवृत्तिपृथिवीत्वव्याप्यजातेस्तत्र सत्त्वात्। नव्यास्तु—'शरीरं[59] शरीरमि'त्यनुगतमितेः शरीरत्वं जातिविशेषः, न च साङ्कर्यम्, शरीरारम्भकावयवसंयोगे तत्स्वीकारात्, स च परम्परया 'शरीरमि'ति बुद्धिं कारयति[60], एवञ्च [61]ज्ञानादिनिमित्तकारणताप्यनुगतेन रूपेणोपपद्यते; न च कर्मप्रयोज्यजात्या साङ्कर्यम्, तयोरेतद्व्याप्यतास्वीकारात्, कार्यतावच्छेदकाननुगमस्यादोषत्वात्। वस्तुतस्तु द्रव्यारम्भकसंयोगः कर्मज एव, कर्मप्रयोज्यजात्यैव[62] [63]जन्यद्रव्यत्वावच्छिन्नासमवायिकारणतावच्छेदकात्, न च विनिगमकाभावात् संयोगप्रयोज्यव्याप्यजात्यैव तथात्वं स्यात्, द्व्यणुके व्यभिचारात्, परमाणुद्वयसंयोगस्य संयोगजत्वा[64]भावात्, एकत्वेष्वेव वा[65] जातिरिति वदन्ति। शरीरत्वमखण्ड एव कश्चनोपाधिरित्यन्ये ॥ १० ॥

---

49. ०त्वमर्थः A. 50. इति add. A. 51. गर्भकरात् लक्षणकरणच्च C. 52. ०श्रयमिति अर्थ० C. 53. ०त्वन्तु C. 54. मे om. B. 55. वाच्यम् om. C, E. 56-57. om. A, B. 58. तत्र भोगादिति B. 59. शरीरं om. A, B, D. 60. जनयति E. 61. चेष्टासमवायिकारणता० add. C. 62. कर्मप्रयोज्यव्यापजात्यैव C. 63. जन्यद्रव्यत्वावच्छिन्नेऽसमवायि० A, B, C. 64. ०जत्यत्वा० A. 65. वा om. C.

क्रमप्राप्तमिन्द्रियं लक्षयति विभजते च—

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ ११ ॥

एतेन घ्राणाद्यन्यतमत्वमिन्द्रियपदसङ्केत[67]विशेष[68]विशेष्यत्वम्वा लक्षणमभिप्रेतम्। यद्वा[69]—साक्षात्कारत्वव्याप्यजातिमात्रावच्छिन्नजन्यताप्रतियोगिकजनकतावद्द्रव्यत्वं[70] मनोऽन्यतादृशद्रव्यत्वं वाऽत्रेन्द्रियत्वम्[71], अस्ति च चक्षुष्ट्वचाक्षुषत्वादिना[72] हेतुहेतुमद्भावः; स्मृतिस्वरूपायोग्यो यो ज्ञानजनक[73]मनःप्रतियोगिकसंयोगस्तदाश्रयत्वं[74] वा[75]। भवति च[76] चक्षुर्मनःसंयोगादिकं[77] चाक्षुषादिबीजम्, आत्ममनःसंयोगस्यापि ज्ञानजनकजनकत्वादात्मन्यतिप्रसङ्गवारणाय स्मृतिस्वरूपायोग्येति[78]। न च सुषुप्ति[79]समये ज्ञानानुत्पादाय[80] त्वङ्मनःसंयोगस्यापि ज्ञानमात्रहेतुत्वात्त्वगिन्द्रियाव्याप्तिः[81], आत्ममनःसंयोगस्य वैजात्येनैव हेतुत्वात्तदानीं[82] विजातीयात्ममनोयोगविरहा[83]देव ज्ञानानुत्पत्तेः। न हि स आत्ममनःसंयोगत्वेन हेतुर्गौरवात्, मन[84]आत्मसंयोगत्वेनापि हेतुत्वप्रसङ्गाच्च। यदि च त्वङ्मनःसंयोगोऽपि हेतुस्तदा स्मृतिस्वरूपयोग्यत्वगवृत्तित्वेन विशेषणीयमित्यपि वदन्ति। घ्राणेत्यादि विभागपरम्, घ्राणत्वादयो[85] घ्रातित्वाद्यवच्छिन्नप्रयोजका जातिविशेषाः, श्रोत्रञ्च कर्णशष्कुल्यवच्छिन्नं नभः। घ्राणादिकं पृथिव्यादितोऽतिरिक्तमिति केचिदाहुस्तन्निराकरणायाह—भूतेभ्य इति। अभेदे पञ्चमी,

---

66. एते B. 67. ०शङ्केत० A, B, C. 68. ०विशेष० om. B, E. 69. यद्वा om. B. 70. ०वद्द्रव्यत्वं० B. 71. वा इन्द्रियत्वम् C. 72. 73. ०ज्ञानजनक० om. A. 74. सामान्यविशेषितं add. C, अन्योऽन्यविशेषितं add. E. 75. तदिहेन्द्रियत्वम् add. C, E. 76. च om. B, E. 77. ०मनोयोगादिकं B, E. 78. ०योग्य इति A. 79. सुसुप्ते० A. 80. ०पादय D. 81. ०त्वगिन्द्रिया० C. 82. ०तदा A, E. 83. ०योगस्य विरहा० C, E. 84. सत० C. 85. जिघ्रानत्वा० C.

अनतिरिक्तानीति वा[86] शेषः, न तु जन्यत्वम्[87], नभसोऽजन्यत्वाद्विशेषणस्य जन्यत्वाद्विशिष्टे जन्यत्वव्यपदेशः—इत्यपि केचित्। घ्राणादीनां बहिरिन्द्रियत्वेन ग्राह्यजातीयविशेषगुणवत्त्वाद्[88] गन्धादिमत्त्वम्, तेन च पृथिव्यादित्व[89]मिति भावः[90]। विशेषगुणत्वञ्च बहिरिन्द्रियद्वयग्राह्यगुणत्वव्याप्यजातिरहितत्वम्, तेन च चक्षुरादौ स्नेहादिसिद्ध्याऽर्थान्तरम्[91]। मनःसाधारणेन्द्रियपक्षे तु भूतेभ्य इत्यनन्तरं मनश्चाभूतमिति पूरयन्ति, तेन न न्यूनतेति संक्षेपः ॥ ११ ॥

क्रमप्राप्तमर्थं[92] लक्षयति विभजते च—

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः[93] ॥ १२ ॥

तेषामिन्द्रियाणामर्थाः विषयाः[94], तेन दर्शनस्पर्शनोभयाग्राह्यबहिरिन्द्रियग्राह्यजातिमद्गुणत्वमर्थत्वमुक्तम्भवति। प्रभावारणाय गुणेति। पृथिव्यादिगुणा इति षष्ठीसमासस्तथा च भाष्यम्—"पृथिव्यादीनां यथाविनियोगं ×गुणा" इति। पृथिव्यादि×गुणा इत्यनेन च लक्षणान्तरमुक्तम्, तच्च स्नेहत्वद्रवत्वेतरभूतविशेषगुणत्वम्। यद्वा—पृथिव्यादिगुणा इत्यनेन गुणगुणिनोरभेदवादो निराकृतः, 'पृथिव्यां गन्ध गन्धो न पृथिवी'त्यादिप्रतीतेः 'पृथिवी गन्ध' इत्याद्यप्रतीतेश्च पृथिव्यादितोऽतिरिक्ता एव गन्धादय इति भावः। वार्त्तिककृतस्तु—पृथिव्यादयश्च गुणाश्चेति द्वन्द्वसमासः, गुणपदं [95]गन्धादीतरबहिरिन्द्रियग्राह्यगुणपरम्, गन्धादीनां विशेषत उपादानन्तु[96] एतेषां प्रतिनियतेन्द्रियग्राह्यत्व-

---

86. वा om. A, B. 87. जन्यत्वे A, C. जन्यत्वेन B. 89. पृथिवीत्वo E. 90. रसनादौ च रसवत्त्वादिना पृथिवीत्वजलान्यतरादिकं सिद्ध्यदापरमाणु जन्यानुद्भूतगन्धाद्यकल्पना लाघवेन जलत्वादिकं सिद्ध्यतीति add. E. 91. oन्तरत्वम् C, E. 92. oमन्वयं C. 93. oस्तदर्थः B. 94. विशेषाः C X-X om. B, a case of haplography. 95. गन्धादीतरo om. B. 96. oदानस्तु D.

बोधनाय[97], पृथिव्यादीत्यादिशब्दो जात्यादिविशेषपरोऽपि, एवञ्च तदर्थत्वमित्यनेन बहिरिन्द्रियग्राह्यत्वमर्थत्वमित्युक्तम्[98], इत्थञ्च गन्धादिपदमपि ग्राह्यगन्धादिपरमित्यवधेयम्[99]; यद्वा—पृथिव्यादिपदं गुणेतरमात्रपरम्, गुणपदन्तु गन्धादीतरगुणपरम्, विषयत्वमेव चार्थत्वमिति[100] प्राहुः॥ १२ ॥

क्रमप्राप्तां[101] बुद्धिं लक्षयति—

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १३ ॥

[102]अत्र दर्शने [इति शेषः]। इतिः शब्दवाची, बुद्ध्यादिपदमनर्थान्तरं समानार्थकमित्यर्थः। यद्वा—बुद्ध्यादिपदं स्वपरम्, इतिर्भिन्नक्रमः, बुद्ध्यादिकमनर्थान्तरमिति ध्येयमितिवदता बुद्ध्यादिपदं समानार्थकमित्यभिहितमेव।[103] तेन बुद्धिपद[104]शक्यत्वमुपलब्धिपदशक्यत्वं ज्ञानपदशक्यत्वं लक्षणत्रयं सूचितमिति वार्त्तिककृत्[105]प्रभृतयः। शक्यत्वं शक्तिविशेष्यत्वमतो न शक्यतावच्छेदके ज्ञानत्वे[106]ऽतिप्रसङ्गः। एतेन सांख्यमतं निराकृतम्, एवं हि तत्, प्रकृतिपरिणाम[107]विशेषो महत्तत्त्वा[108]परनामा सुखदुःखेच्छाद्वेषप्रयत्न[109]धर्माधर्मभावनात्मक-

---

97. ०त्ववारणाय E. 98. ०मर्थत्वमुक्तम् B. 99. इत्यवधेयम् om. C. 100. चार्थमिति C. 101. ०प्राप्तं A. 102-103. In the MSS, the text has become corrupt. We give here the text as in A, variants being indicated in brackets : बुद्ध्यादिपदं स्वपरं इतिभिन्नक्रमे बुद्ध्यादिपदमनर्थान्तरं समानार्थकमिति ध्येयमित्यर्थः। यद्वेति अत्र दर्शने (अदर्शने B) इतिः शब्दवाची वा बुद्धिरित्यादिकं समानानुमिति (समानार्थकमिति C) वदता बुद्ध्यादिपदं समानार्थकमित्यभिहितमेवेत्यपि वदन्ति। An attempt has been made to reconstruct the text by juxtaposing the words. 104. ०परo C. 105. वार्त्तिककृत्वात्o C. 106. ०ज्ञानेo B. 107. प्रकृतिः परिo A, प्रकृते परिo B. 108. महत्त्वाo B. 109. ०द्वेषयत्नo B.

भावाष्टक[110] सम्पन्नः कश्चिदस्ति पदार्थः, सैव च बुद्धिः, तत्र च मानं सुखादेः[111] साधिकरणत्वग्राहकं[112] प्रमाणम्। न च पुरुष एव तदाश्रयः, तस्य जन्यधर्मानाश्रयत्वरूपकूटस्थत्वश्रुतेः[113]। ज्ञानन्तु बुद्धिनिष्ठो बुद्धि-परिणाम[114]विशेषः घटाकारादिरूपो वृत्त्यपरनामा[115] त्रिगुणात्मकबुद्धेः सत्त्वगुणोद्रेकः कश्चिदतिशयः। इच्छादिभिन्न[116]सविषयकत्वं ज्ञानत्व-मिति तु तन्मतनिष्कर्षः, न तु चेतनत्वं [117]ज्ञानमिति नैयायिकमतम्, चेतनायाः पुरुषधर्मत्वेन [118]नित्यत्वेन च क्षयि[119]बुद्धिधर्मज्ञानानात्म-कत्वात्। उपलब्धिस्तु[120] बुद्धिनिष्ठवृत्तौ दर्पण इव स्वच्छायां चैतन्य-प्रतिबिम्ब इति। तन्न, चेतनासुखाद्योः[121] सामानाधिकरण्यानुभवात् पुरुषस्यैव सुखादिसत्त्वेन [122]बुद्धौ तत्सत्त्वे मानाभावात्[123]। कूटस्थ-त्वन्तु [124]न निर्गुणत्वमपि तु[125] नित्यत्वं मुक्तिभागित्वमनात्मेतरत्वं वा। इत्थञ्च ज्ञानमपि न चेतनातिरिक्तम्, मानाभावात्, न वा वृत्तौ चेतनाप्रतिबिम्बः, वृत्तेरेव चेतनात्मकत्वादिति संक्षेपः ॥ १३ ॥

क्रमप्राप्तं मनो लक्षयति—

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ २४ ॥

[126]असति बाधके सति[127] च[128] चक्षुरादिविषयसन्निधानादौ एकस्य पुंसश्चाक्षुषरासनघ्राणजश्रावणानां मध्ये द्वयोर्बहूनां वा युगपदेकदा[129]-

110. ०भावात्मक० C. 111. सुखादिः C. 112. ०ग्राहकत्वं C. 113. ०रूपनिर्गुणत्वपकूटस्थत्व० C. 114. बुद्धेः परि० A, बुद्धिः परि० B. 115. वृत्त्यपरिणामा C. 116. इच्छाभिन्न० B. 117. योगि० add. all MSS. 118-119. निष्ठत्वेन चक्षुषि A, नित्यत्वेन च B, नित्यत्वेन चाक्षुषि C. 120. MS E breaks off here; folia 13 and 14 are missing. 121. चेतनासुखाद्योः B. 122-123. बुद्धौ नाभावात् C. 124-125. om. A, B. 126-127. युगपदेकदा सति C. 128. च om. A, C, F 129. ०एकदा० om A. C, F.

ऽनुत्पादो मनसो लिङ्गम[130]नुमापकम्। चाक्षुषादिकारणस्य चक्षुरादि-मनःसंयोगस्य विरहादेव तदा चाक्षुषाद्यनुत्पत्तिरिति भावः। अनुमान-प्रकारश्च—इदं चक्षुरिदानीन्तनचाक्षुष[131]कारणतावच्छेदकरूपावच्छिन्न-प्रतियोगिताकविरहवत्, एतदव्यवहितोत्तरसमये चाक्षुषानुत्पादकत्वा-दित्यादिः। अत्र[132] विषयसन्निकर्षादिरूपकारणविरहे[133]बाधात् तदति-रिक्तकारणविरहः सिद्ध्यतीत्यतिरिक्तचाक्षुषकारणसिद्धिः। तच्च चाक्षुषादिकारणं न नित्यम्, [134]युगपज्ज्ञानोत्पत्त्यापत्तेः[135]। नाप्य-नित्यं द्रव्यं विभिन्नजातीयं [136]चाक्षुषादिकारणम्[137], चाक्षुषोत्पत्ति-समये च रासना[138]द्यनुत्पत्तिहेतु[139]द्रव्यनाशादपरस्य तादृशद्रव्यस्यानुत्-पत्तेश्च न रासनाद्युत्पत्तिः, अनन्तररासनाद्युत्पत्तिपूर्वसमये च तादृश-द्रव्योत्पत्तिरिति रासनाद्युत्पन्नत—इति युक्तम्, बहुतरद्रव्यतदवयवतद [140]समवायिकारणकल्पना[141]गौरवात्; नापि रूपादि, चक्षुरादौ तत्सत्त्वेन तद्दोषतादवस्थ्यात्; [142]अतएव नैकत्वं[143] नैक[144]पृथकत्वं न परिमाणं न गुरुत्वं न स्नेहः; न च चक्षुरादिनिष्ठविजातीयद्वित्वा-द्येव[145], तच्चक्षुषि तादृशद्वित्वाद्युत्पत्ति[146]समये तदुत्पादस्य विना कारणान्तरकल्पनं दुर्वारत्वात्[147], तत्कल्पने च गौरवात्; अतएव न विलक्षणवेगः विजातीयकर्म वा; नापि विजातीयं ज्ञानादिरूपम्, ज्ञानादिविगमेऽपि चाक्षुषाद्युत्पत्तेः; नापि विभागः, तस्य संयोगपूर्वकत्वेन प्रथमोपस्थितत्वेन संयोगस्यैव कारणत्वकल्पनात्; किन्तु संयोगः। स च न विभुद्रव्यसमवेतः, इन्द्रियाभ्यां[148] विभुनः[149] संयोगे युगपज्ज्ञाना-

---

130. लिङ्गम् om. A, C, F. 131. ०रिदानीं C, F. 132. तत्र C. 133. विरह B, D. 134-135. om. A, B, D. 138. वासना० B, which uniformly replaces रासन० by वासन०. 139. ०पत्तिहेतु० om. B. 140. ०व्यवस्तद० B. 141. ०कल्पमा० B. 142-143. अत्र श्रवणैकत्वं C. 144. नैव० A. 145. ०द्वित्वादेव B. 146. ०द्वित्वोत्पत्ति० A. 147. दुर्वरत्वात् B. 148. इन्द्रियाभ्यां om B. 149. विभुनः om. C, F.

बुद्ध्युत्पत्त्यापत्तेः। अतएव नावयविसमवेतः, अवयवकल्पनायां गौरवाच्च, किन्त्वणुसमवेतः। स चाणुर्न पृथिव्यादिरूपः[150], मानाभावात्, गन्धादिकल्पनायां गौरवाच्चेत्यतिरिक्तवस्तुसिद्धिः; तच्च द्रव्यम्, संयोगित्वात्, प्रतिपुरुषं विभिन्नञ्च[151], कथमन्यथा नानापुरुषाणामेकदा चाक्षुषं समुत्पद्यते। अस्ति च सकलमनोमात्रवृत्तिरेका जातिरितरथा तत्तन्मनःसंयोगत्वेन कारणत्वे व्यभिचारो गौरवञ्च। पृथिव्यादिभिन्न-चक्षुः[152]संयोगत्वेन[153] च[154] हेतुतायां गौरवं स्यात्[155], किन्तु [? न च] जातिविशेषवच्चक्षुःसंयोगत्वादिना, एवञ्च सूत्रेण प्रसङ्गान्मनसि प्रमाणमभिहितम्। लक्षणन्तु मनस इत्यनेन लब्धं मनस्त्वमेवेति वदन्ति। युगपज्ज्ञानानामनुत्पत्तिर्यस्मान्मनोऽणुत्वतः, प्रयोजकत्वे पञ्चमी, सा तथाऽणुतेत्यर्थः, लिङ्गं लक्षणम्, एवञ्च स्पर्शशून्यत्वे [156]स्पर्शवद्वृत्ति-द्रव्यत्वाव्यापकजातिशून्यत्वे वा[157]सति अणुत्वं मनोलक्षणमिति सूत्रार्थ इति तु वस्तुगतिः। भाष्ये तु मनसि प्रमाणमन्यदप्यभिहितम्, तथा च भाष्यम्—"स्मृत्यनुमाना[158]गमसंशयप्रतिभास्वप्न[159]ज्ञानोहाः[160] सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि" इति। तत्र च प्रयोगः—एतानि सकरणकानि, कार्यत्वाच्चाक्षुषवदिति; न [161]चात्मैव करणम्[162] कालदिगादेरपि तथात्वापत्तेर्विनिगमकाभावात्, ^X^सर्वस्य च करणत्वे[163] गौरवात्^X^ अतिरिक्तकरणसिद्धिरिति भाष्याभिप्रायः। विशेषः पुनरस्माकं [164]सिद्धान्तरहस्येऽवसेयः[165] ॥ १४ ॥

क्रमप्राप्तां प्रवृत्तिं लक्षयति—

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १५ ॥

---

150. ०रूपं A,D. 151. च om. C. 152. चक्षुः om. A, B, D. 153. ०संयोगत्वे न A. 154. च om. B. 155. गौरवात् C. 156-157. om. C, F. 158-159. ०मानागमनं संशयः प्रतिभोष्म B. 160. ०ज्ञानेच्छा C. 161-62. चार्थैव करणम् B, चात्तोरकरणं C. X—X. om. B. 163. करणत्वं C. 164-165. सिद्धान्तरहान्मनःखण्डालेऽवसेयः C.

प्रवृत्तिरित्यनेन [166]प्रयत्नवत्वं लक्षण[167]मुक्तम्, न चादृष्टजनके लौकिकप्रयत्ने भागवतयत्ने वाऽतिव्याप्तिः, तेषामपि लक्ष्यत्वात्[168], अदृष्टस्वरूपयोग्यत्वेन प्रयत्नमात्रस्यैव हेतुत्वात्[169]। अदृष्टजनकत्वे सति जन्ययत्नत्वं प्रवृत्तित्वमिति तु वर्द्धमानादयः। विभजते[170]—वागिति। वागारम्भः बुद्ध्यारम्भः शरीरारम्भ इति त्रिविधा प्रवृत्तिरिति भावः। अत्र बुध्यते[171]ऽनेनेति बुद्धिपदं मनःपरमिति तु[172] वार्त्तिकादयः। वाक्पदं ज्ञानहेतूपलक्षकमित्याचार्याः, तेन गङ्गा[173]दर्शनाद्यनुकूलचक्षुरादिगोचरयत्ने नाव्याप्तिः। एवञ्च शरीरमनोऽतिरिक्तज्ञानहेतुगोचरप्रवृत्तित्वं वागारम्भत्वम्, मनोगोचरप्रवृत्तित्वं बुद्ध्यारम्भत्वम्, शरीरगोचरप्रवृत्तित्वं शरीरारम्भत्वम्, शरीरत्वमिह शरीरतदवयवसाधारणम्, तेन दानाद्यनुकूलहस्तादिगोचरयत्ने नाव्याप्तिरिति वर्द्धमानोपाध्यायाः। वाक्पदं शरीर[174]मनोऽतिरिक्तपरमिति[175] तु वस्तुगतिः ॥ १५ ॥

क्रमप्राप्तान् दोषान् लक्षयति—

प्रवर्तनालक्षणा दोषाः ॥ १६ ॥

प्रवृत्तिजनकत्वं दोषत्वम्, प्रवृत्तिपदार्थस्तु प्रागेव निरूपितः। भवति च रागो द्वेषो मोहश्च प्रवृत्तिहेतुः। न चादृष्टादावति[176] प्रसङ्गः, जन्यसविषयकत्वे सति प्रवृत्तिजनकत्वस्य प्रवर्तनापदार्थत्वात्। न च प्रवृत्तिजनकप्रमायामति[177]प्रसङ्गः, तस्या अपि रागद्वेषान्यतरजनकजन्यज्ञानत्वेन मोहत्वादिति ॥ १६ ॥

166-167. प्रयत्नत्वं तल्लक्षण० A, यत्नं लक्षण० B. 168. लत्वात् B. 169. स्यैवाहयत्वात् C. 170. ०जति A, B. 171. बुद्ध्यते A, C, F. 172. तु om. A, C, F. 173. गन्धा० A, B, D. 174-175. ०मनाति-रिक्तपदमिति A, मनोऽतिरिक्तमिति B. 176. ०दावप्यति० B. 177. ०यामिति० A.

क्रमप्राप्तं प्रेत्यभावं लक्षयति—

पुनरुत्पत्तिः प्रेत्यभावः ।। १७ ।।

पुनरित्यनेन जन्माभ्यासज्ञापनादुत्पत्तेर्मरणोत्तरत्वमर्थं लब्धम्, तथा च मरणोत्तरजन्मत्वं लक्षणं पर्यवसितम् ।[178] इदन्तु प्रेत्यभावपदार्थतावच्छेदकरूपं लक्षणमभिप्रेत्य, प्रेत्य[179]मृत्वा[180]भावो जन्मेति तदर्थात्, इतरभेदानुमापकलक्षणं [181]पुनरुत्पत्तित्वमेव[182]; पुनर्ग्रहणन्तु जन्ममरणप्रबन्धस्यानादित्वज्ञापनायेत्यवधेयम्; तत्र चरमः शरीरात्मसंयोगध्वंसो मरणमिति सम्प्रदायः। चरमत्वन्तु यद्यपि न [183]स्वप्रतियोग्यधिकरण[184]मात्रसमवेतशरीरात्मसंयोगासमानकालीनत्वम्, मरणोत्तरमपि [185]जीवद्दशापन्नस्यात्मनो[189] मृतशरीरेण संयोगा[187]दव्याप्तेः, स्थविरशरीरसामग्रीकालीनोत्पत्तिकयुवशरीरनाश[187]नाश्यस्य युवशरीरा[188]त्मसंयो[189]गस्य नाशेऽति[190]व्याप्तेश्च[191], एतेन स्वसमानाधिकरणप्राणशरीरसंयोगासमानकालीनत्वं चरमत्वमित्यपि निरस्तप्रायम्, तथापि स्वसमानाधिकरणैकदाऽनेकावृत्तिजातिमच्छरीरप्राणसंयोगासमानकालीनत्वं चरमत्वम्, मृतशरीरे तु प्राणसंयोग एव नास्तीति नोक्ताप्रसङ्गः। स्थविरशरीरञ्च युवशरीरवृत्तिजातिमदेवेति नोक्तातिप्रसङ्गः। एकदाऽनेकावृत्तीत्यनेन मनुष्यत्वादिनिरासः। विशेषणीयश्च[192] चरमशरीरा[193]त्मसंयोगध्वंस इत्यत्र शरीरात्मसंयोगः स्वसमानाधिकरणप्राणशरीरसंयोगसमानकालीनतया, तेन मृतशरीरात्मसंयोगध्वंसे नातिव्याप्तिः। आत्मपदञ्च तच्छरीरजनकादृष्टवत्परम्,[194] तेनैकपुरु-

178. After this, reading is again available in E. 179. प्रेत्य om. B. 180. भूत्वा E. 181-182. पुनरुक्तित्वमेव B. 183-184. ध्वाधिकरण० C. 185-186. पूर्वंजीवद्दशापन्नेन C. 187. ०रेणात्मसंयोगा० C. 187-188. ०नाश्य युवशरीरा० C. ०नाश्यपुनः शरीरा० E. 189-190. ०गनाशाति० C, ०गाति० E. 191. च om A, D, E. 192. च om. C, E. 193. चरमः शरीरा० C, E. 194. ०दृष्टतत्परम्

षीयशरीरपुरुषान्तरात्मसंयोगध्वंसे तथाविधे नातिप्रसङ्गः, अतएव न[195] भगवतो मरणम्। वस्तुतः आत्मपदं तच्छरीरावच्छेदेन भोक्तृपरम्, तेन भगवच्छरीरस्य कंसाद्यदृष्टारब्धत्वेऽपि न भगवच्छरीरवियोगदशायां कंसादेर्मरणम्। चैत्रप्राणसंयोगासमानकालीनो विशिष्टचैत्रतदात्मसंयोगस्य ध्वंसो [चैत्रस्य]मरणम्, एवमन्यदपि निर्वाच्यम्, शब्दमात्रानु[196]गमस्याकिञ्चित्करत्वादित्यपि वदन्ति। चरमत्वमदृष्टनाशजन्यत्वम्, मरणाख्यसंयोगविशेषनाशं प्रत्येव जीवनादृष्टनाशो हेतुरिति वर्द्धमानोपाध्यायाः, तेषामदृष्ट[197]नाशस्य तज्जनकत्वे मानन्तु[198] परिचिन्तनीयम्। चरमः प्राणशरीरसंयोगध्वंस एव मरणम्, स च [199]स्वप्रतियोग्या[200]श्रयशरीरा[201]वच्छेद्य[202]भोगवत्त्वसम्बन्धेन 'अस्येदं शरीरमि'ति प्रतीतिसिद्धेन[203] तादृशशरीरनिरूप्यताख्य[204] सम्बन्धविशेषेण वा यत्र वर्तते तत्र मृतव्यवहारं जनयतीत्यप्याहुः। उत्पत्तिस्तु प्रथमः शरीरात्मसंयोगः, प्रथमत्वन्तु स्वसमानाधिकरणैकदाऽनेका[205] वृत्तिजातिमच्छरीरप्राणसंयोगसमय[206]ध्वंसानधिकरणक्षणवृत्तित्वविशिष्टत्वम्, न चैकदेत्यादिजातिमदित्यन्तमधिकम्, युवशरीरादिप्रथमात्मसंयोगेऽतिप्रसङ्गात्' विशेषणीयश्च शरीरात्मसंयोगः[207] स्वसमानाधिकरणप्राणशरीरसंयोगसमानकालीनतया, तेन प्राणसंयोगानुत्पाददशायां शरीरात्मसंयोगे नातिप्रसङ्गः। आत्मपदार्थस्तु पूर्वोक्त[208] एव[209] ग्राह्यः। प्रथमः प्राणशरीरसंयोगो वा जन्म, स[210] चोक्तसम्बन्धेन यत्र वर्तते तत्र 'जात' इति[211] व्यवहारं जनयति[212]।

B. 195. न om. B. 196. ०मात्रस्यानु० B.C. 197 तेषामष्ट० E. 198. तु om. B. 199-200. प्रतियोग्या० B, स्वप्नयोग्या० C. 201-202. ०वावृत्य० C. 203. ०सिद्धं न C. 204. °निरूपकताख्य° B, C, ०निरूपिताख्य० E 205. ०नेक० B. 206. संयोगक्षण० C. 207. शरीरसंयोगः B. 208. पूर्वोक्तो A, B, C. 209. एव om. A, B, D. 210. न C. 211. इति om. A, B, D. 212. ०यन्ति B.

स्वादृष्टविशेषजन्यः[213] शरीरात्मसंयोगो जन्मेति तु वर्द्धमानः। तत्र[214] च शरीरात्मसंयोगः स्वसमानाधिकरणैकदाऽनेका[215] वृत्तिजातिमच्छरीरनिष्ठादृष्टविशेषजन्यात्मसंयोगसमयध्वंसा[216]नधिकरणवृत्तित्वविशिष्टतया विशेषणीय इति न कश्चिद्दोष इति; अदृष्टविशेषश्च[217] जीवनादृष्टरूप इति दिक्॥ १७॥

क्रमप्राप्तं फलं लक्षयति—

प्रवृत्तिदोषजनितोऽर्थः[218] फलम्॥ १८॥

प्रवृत्तिदोषाभ्यां जनितोऽर्थ इति स्वरूपकथनम्, लक्षणन्तु जन्यत्वमात्रं सामान्यतः, विशेषलक्षणन्तु—सुखदुःखान्यतरसाक्षात्कारत्वं मुख्यफलत्वम्, मुख्यफले[219]तरकार्यत्वं गौणफलत्वम्। सोऽयं फलशब्दः सुखदुःखोप[220]भोगे मुख्यः[221], "शरीरादिषु फलव्यवहारो ^X^गौण" इति वार्त्तिकदर्शनादिति सम्प्रदायः। वस्तुतः सुखदुःखान्यतरसाक्षात्कारत्वमेव फलत्वम्, तथा चात्रैव भाष्यम् -"सुखदुःखसंवेदनं फलमि"ति, वार्त्तिकन्तु[222] शरीरादिषु फलव्यवहारो^X^ लक्षणयेत्यभिप्रायकमिति[223] दिक्॥ १८॥

क्रमप्राप्तं दुःखं लक्षयति—

बाधनालक्षणं दुःखम्॥ १९॥

दुःखत्वलक्षणकं दुःखमित्यर्थः, दुःखत्वन्तु[224] जातिविशेषः, शरीरादिषु दुःखव्यवहारस्तु दुःखानुषङ्गाद् गौण इति नव्याः। बाधनालक्षणं

---

213. स्वादृष्टजन्यः B, अदृष्टविशेषजन्यः, C, E. 214. अत्र C. 215. ०नेक० E. 216. ०संयोगक्षणध्वंसा० C, संयोगध्वंसा० E. 217. च om. B. 218. ०तार्थः B. 219. मुख्यकाल० C. 220-221. भोगमुख्यः B. X-X, om. A, B, a case of haplography. 222. ०कस्तु C. 223. ०प्रायिकमिति B, ०प्रायःकमिति C, ०प्राय इति E, 224. तु om E.

दुःखानुषङ्गि । तत्र शरीरं षड़िन्द्रियाणि विषया बुद्धयश्च दुःखकारणत्वात्, [225]सुखं दुःखनान्त[226]रीयकत्वात्, [227]दुःखं स्वरूपतो[228] दुःखानुषङ्गि ; एवं धर्माधर्मादिकमपि दुःखानुषङ्गि बोध्यम्, इत्थञ्चा[229]त्मापवर्गेतर[230]मेयत्वमेव गौणमुख्यसाधारणं लक्षणम् । [231]मुख्यदुःखत्वं जातिः,[232] गौणदुःखस्य तु मुख्येतरदुःखत्वं लक्षणमिति सम्प्रदायः ॥१६॥

क्रमप्राप्तमपवर्गं लक्षयति—

तदत्यन्तविमोक्षोऽपवर्गः ॥ २० ॥

तस्य दुःखस्या[233]त्यन्तो विमोक्षः[234] [स्व]समानाधिकरणदुःखासमानकालीनो विनाश इत्यर्थः ॥ २० ॥

॥ इति न्यायरहस्ये प्रमेयरहस्यम् ॥

क्रमप्राप्तं संशयं लक्षयति—

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य-
व्यवस्थातश्च विशेषापेक्षो विमर्शः[1] संशयः ॥ २१ ॥

संशय इति लक्ष्यपरम्[2] । विमर्श इति लक्षणपरम्, विरुद्धार्थावमर्शो[3] विमर्शः, एकस्मिन् धर्मिणीत्यादिः, तेनैकस्मिन् धर्मिणि तत्तदभावप्रकारकं ज्ञानमिति पर्यवसितार्थः । एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नं यत्तेन सम्बन्धेन[4] तद्धर्मविशिष्टप्रकारकत्वं, तत्सम्बन्धावच्छिन्न-

---

225-226. सुखं दुःखमान्त० B, सुखदुःखनान्त० C. 227-228. om. C. 229-230. ०त्मापर्गेतुर० C, ०त्मात्द्धोर्मेतर० E. 231-232. मुख्यं दुःखस्य तु दुःखत्वं जातिः B. 233-234. ०त्यन्तविमोक्षः C.

1. ०मर्षः A, C, which uniformly replace ०मर्श by ०मर्ष. 2. ०पदम् B. 3. ०द्धार्थो मर्षो C. 4. एकधर्मिता०......सम्बन्धन add. C, a case of dittography.

तद्धर्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तद्धर्मविशिष्टवान् योऽभावः[5] सम्बन्धविशेषेण तत्प्रकारकत्वञ्च तद्वज्ज्ञान[6]मिति तु निष्कर्षः। सम्बन्धप्रकारादावत्यन्तविशेषस्तु स्वयमूहनीयः। वैशिष्ट्यञ्च वैज्ञानिकम्, तेन घटत्वेन पटसंशयादौ नाव्याप्तिः। पुरुषत्वपुरुषभेद[7]प्रकार[8]कज्ञानादि च न संशयः, यदि च[9] सोऽपि[10] संशयस्तदाऽस्तु तद्वद[11]न्योऽन्याभावादिघटितमपि[12] लक्षणान्तरम्[13], अर्थभेदेन संशयपदनानार्थस्य सर्वसिद्धत्वात्। अस्तु वा तदत्यन्ताभावप्रकारित्वतद्वदन्योऽन्याभावप्रकारित्वयोरन्यतरत्वेन लक्षणे निवेश[14] इति दिक्। संशयत्वं नाम मानसत्वव्याप्यो जातिविशेषः, चाक्षुषादिकस्तु[15] न संशयः, अस्तु वा नानैव चाक्षुषत्वादिव्याप्यं संशयत्वम्, गुणवज्जातेरपि नाव्याप्यवृत्तित्वं दोषायेत्यपि वर्द्धमानोपाध्यायैः संशयलक्षणनिबन्ध[16]व्याख्यानावसरे[17]ऽवादि। संशयत्वं 'संशेत' इत्यादिप्रतीतिसिद्धोऽखण्ड[18]एवाव्याप्यवृत्तिः कश्चिदु[19]पाधिरित्यपि केचित्।

कारणमुखेन त्रिविधं संशयं विभजते—समानेत्यादि। समानधर्मोपपत्तिः कोटिद्वयसहचरितधर्मवत्तया धर्मिधीः। अनेकस्मात् सपक्षविपक्षतो[20]व्यावृत्तो धर्मोऽ[21]नेकधर्मो[22]ऽसाधारणधर्म इति वार्त्तिकादि। एकपदं सपक्षगतपरं विपक्षगतपरञ्च, तदन्योऽनेकः सपक्षविपक्षव्यावृत्त इत्यपरे, तद्वत्तया धर्मिधीरनेकधर्मोपपत्तिः[23]। अत्र सपक्षविपक्षौ तत्तदभाववन्तौ,[24] तथा च तद्वदवृत्ति[25]तदभाववदवृत्ति[25]शब्दत्ववानय-

---

5. च add. C. 6. तज्ज्ञान० A. 7. ०पुरुषत्वभेद० C. 8-9. ०रको यदि च B. 10. सोऽपि om. B. 11. तत्तद० B. 12. ०तामपि तत् A, ०तमिति तत् C. E. 13. लक्षणान्तरम् om. A, C, E. 14. लक्षणनिवेशः B, C, D, E. 15. ०कन्तु B, C, D, E. 16-17. ०व्यापिविसरे० B. 18-19. एव कश्चिदु० B, एव व्याप्यवृत्तिः कश्चिदु० C, E. 20-21. व्यावृत्तधर्मो० B. 22. ०धर्म० om. B. 23. ०धर्मापत्तिः B. 24. ०भाववत्तौ A. 25-26. तदभाववदवृत्ति० om. A, D.

मित्यादि धीः 'अयं [27]तद्वान्न वे' [28]ति संशयहेतुरिति केचित्। तन्न, तदभाववदवृत्तिधर्मवत्तानिश्चयस्य तद्व्याप्यवत्तानिश्चयत्वेन तदभावबुद्धेः[29], तद्वद[30]वृत्तिधर्मवत्ता[31]निश्चयस्य च तद्भावव्याप्यवत्तानिश्चयत्वेन तद्विशिष्टबुद्धेः[32] विरोधात्ततः संशयानुत्पत्तेः[33]। न च तदभावव्याप्यवत्तानिश्चयविरह[34]विशिष्टतद्व्याप्यवत्तानिश्चयत्वादिनैव[35] विरोधितेति वाच्यम्, गौरवान्मानाभावाच्च। अनुभवबलात्तथा समूहालम्बनतत्तदभावव्याप्यवत्तानिश्चयव्यावृत्त[36]तावदन्यतमत्वादिना वा प्रतिबन्धकत्वमित्यपि केचित्। सपक्षविपक्षव्यावृत्तसंशयस्य तथा ज्ञानत्वेन हेतुत्वम्, तादृशनिश्चयस्य च[37] विरोधित्वमिति केचित्। सपक्षविपक्षौ साध्यतदभाववत्तया निश्चितौ, एवञ्च साध्यतदभाववत्ताया यत्र यत्र[38] येन येन रूपेण तदा निश्चयो जातस्तेन तेन रूपेण तत्तद्व्यावृत्तधर्मवत्ताधीर्हेतुरित्यपरे। तत्तदभावव्यावृत्तत्वं तत्तदभाववन्निष्ठाभावप्रतियोगित्वम्, तदुक्तं न्यायनिबन्धप्रकाशे वर्द्धमानचरणैः—"सजातीयविजातीयनिष्ठाभावप्रतियो[X]गित्वमसाधारण्यमिती"ति[X] तु वस्तुगतिः। परे तु साधारणधर्मोपपत्तिस्तद[39]भाववदवृत्तितया एकधर्मधीः, अनेकधर्मोपपत्तिस्तद्वदवृत्तितया एकधर्मोपपत्तिस्तदभाववदवृत्तितयाऽपरधर्मोपपत्तिरित्यर्थमाहुः।

विप्रतिपत्तिः पदजन्या तत्तदभावोपस्थितिः[40], तथा च प्रयुञ्जन्ते[41] परीक्षकाः—'शब्दो नित्यो न वे'ति। ननु व्यभिचारात् कथमेषां[42] कारणत्वमिति चेन्न, संशयविशेषं प्रति तेषां हेतुत्वात्, विशेषश्च तत्तद[43]व्यक्तित्वरूपः असाधारणधर्मादि[44]जन्यत्वादि[45]रूपो वे[46]त्यन्यदेतत्।

27-28. शब्दो न वे० C, स न वे० E. 29. ०बुद्धौ C. E. 30. तत्तद० A. 31. ०वत्त्व० A, D. 32. ०बुद्धौ C. E. 33. ०यानुपपत्तेः A, ०यान्नपपत्तेः B, ०यानुत्पद्ये C, ०यानुत्पत्तिः E. 34. ०विरह० om. B. 35. ०यत्वेन B. 36. ०वृत्त्य० C. 37. च om. B. 38. यत्र om. B. X-X. ०गित्वसमाधीरन्यमिति B. 39. ०पत्तिस्तत्तद० C. 40. ०पस्थिः B. 41. प्रयुज्यते A, प्रयुज्यन्ते B, D. 42. कथं तेषां C. 43. तद० A. 44. ०र्माद्य० C, E. 45. ०आदि० om. E. 46. वा० om. B.

जातिरूप एव[47] विशेष इत्यपि केचित्। इह संशयपदमनुषञ्जनीयम्, तेन साधारणधर्मवद्धर्मिधीजन्यसंशयत्वमसाधारणधर्मवद्धर्मिधीजन्यसंशयत्वं विप्रतिपत्तिजन्यसंशयत्वं विशेषलक्षणमिति सम्प्रदायः।

प्रसङ्गात् संशयासाधा[48]रणकारणान्तरमप्याह — उपलब्ध्येति। उपलब्धिस्तत्कोटिनिश्चयोऽनुपलब्धिस्तदुपलब्धिविरोधितदभाववत्तानिश्चयस्तयोरव्यवस्थाऽभावस्तस्मात्।[49] विशेषापेक्ष इति।[50] विशेषो विशेषणं संशयकोटिस्तदपेक्षस्तज्ज्ञानापेक्ष इति सम्प्रदायः। उपलब्धिः कोऽट्योः,[51] अनुपलब्धिर्धर्मिणि तयोरनिश्चयः, व्यवस्था विशेषदर्शनं[51]व्याप्यदर्शनम्[52], तदभावोऽव्यवस्था, [53]विशेषो धर्मीन्द्रियसन्निधिस्तदपेक्ष इति तु नव्याः। भाष्यकृतस्तु पञ्चविधं संशयमाहुः,[54] उपलब्ध्यनुपलब्ध्यव्यवस्थात इत्यनेन प्रकारद्वयकथनात्, तत्रोपलब्धिः प्रामाण्यम्, अनुपलब्धिः प्रामाण्यविरोधिभ्रमत्वम्, तयोरव्यवस्था संशयः, एवञ्च प्रामाण्यसंशयजन्यसंशयत्वं भ्रमत्वसंशयजन्यसंशयत्वमप्यवान्तर[55] लक्षणद्वयमभिहित[56]मिति भाष्याभिप्रायः। प्रामाण्यसंशयादिजन्मासंशयोऽपि ज्ञानविषयत्वादिसाधारणधर्मदर्शनादेवेत्यत्र वार्तिककारादिशपथ एव मानम्। इत्थञ्च विशेषापेक्षो विमर्श इति लक्षणपरतयैव व्याख्येयम्, विशेषापेक्ष[57] एकधर्मिक[58] भावाभावप्रकारकत्वरूपविशेषवान् विमर्शो बोध इति तदर्थात्। युक्त[59]श्चैतत्, लक्षणाभिधाने कारणाभिधानस्यानुपयुक्तत्वादिति। नव्यास्तु—साधारणधर्मवत्ताग्रहादेः पृथक्कारणत्वे मानाभावः, सामान्यतः क्लृप्तविशिष्ट[60] बुद्धिसामग्रीत एव

---

47. एव om. B. 48. संशयसाधा० A, B, D. 49-50. विशेषापेक्षित इति B. 51. कोट्या: B. 51-22. om. B. 53. तेभ्यो add. C, E. 54. ०मार्गः B. 55. ०अवान्तर० om. C. E. 56. ०अभिहित om. B, D. 57. ०पेक्ष्य C. 58. ०धर्मिक० om. E. 59. मुक्त० B. 60. ०विशेष० A.D.

द्रव्यत्वपृथिवीत्वोभयविशिष्ट[61]बुद्धिवत्[62] संशयरूपोभयविशिष्टबुद्धेरुपपत्तेः, किन्तु विशेषणधीत्वेनैव साधारणधर्मज्ञानादीनां हेतुत्वम्; फलोपधानमादाय च[63] पञ्चविधो विभागः, विप्रतिपत्तिपदञ्च साधारणासाधारणधर्मज्ञानप्रामाण्या[64]प्रामाण्यसंशयान्य[65]कोटिप्रतिपत्तिपरमिति नाधिक्यमिति वदन्ति ॥ २१ ॥

क्रमप्राप्तं प्रयोजनं लक्षयति—

यमर्थ[66]मधिकृत्य प्रवर्तते तत् प्रयोजनम् ॥ २२ ॥

अधिकृत्य अवसीय,[67] निश्चित्येति यावत्, साध्यत्वेनेत्यादिः। तेन न सुखत्वादेर्यागादेर्वा यागादौ सुखादिसाधनताज्ञानात् प्रवृत्तस्य प्रयोजनत्वम्, सुखत्वादिसाधनताज्ञानात् प्रवृत्तस्य तु[68] सुखत्वादिकं प्रयोजनमेव। मुख्यगौणसाधारणमिदं प्रयोजनत्वम्, तेन ग्रामपशुहिरण्यादिषु नातिप्रसङ्गः। नन्वेवं स्वर्गमात्रेच्छावतः 'स्वध्वंसहेतुर्यागः[69] स्वर्गसाधनमि'ति ज्ञानात् प्रवृत्तस्य यागध्वंसोऽपि प्रयोजनं स्यादित्यत उक्तम्[70]—अर्थमिति[71]। इच्छाविषयीभूतमित्यर्थः। एवञ्च स्वसमानाधिकरणवर्तमानेच्छामुख्यविशेष्ययत्साधनताज्ञानाद् यस्य प्रवृत्तिः तत्तस्य प्रयोजनमिति पर्यवसितम्। परे तु प्रवृत्त्यभावेऽपीच्छाविषयता[72]मात्रेण प्रयोजनव्यवहारादिच्छाविषयत्वमेव प्रयोजनत्वम्, न च सुखत्वादावतिप्रसङ्गः, साध्यत्व[विषयता]निरूपित[इच्छा]विषयताया विवक्षितत्वादित्याहुः। अत्र गौणप्रयोजनत्वं समानाधिकरणेच्छाधीनेच्छाविषयत्वम्, तदनधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वमिति वदन्ति ॥ २२ ॥

---

61. ०विशिष्टो० A. 62. ०वत A, D. 63. च om. E. 64. ०ज्ञानमाण्या० E. 65. ०अन्य० om. B. 66. यदर्थ० E. 67. व्यवसीय B. व्यवसायं C, E, 68. तु om. B. 69. प्रतियोगिविषया—marginal note in A. 70. आह C, E. 71. अर्थमिति om. C, E. ०विषयता० om. E.

क्रमप्राप्तं दृष्टान्तं लक्षयति—

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः[73] ॥ २३ ॥

लौकिकाः शास्त्रपरिशीलनेन जन्म[कालीन]बुद्ध्यतिशयमप्राप्ताः, प्रतिपाद्या इति यावत्, तद्विपरीताः परीक्षकाः, प्रतिपादका[74] इति यावत्। कथाबहुत्वाद्बहुवचनमिति टीकाकृतः। एवञ्च वादिप्रतिवादिनोर्यत्र बुद्धिसाम्यं समबुद्धिः स दृष्टान्त इति टीका। लौकिकपरीक्षकाणामिति दिङ्मात्रम्, बुद्धेः प्रमात्वप्राप्तये वा, लक्षणन्तु बुद्धिसाम्यमित्येवेति तु वार्त्तिककारादयः। एवञ्च साध्यवत्त्व[75]निश्चयविशिष्टसाधनवत्त्वनिश्चय-साध्याभाववत्त्वनिश्चयविशिष्टसाधनाभाववत्त्वनिश्चयान्य[76]-तरवत्त्वं यत्र[77] स दृष्टान्त इति पर्यवसितम्। केवलान्वयिनि साध्याभावाप्रसिद्धावपि [78]साध्यीयत्वेनाभाव[79]निश्चयोऽस्त्येवेति नाव्याप्तिः। प्रकृतानुमितिहेतुव्याप्तिग्रहप्रयोजकसहचारनिश्चयो यत्र स दृष्टान्त इत्यपि वदन्ति ॥ २३ ॥

॥ समाप्तं न्यायपूर्वाङ्ग[80]प्रकरणम् ॥

क्रमप्राप्तं सिद्धान्तं लक्षयति—

तन्त्राधिकरणाभ्युपगमसंस्थितिः[1] सिद्धान्तः ॥ २४ ॥

तन्त्रपदं सर्वतन्त्रप्रतितन्त्रपरम्, संस्थितिः संस्थानं स्वरूपमिति यावत्। सर्वत[2]न्त्रप्रति[3]तन्त्राधिकरणाभ्युपगमान्यतमत्वमिति भावः। वार्त्तिके तु तन्त्रमधिकरणमाश्रयः प्रतिपादको[4] शास्त्रप्रति[5]पादितार्थाभ्युपगमः सिद्धान्त इति। तन्त्र्यते प्रतिपाद्यतेऽनेनेति व्युत्पत्त्या तन्त्रपदं प्रमाणमात्रपरम्, तेन मायापुरनगरचक्रवर्त्ती बहुतरगजतुरगानन्तसामन्तमौलि-

---

73. ०बुद्धिसामान्यं दृष्टान्तः B. 74. प्रतिपादका om. B. 75. ०वत्व० C, E, which uniformly write ०वत्व० ,for ०वत्त्व०. 76-77. ०तराद् यत्र B. 78-79. वसाध्येनाभाव० C, E. 80. ०पूर्वार्द्ध० B.

1. संस्तितिः B. 2-3. ०तन्त्र इति० A, तन्त्रं प्रति० B. 4. ०पादिको B. 5. शास्त्राति० A.

रञ्जितपदारविन्द इत्यभ्युपगम्य[6] तद्विरुद्धाभिधानमप्यपसिद्धान्त एव ; एवञ्च प्रमाणप्रतिपादितार्थाभ्युपगमः सिद्धान्त इति तु टीकाकृतः। तत्र प्रमाणपदं बोधकमात्रपरम्, तेन क्षणभङ्गाद्यभ्युपगमोऽपि सिद्धान्त इति तु निबन्धे, अभ्युपगम्यमानोऽर्थः सिद्धान्त इत्यपि ॥ २४ ॥

विभजते—

स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगम-संस्थित्यर्थान्तरभावात् ॥ २५ ॥

कश्चित्तु—स चतुर्विध इति भाष्यम्, सर्वतन्त्रेत्यादि तु[7] सूत्रम्, वार्त्तिके स चतुर्विध इत्यनेन [8]विना कृतस्यैव[9] सूत्रत्वेन कीर्तनादित्याह। स सिद्धान्तश्चतुर्विधः, सर्वतन्त्रादिस्वरूपाणां परस्परभेदादिति सूत्रार्थः ॥२५॥

सर्वतन्त्रसिद्धान्तं लक्षयति—

सर्वतन्त्राविरुद्धस्तन्त्रे[10]ऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २६ ॥

सर्वशास्त्राविरुद्धः शास्त्रसिद्धोऽर्थस्तादृशार्थाभ्युपगमो वा [11]सर्वतन्त्र-सद्धान्त इत्यर्थः[12]; यथा घ्राणादीनि इन्द्रियाणि प्रमाणानि प्रमेय-सिाधकानीति[13] भाष्यादौ। तन्विदं माध्यमिकादिभिर्नाभ्युपगम्यत इत्यसङ्गतमिदमिति[14] चेन्न, सर्वतन्त्रपदस्य वादिप्रतिवादिपरत्वेन नैयायिकवैशेषिकाद्योः [15]कथायामेतस्य[16] सर्वसिद्धत्वात्। एवञ्च प्रकृतकथानिरूपकशास्त्रसामान्यसिद्धोऽर्थस्तदभ्युपगमो वा सर्वतन्त्र-सिद्धान्त इति दिक्। कथाङ्गत्वेनोभयवाद्यभ्युपगमः स इत्यपि कश्चित् ॥ २६ ॥

---

6. ०पगमस्य B. 7. तु om. A, B, C. 8-9. निराकृतस्यैव B. 10. ०स्तन्त्रेऽविकृतो० E. 11-12. स इत्यर्थः C, F. 13. ०साधनानीति in all the MSS. 14. ङ्गतमिति B, C, E, F. 15-16. कथामात्रे तस्य C.

प्रतितन्त्रसिद्धान्तं लक्षयति—

समानतन्त्रसिद्धः परतन्त्रासिद्धः[17] प्रतितन्त्रसिद्धान्तः ॥ २७ ॥

समानशब्द इह एकार्थः, यथा 'वृक्षभूरुहशब्दौ समानार्थौ'वित्यत्र,[18] एवञ्च प्रकृतकथानिरूपकैकतन्त्रसिद्धस्तादृशापर[19]तन्त्रासिद्धोऽर्थस्तद[20]भ्युपगमो वा स इति सूत्रार्थः, यथा नैयायिकसांख्ययोः कथायां भौतिकानीन्द्रियाणीति [X]योगा[21]नामभौतिकानीति सांख्यानामिति वार्त्तिके[X]। योगानां[22] नैयायिकानाम्। उभयवाद्यन्यतराभ्युपगत-विषयकशास्त्रनिबद्धार्थाभ्युप[23]गमः स इति तु वर्द्धमानः ॥ २७ ॥

अधिकरणसिद्धान्तं लक्षयति—

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ २८ ॥

यस्य सर्वज्ञत्वादेर्विशेषस्य सिद्धौ जायमानायामेवान्यस्य[24] प्रक्रियमाणस्य सकर्त्तृकत्वादेः सिद्धिः स सर्वज्ञतादिर्विशेषोऽधिकरणसिद्धान्त इति निबन्धोक्तोऽर्थः[25]। एवञ्च पक्षधर्मताबललभ्यो[Y]ऽर्थस्तदभ्युपगमो वाऽधिकरणसिद्धान्तः, यथा 'क्षित्यादिकं सकर्तृकं कार्यत्वादि'त्यादिसिद्धं कर्तुः सर्वज्ञत्वादि, तदभ्युपगमो वा। प्रकृतानुमितिजनकीभूत[Y]व्यापकता-ज्ञानेन व्यापककोटावविषयीकृतो यो व्यापककोटौ प्रकृतानुमितिविषयी-भूतो[26] यश्च प्रकृतशाब्दधी[27]जनकपदार्थज्ञानेन [28]प्रकृतपदार्थेऽविषयी-कृतः[29] प्रकृतपदार्थे प्रकृतशाब्दधी[30]विषयीभूतोऽर्थः[31]सोऽधिकरण-सिद्धान्तः; न चैवमननुगमो दोषाय, शब्दानुगमस्याकिञ्चित्करत्वात्, अर्थस्य तु[32] सर्वथैवाननुगतत्वात्, अस्तु वाऽन्यतरत्वादिनाऽनुगम इति तु नव्याः ॥ २८ ॥

---

17. परतन्त्रासिद्धः om. E. 18. ०अत्र om. B. 19-20. ०तन्त्रसिद्धस्तद० E. X-X योगानां मते कति कानीति वार्त्तिकं E. 21. यौगा० B, C, F. 22. यौगा० B, C, F. 23. ०निबन्धाभ्युप० E. 24. ०मेवान्य E. 25. निबन्धकृतोऽर्थः A. Y-Y om. B. 26. ०विषयोऽर्थो C, E, F. 27. ०धी० om. C, E, F. 28-29. om. B. 30. ०धी० om. C,E,F. 31. ०विषयोऽर्थः C, E, F. 32. च C.

अभ्युपगमसिद्धान्तं लक्षयति—

अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ २९ ॥

असूत्रितार्थाभ्युपगमोऽभ्युपगमसिद्धान्त इति हृदयम्। नन्व[33]सूत्रितार्थाभ्युपगमः सूत्रकारस्य कथं ज्ञात इत्यत आह अपरीक्षितेति। असूत्रितस्यापि अर्थस्याभ्युपगमादेव तद्विशेषपरीक्षणं यतोऽतो ज्ञायतेऽसूत्रितमप्यभ्युपगतं सूत्रकारेणेति मिश्राः। [34]अपरीक्षितस्यासूत्रितस्याभ्युप[35]गमादभ्युपगमसिद्धान्तः, व्यवह्रियत इति[X] शेषः; तथा च तादृशाभ्युपगमोऽभ्युपगमसिद्धान्त इति[X] भावः, तत्र मानमाह—तद्विशेषपरीक्षणमिति, यत इति शेष इत्यन्ये। तद्विशेषपरीक्षणं परीक्षिततद्विशेष एव, एवञ्च तादृशाभ्युपगमाधीनपरीक्षणविशेषः[36] स इत्यपि वदन्ति; यथा नैयायिकानां मनस इन्द्रियत्वं तदभ्युपगमो वा। परे तु—उक्तत्रितयान्यसिद्धान्तः सः, तेन लौकिकार्थाभ्युपगमे नाव्याप्तिरित्याहुः ॥ २९ ॥

॥ समाप्तं न्यायाश्रयप्रकरणम् ॥

क्रमप्राप्तानवयवान् लक्षयति—

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः[1] ॥ ३० ॥

एतेन प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञात्वाद्यन्यतमवत्त्वं [2]ज्ञानविशेषविषयत्वं वा[3] लक्षणमभिहितम्, विभागोऽपि कृत इति ॥ ३० ॥

तत्र प्रथमोद्दिष्टां प्रतिज्ञां लक्षयति—

साध्यनिर्देशः प्रतिज्ञा ॥ ३१ ॥

साध्यनिर्देशः पक्षतावच्छेदकविशिष्टे पक्षे साध्यतावच्छेदकविशिष्टसाध्य-

---

33. न त्व० B. 33-35. अपरीक्षितस्याभ्युप० B, असूत्रिताभ्युप० E. X-X om. E. A case of haplography. 36. ०विषय B, C, E.

1. ०नान्यवाः E. 2-3. ज्ञानविपयत्वं वा B, ज्ञानविशेषवत्त्वं वा E.

वदभेदबोधकोऽवयवः, क्वचित् तादृशपक्षे तादृशसाध्यादिबोधकश्चावयवः। अत्रावयवत्वं 'धूमात्, यो यो धूमवान् सोऽग्निमान्, वह्निव्याप्य-धूमवानयम्, तस्माद् वह्निमानि'ति वाक्यचतुष्कपूर्वत्वम्, तादृश-बोधकत्वञ्च 'पर्वतो वह्निमानि'ति वाक्यत्वम् (? वाक्ये)। चैत्रे पाक[4]कृतौ साध्यायामवय[5]वत्वं 'चैत्रत्वादि'त्यादिवाक्यचतुष्कपूर्ववर्तित्वं तादृशि[6] तादृशसाध्य[7]बोधकत्वञ्च[8] 'चैत्रः पचती'त्यादिवाक्यत्वम्, एवमन्यत्राप्यूह्यम्[9]। न चाननुगमः, शब्दानुगमस्य प्रतिज्ञाशब्देनैव लाभाद्[10]किञ्चित्करत्वाच्च, अर्थानुगमस्य च त्वयाऽपि व्यवस्थापयितु-मशक्यत्वात्। साध्यनिर्देशः[11] साध्यवत्पक्षमात्रनिर्देशः[12], एवञ्च साध्याविषयकशाब्दधीजनकावृत्तिपक्षविशेष्यकशाब्दधीजनकत्वव्याप्या-वयवविभाजकोपाधिमत्त्वं प्रतिज्ञात्वम्, व्यतिरेक्युदाहरणो[13]पनययोः[14] साध्यविषयकधीजनक[15]त्वाच्चोदाहरणोपनययोरति[16]प्रसङ्गः; निगमन-त्वञ्च न पक्षविशेष्यकशाब्दधीजनकत्वनियतम्, 'तस्मात् पचती'त्यादौ तदभावादित्यपि वदन्ति ॥ ३१ ॥

हेत्ववयवं[17] लक्षयति—

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥ ३२ ॥

साध्यसाधनं साध्यान्वितस्वार्थ[18]बोधकावयवः, 'धूमादि'त्यवयवार्थः, धूमज्ञानज्ञाप्यत्वं हि 'पर्वतो वह्निमानि'ति प्रतिज्ञास्थ[19]वह्निपदार्थेऽ-न्वेति[20]। साध्यान्वितेत्यस्य च साध्यतावच्छेदकमात्रविशिष्टान्विते[21]-

---

4. चैत्रपाक० B. 5. साध्यावय० B. 6. तादृशे C. 7. तादृशत्वं साध्या० C, E. 8. च om. E. 9. ०त्राप्युक्तम् B. 10. भावांद० B. C, E, F. 11. साध्यनिर्देशः om. B. 12. च add. E. 13. ०उदाहरण० om. A, B. ०नयस्य A, B. 15-16. ०त्वाच्चोपनयेऽति० A, B, ०त्वाचोदाहरणोपनयोरति० C, ०त्वाच्चापनयेऽति० E. 17. ०वयवत्वं B. 18. साध्यान्वितस्वात्० C. 19. वाक्यस्थ E. 20. ०पदार्थेति B. 21. ०मात्रान्विते० B.

त्यर्थः। तेन यत्र पर्वते तादात्म्येन वह्निमान् साध्यते, प्रमेयत्वे वा प्रमेयत्वम्, तत्रोप[22]नयार्थान्वितस्वार्थबोधकनिगमने[23] नातिप्रसङ्गः। परे तु—×साध्यतेऽनेनेति[24]साध्यं ज्ञापकम्,[25] [? साध्यत इति साध्यं ज्ञाप्यम्] भावप्रधाननिर्देशे× साधनत्वं ज्ञापकम्, तथा च ज्ञाप्यत्वबोधकविभक्त्यन्तावयवत्वं हेतुत्वमिति[26] वदन्ति। स च हेतु[27]र्द्विविधः, अन्वयी व्यतिरेकी चेति हृदयम्। तत्रान्वयिनं लक्षयति—उदाहरणसाधर्म्यादिति। साधर्म्यं प्रकृतसाध्यहेत्वोर्नियत[28]सामानाधिकरण्यम्, तयोरन्वयव्याप्तिरिति यावत्। उदाहरणसाधर्म्यं साधर्म्यबोधकमुदाहरणम्, [29]अर्धपिप्पल्यादिवत्समासः[30], पञ्चमी च पूर्वदिग्लक्षणा[31], तथा च प्रकृतसाध्य[32]हेत्वन्वयव्याप्ति[33]बोधकप्रकृतोदाहरणपूर्ववर्तिसाध्यसाधनमन्वयी हेतु[34]रिति भावः। परे तु साध्यसाधनमिति यतो हेतोरित्यादिः, स इति च[35] शेषः[36], हेतुरित्यस्यान्वयी हेतुरित्यर्थः; एवञ्च यतो हेतोः उदाहरणजन्यान्वयव्याप्तिज्ञानाधीनाऽनुमितिः सोऽन्वयी हेतुरित्यर्थः, एवमुत्तरसूत्रं[37]व्याख्येयमिति वदन्ति ॥ ३२ ॥

व्यतिरेकिहेतुं लक्षयति—

तथा वैधर्म्यात् ॥ ३३ ॥

साध्यसाधनमित्यनुषज्यते, व्यतिरेकिहेतुरिति शेषः। तथा [38]वैधर्म्यमुदाहरणवैधर्म्यं वैधर्म्यज्ञापकोदाहरणम्, पञ्चमी च पूर्ववत्, वैधर्म्यं प्रकृतहेतौ प्रकृतसाध्याभावव्यापकाभावप्रतियोगित्वम्[40], एवञ्च प्रकृत-

---

22. तत्राद्ये उप० C, E. 23. ०नियमे B. X-X om. B. 24. साध्यतेऽनेनेति om. A. 25. ज्ञायते A. 26. भाव इति add. E. 27. ०हेतुः om. E. 28. ०हेत्वोर्निश्चितत० C, E, 29-30 om. C, E, F. cf. Pāṇini 2.2.31. 31. पूर्वादिग्० B, cf. Pāṇini 2.3.29 32-33. ०हेत्वत्वयत्प्राप्ति० C. 34. हेतुः om. B. 35. च om. A, B. 36. शेषः om. E. 37. ०मुत्तरत्वं सूत्रं B, ०मुत्तरसूत्रीयं C. 38-39. om. E. 40. प्रकृतेहेतोः add. C.

साध्यहेतुव्यतिरेकव्याप्तिबोधकप्रकृतोदाहरणपूर्ववर्तिसाध्यसाधनं व्यतिरेकिहेतुरिति भावः ॥ ३३ ॥

उदाहरणं लक्षयति—

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ ३४ ॥

अत्र दृष्टान्त इति सामान्यलक्षणनिर्देशः, दृष्टान्तवचनमिति तु[41] तदर्थ इति भाष्यादि, इतरथा महानसादेर्दृष्टान्तत्वेनासम्भवापत्तेः। दृष्टान्तबोधकावयव [42]उदाहरणमिति फलितार्थ[43]स्तेनोदासीने नातिप्रसङ्गः। नन्वत्र[44] दृष्टान्तपदं महा[45]नसादिपरं साध्यसाधनोभयवत्तयागृहीतधर्मि[46]परं वा; नाद्यः, महा[47]नसादिपक्षकोदाहरणाव्याप्तेस्तत्पक्षक[48]-प्रतिज्ञाद्यतिव्याप्तेश्च[49]; नेतरः, सर्वस्यैव [50]तथाभूतत्वात्[51]; कथञ्चित्[52] कुसृष्ट्यादरे[53]तु व्यतिरेक्युदाहरणाव्याप्ति;'महानससधर्मा पर्वतो वह्निमानि'ति प्रतिज्ञाया[54]मतिव्याप्तिश्च;[55] एतेन दृष्टान्तपदं प्रकृतानुमितिहेतुव्याप्तिग्रहप्रयोजकसहचारग्रह[56] प्रयोजकसहचारग्रह[57]विषयीभूतधर्मिपरमित्यपि प्रत्युक्तम्। मैवम्, दृष्टान्तपदं[58] महानसपरमेव, अवयवत्वञ्च 'पर्वतो वह्निमान्, धूमात्, यो यो धूमवान् सोऽग्निमान् यथा महानसम्, वह्निव्याप्यधूमवानयम्, तस्माद् वह्निमानि'ति न्यायस्यावयव[59]परम्, एवञ्च महानसत्वविशिष्टबोधकेत[60]न्न्यायावयव[61]-विभाजकोपाधिमत्त्वमुदाहरणत्वमिति किमनुपपन्नम्? एतेन दृष्टान्तस्य समयबन्धाधीनतयाऽसार्वत्रिकत्वादव्याप्तिरित्यपि परास्तम्। तच्च द्विविधमन्वयव्यतिरेकिभेदादिति हृदयम्। [62]तत्रान्वय्युदाहरणं[63] लक्षयति—

---

41. तु om. A, B. 42-43. इति तु तदर्थं० E. 44. ०अत्र om. B, C, E. 45. माहा० E. 46. ०धर्मं० C, E. 47. माहा० E. 48-49. ०प्रतिज्ञाद्युत्पत्तेः B. 50-51. तथा गृहीतत्वात् A, B. 52. कथञ्चित् om. C, E. 53. ०ष्ट्यादेवे A, B. 54-55. ०मव्याप्तिश्च E. 56-57. om. C, E. 58. After this, E has within brackets प्रकृतानुमितिव्याप्तिग्रह. 59. न्यायावयव० C. E. 60-61. ०तद्व्याप्ययोव - - - वयव०E. The horizontal strokes stand for missing letters. 62-63. तत्रोदाहरणं E.

साध्य[64]साधर्म्यात्तद्धर्मभावीति। अत्र दृष्टान्ते[65] उदाहरणमित्यस्यानुषङ्गः, तत्रोदाहरणमित्यस्यान्वय्युदाहरणमित्यर्थः, तेन लक्ष्यनिर्देशः कृतः; दृष्टान्त इत्यन्तश्च लक्षणपरम्; साध्यं पक्षस्तत्साधर्म्यं च[66]हेतुस्तस्मात्; तत् साध्यं धर्मो यस्य स तद्धर्मा पक्षः, तस्य भावो धर्मः साध्यम्, सोऽस्या[67]स्तीति तद्धर्मभावी; पञ्चम्यर्थो व्यापकत्वमिति मिश्राः। तेन हेतुव्यापकसाध्यवानर्थः, इदञ्च स्ववचनमुपलक्षयतीति मिश्राः। तस्य पक्षस्य धर्मस्तद्धर्मः साध्यम्, तद्[68]भावयति प्रतिपादयतीति तद्धर्मभावीति[69] परे। मतुवर्थो ज्ञापकत्वमिति वस्तुगतिः; तेन प्रकृतहेतुव्यापकसाध्यवत्त्वेन किञ्चित्प्रतिपादकदृष्टान्तोऽन्वय्युदाहरणम्, दृष्टान्तपदार्थस्तु व्याख्यात एव। साध्येन हेतोः साधर्म्यमन्वयव्याप्तिः, ज्ञापकत्वं पञ्चम्यर्थः, तत्पदं प्रक्रम्यमाणदृष्टान्तपरम्, तस्य धर्म उदाहरणत्वम्, स एव भावस्तद्वान उदाहरणमित्यर्थः, एवञ्च दृष्टान्तपदस्य [70]नानुषङ्गः; तथा च प्रकृतसाध्यकप्रकृतहेतुकान्वयव्याप्तिप्रतिपादकोदाहरणत्वमिति [71]भाव इत्यपि[72] वदन्ति। अन्वय्युदाहरणे[73] पुनरेवमाकारः—यो यो धूमवान् सोऽग्निमानित्यादि॥ ३४॥

व्यतिरेक्युदाहरणं लक्षयति—

तद्विपर्ययाद्वा विपरीतम्॥ ३५॥

[74]दृष्टान्त उदाहरण[75]मित्यनुषज्यते। विपरीतमुदाहरणं व्यतिरेक्युदाहरणमिति लक्ष्यनिर्देशः। तद्विपर्ययो व्यतिरेकव्याप्तिः, पञ्चम्यर्थो ज्ञापकत्वम्, तथा च प्रकृतहेतुकप्रकृतसाध्यकव्यतिरेकव्याप्ति[X] प्रतिपादकदृष्टान्तो[76] व्यतिरेक्युदाहरणमिति[X] पर्यवसितार्थः[77]; यथा 'यो[78] यो

64. साध्य० om. B, 65. दृष्टान्त A, B. 66. च om. A, B. 67. सो यस्या० C. 68. तद् om. A, तं B, C. 69. ०भावीतित्य० C. 70. न om. A. 71-72. om. B. 73. ०हरणं C. 74-75. दृष्टान्तमुदाहरणं० C. X-X ०प्रतिपादकमुदाहरणमिति C. 76. ०दको दृष्टान्तः E. 77. ०सितोऽर्थः E. 78. यो om. E.

वह्न्यभाववान् स धूमाभाववान्' इति न्यायान्तर्गतवाक्यम् । भाष्यादिकृतस्तु—दृष्टान्त उदाहरणमिति प्रकृतम्, तत्रोदाहरणपदं व्यतिरेक्युदाहरणपरम्, तेन लक्ष्यनिर्देशः; इतरल्लक्षणपरम्, तत्पदं पक्ष[79]परम्, विपर्ययो वैधर्म्यम्, विपरीतं तद्धर्मभाविविपरीतमतद्धर्मभावीत्यर्थः, पक्षवैधर्म्यञ्च साध्याभावः; अतद्धर्मभावस्तद्धर्माभावः[80]; (तद्धर्मो) हेतु[81]स्तद्धर्मस्य हेतोरभाव[82]स्तदभावः, [Y]तद्वान् तत्प्रतिपादकोऽतद्धर्मभावी[Y][83], पञ्चम्यर्थो व्यापकत्वम्, एवञ्च प्रकृतसाध्याभावव्यापक[84]हेत्वभावत्वेन किञ्चित्प्रतिपादको दृष्टान्तो व्यतिरेक्युदाहरणमिति पर्यवसितार्थ इति वदन्ति ॥ ३५ ॥

उपनयं लक्षयति—

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३६ ॥

अत्रोदाहरणापेक्ष उपसंहार इति सामान्यलक्षणम्, उदाहरणाव्यवहितोत्तरवर्ती तन्न्यायावयव[85]इति तदर्थः[86], न्यायत्वञ्च प्रकृतप्रतिज्ञादिपञ्चकसमुदायत्वम्, प्रतिज्ञात्वादिकन्तु वाक्यविशेषपरिचायकम्, न तु लक्षणप्रविष्टमिति । स च द्विविधोऽन्वयव्यतिरेकिभेदादिति[87] हृदयम् । तत्रान्वय्युपनयं लक्षयति—तथेत्युपसंहारः साध्यस्येति । अत्रोदाहरणापेक्ष उपनय इत्यनुषज्यते । उपनय इत्यस्यान्वय्युपनय इत्यर्थः, तेन लक्ष्यनिर्देशः कृतः । साध्यस्य पक्षस्य तथा साध्यव्याप्यहेतुमत्त्वेन[88] उपसंहारः, उपसंह्रियते[89]ऽनेनेति व्युत्पत्त्या[90] उपसंहारः[91] प्रतिपत्तिजनकः, एवञ्च पक्षे तथा प्रतिपत्तिजनक उपनयोऽन्वय्युपनयः । व्यतिरेक्युपनयं[92]

---

79. साध्यo B, C, E. 80. oभावे E. 81-82, om. B, C, E. Y-Y. om. A, B. 83. च add. C, E. 84. oव्यापक om. A, F. 85-86. इत्यर्थः E. 87. भेदादि B. 89. oसंह्रियते A, B 90. व्युत्पत्त्या om. C, E. 91. उपसंहार om. A, B. 92. A lacuna in C starts here.

लक्षयति—न तथेति। तथेत्युपसंहारो [93]न य[94] उपनयः स [95]व्यतिरेक्युपनयः,[96] पक्षे साध्यव्याप्यहेतुमत्त्वाप्रतिपादक उपनयो व्यतिरेक्युपनय इति पर्यवसितार्थः। परे तु—तथापदं साध्याभावव्यापकहेत्वभावपरम्, तथा च तादृशहेत्वभावाभाव[97]वत्ताप्रतिपादकोपनयो व्यतिरेक्युपनय[98] इत्याहुः। 'वह्निव्याप्यधूमवानयमि'त्यन्वय्युपनयाकारः, 'वह्न्यभावव्यापकाभावप्रतियोगिधूमवानयमि'ति 'वह्न्यभावव्यापक[99] धूमाभावाभाव[100]वानयमि'ति वा[101] व्यतिरेक्युपनयाकार इति वदन्ति। आचार्यास्तु—'तथा चायमि'त्यन्वय्युपनयाकारः, 'न तथा[X] चायमि'ति व्यतिरेक्युपनयाकार इत्याहुः। एवञ्च सूत्रेऽपि तथेत्युपसंहार इत्यस्य 'तथा[X] चायमि'त्यवयव इत्यर्थः, न तथेत्युपसंहार इत्यस्य 'न तथा चायमि'त्यवयव[102] इत्यर्थ इत्यवधेयम् ॥ ३६ ॥

निगमनं लक्षयति—

हेत्वपदेशात्[103]प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ ३७ ॥

निगमनं पुनरित्यन्वयः। प्रतिज्ञायाः[104] प्रतिज्ञार्थस्य साध्यस्य, हेतुर्व्याप्यपक्षधर्मः व्याप्यवत्पक्षधर्मो[105] वा, तदपदेशः तज्ज्ञानज्ञाप्यत्वम्; तेन साध्यस्य वचनं साध्यव्याप्यहेतुमत्पक्षज्ञानज्ञाप्यत्वविशिष्टसाध्यज्ञापकावयव इत्यर्थः, यथा—'तस्माद्वह्निमानि'ति[106]। अत्र हि 'तत्'-पदं वह्निव्याप्यधूमवत्पर्वतपरम्, ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः, स च वह्नावन्वेति[107]। 'तस्मात्तथे'ति निगमनाकार इत्याचार्याः, तत्र 'तथे'-त्यस्य साध्यवानित्यर्थः। अत्र 'पर्वतो वह्निमान्, धूमात्, यो यो धूमवान् सोऽग्निमान्[108], वह्निव्याप्यधूमवानयम्, तस्मात्तथे'ति क्रमिक-

---

93-94. om. B. 95-96 om. B. 97. ०अभाव० om. B. 98. The lacuna in C ends here. 99-100. धूमाभाव० B. 101. वा om. A, B. X-X. om. C. A case of haplography. 102. ०मित्यर्थयव C. 103. हेतूपदेशात् B. 104. ०ज्ञायां C. 105. ०वत्पक्षो A, ०वत्पक्षो धर्मो C. 106. ०वह्निमानयमिति C. 107. पर्वतस्तस्माद्वह्निमानिति न प्रतिज्ञा add. C. 108. A lacuna in B starts here.

वाक्यं न्यायः, एतद्वाक्यान्तर्गतं 'पर्वतो वह्निमानि'ति वाक्यं प्रतिज्ञा, 'धूमादि'ति हेतुः, 'यो यो धूमवान् सोऽग्निमानि'ति उदाहरणम्, 'वह्नि-व्याप्यधूमवानयमि'त्युपनयः, 'तस्माद् वह्निमानि'ति निगमनम्। अवयवपदार्थतावच्छेदकन्तु प्रतिज्ञात्वादिकमेव, अस्तु वा तावदन्यतमत्व-मेमावयवत्वम्, एवमन्यत्रापि न्यायत्वप्रतिज्ञात्वादीनि निर्वक्तव्यानि, अस्तु वा तत्तत्[109]तावदन्यतमत्वमेव न्यायत्वप्रतिज्ञात्वादीति रहस्यम्।

अथानुमित्युपयुक्तपरामर्शोपयोगित्वादुपनय एव परं प्रत्युद्भाव्यो न तु प्रतिज्ञादिरपि, प्रकृतानुपयोगात्, प्रत्युत प्रकृतानुपयुक्ताभिधानेऽर्थान्तरेण निग्रहापत्तेः, यथाकथाञ्चिदुपयोगिनोऽभिधानेऽतिप्रसङ्गात्[110]; किञ्चो-पनय एवोद्भाव्य इत्यत्रापि न[111] नियमः, कदाचिद् 'वह्निनियतधूमवान् पर्वतः' 'धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्वत' इत्याद्युद्भावनेऽपि प्रकृतनिर्वाहात्।

अत्र ब्रूमः—सकलनैयायिककथकसम्प्रदायसिद्धोऽयमर्थः नानुद्भाव-नमर्हति, तदनुद्भावने न्यूनत्वेनापसिद्धान्तेन च निग्रहापत्तेः, बौद्धानामु-दाहरणोपनयरूपद्वयव[112]यववत्, तत्र[113] 'न्यायसिद्धान्तविरुद्ध-सिद्धान्तिनां बौद्धानामवयवा न प्रयोक्तव्या' इति समयबन्धवताञ्च पञ्चावयवप्रयोगेऽपि न निग्रह इति सर्वसम्मतः पन्थाः ॥ ३७ ॥

॥ समाप्तं[114] न्यायस्वरूप[115]प्रकरणम् ॥

क्रमप्राप्तं तर्कं लक्षयति—

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्त[1]त्त्वज्ञानार्थमूहस्तर्कः ॥ ३८ ॥

तर्क इति लक्ष्यनिर्देशः, ऊह इति लक्षणपरम्। तेनोहत्वं लक्षणमुक्तम्, ऊहत्वञ्च[2] 'अहमेवमूहे' इति प्रतीतिसाक्षिको मानसत्वव्याप्यो जाति-

---

109. तत्तत्° om. E. 110. ०प्रसङ्ग: C, E. 111. न add. A. 112. रूप-त्वाव० C, 113. अतएव A, C, F. 114. च add. E. 115. न्यायरूप० E.

1. ०पत्तिस्त० A. 2. ऊहञ्च C. X-X. om. E.

विशेषः । ×केचित्तु—तर्कत्वं न जातिर्मानाभावात्, न च 'तर्कयामी'ति प्रत्यय एव मानम्, तस्यो[3]भयसिद्धोपाधिविशेषविषयत्वेनैवोपपत्तेः× स च[4] पक्षे आपादकधर्मवत्त्वांशे आहार्यव्याप्यवत्तानिश्चयजन्यत्वम्,[5]; भवति च 'पर्वतो निर्धूमः स्यादि'त्यापत्तिं प्रति 'पर्वतो निर्धूमत्वव्याप्य[6]निर्वह्नित्ववानि'त्या[7]हार्यारोपः[8] कारणम्, बाधबुद्धिसहकृतव्याप्यवत्तानिश्चयजन्य[9]ज्ञानत्वं वा; भवति[10] हि[11] तादृशापत्तिं प्रति 'पर्वतो धूमवानि'त्याकारः पक्षे आपाद्याभावनिश्चयो बीजम्, न च तादृशव्याप्यवत्ता[12]निश्चयानुव्यवसायादावतिप्रसङ्गः, जन्यताविशेषस्यैव निवेशात्, विवक्ष्यतां वा[13] विषयताद्यति[14]रिक्तरूपेण हेतुत्वमित्याहुः। तन्न, अननुसंहितोपाधेरपि 'वह्निरिहापादित'[15] इत्यनुभवात्, अन्तरेण च जातिविशेषं जन्यतावच्छेदकाग्रहे जन्यताया अग्रहात्[16], व्याप्त्यादेरापाद्यापादकभेदेन नानात्वात् सकलसाधारणानुगतमत्यनापत्तेश्च। एतेन—तद्व्यक्तित्वमेव जन्यतावच्छेदकम्, तत्परिचायकमेवोक्तं रूपम्, न तु 'तर्कयामी'ति प्रत्ययविषय इति न कोऽपि[17] दोषः; अथ तद्व्यक्तित्वमतिरिक्तं वा विषयस्वरूपं वा तद्व्यक्तिस्व[18]रूपं वा, नाद्यः, अनन्ततत्कल्पनापेक्षया एकस्या जातेः कल्पनाया एव लघुत्वात्, न द्वितीयोऽतिप्रसक्तत्वात्, न[19] तृतीयोऽपि[20]: धर्मिधर्मभावानुपपत्तेरिति चेन्न, प्रमेयत्वे प्रमेयत्वस्येव [21]स्वस्मिन्नपि स्वस्य[22] सत्त्वाभ्युपगमादिति निरस्तम्। किञ्चैव'म[23]नुमिनोमी'त्यादेरप्युपपत्तावनुमितित्वादिकमपि

3. तादृशप्रतीतेः—marginal note in A, 4. उपाधिविशेषश्च—marginal note in A. 5. न जातिर्मानाभावात् add. C. 6-7. ०निर्वह्नित्ववह्नित्या० C. 8. The lacuna in B ends here. 9. ०जन्म० B. 10. भवन्ति C. 11. च E. 12. व्याप्यवत्ता० om. E. 13. ०क्षतार्या E. 14. विषयाद्यति० B. 15. वह्निविरहा० A. 16. च add. A, B, C, E. 17. नाद्योऽपि A,B, नाद्योऽपि न C. 18. ०स्व० om. A, B. 19. न om. A. 20. अपि om. A, E. 21-22. om. B. 23. किञ्चैवक्रमेणैवा० A, किञ्चैवम०

जातिर्न स्वीक्रियेत, विलुप्यताश्च जातिमात्रेण, 'अयं घट' इत्यादिप्रत्यय-स्याप्युक्तरीत्योपपत्तेः, Y[25]निखिलव्यक्ति[26]वृत्तित्वानुभवश्च न [27]प्रकृतेऽपि पाणिपिहितः[28]Y। अथ माऽस्तु जातिमात्रम्, अनुगतप्रत्ययस्तु भ्रम एवेति पाषण्डाः ; तन्न, एवमनुभवापलापे घटादेर्बाह्य‡मात्रस्यापलापापत्तेः, अनुभवसिद्धं घटादीति चेन्न, तेषां[29] स्वविषयत्वेनैवो[30]पपत्तेः, 'अयं घट अयं पट' इत्यादिप्रतीतीनां विषयकृतभेदश्च स्वस्वरूपादेवेति योगाचारा एव विजयेरन् ; न च बाह्यानुभवानादरे विज्ञानानुभवोऽपि पदमादधाति तुल्यन्यायत्वादिति शून्यवादिनो[31] मतमेव मतं स्यात्। तस्मादनुभव-विरुद्धं योगाचारदिगम्बरप्रभृतिपाषण्डवचो न सचेतसां चेतसि पदमर्पय-तीति वक्तव्यमायुष्मता, अनुभवश्च तर्कत्वेऽपि तुल्य इति दिक्।

आपत्तेः प्रयोजनमाह—अविज्ञाततत्त्व इति। तद्वत्तयाऽनिर्णीते धर्मिणि तत्त्वज्ञानार्थं तद्वत्त्वनिर्णयार्थम्। एवं निर्णयमापत्तिः साक्षाद्-जनयति परम्परया वा, तत्र परम्परयेत्याह—कारणोपपत्तित इति। कारण-सम्पादनद्वारेत्यर्थः। तथा हि—धूमेन वह्न्यनुमितौ धूमे वह्निव्याप्ति-निश्चयो हेतुः, तत्र व्यभिचारधीः प्रतिबन्धिका, व्यभिचारशङ्काविरहश्च व्यभिचारशङ्काप्रतिबन्धकात्तर्कादपीति तर्कस्योपयोगः। तथा हि—'धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादि'ति प्रयोगेण व्याप्तिग्रहे सति[32] 'वह्निजन्यत्वा[33]भावव्याप्यवह्निव्यभिचारित्ववानयं[34]धूम' इति विशिष्टज्ञानाद् 'वह्निजन्यश्चायमि'ति बाधसहकृताद् 'वह्निजन्यो न स्याद्धूम' इत्यापत्तिरुत्पन्ना[35]'धूमो वह्निव्यभिचारी न वे'ति शङ्कां

C, E. 24. जातिः om. C, E. Y-Y. om. B. 25-26. न व्यक्तिo A, - - -ल व्यक्ति E, where horizontal strokes stand for missing letters. 27-28. प्रकृतोपपानेपि हेतुः A, प्रकृते पाणिo E. † वस्तु E. ‡ घटादेर्वस्तुo E. 29. अपि add. C. E. 30. तद्वदेवोo E. 31. दिगम्बरस्य add. A, C, E. 32. सति om. C, E. 33. तद्विजन्यत्वाo B, वह्निव्याप्यत्वाo C, E. 34. अयं om. B. 35. oपत्तिवत्परा E.

प्रतिबध्नाति, आपादकव्यतिरेकशङ्कानिवर्तकत्वादापत्तेः। अथ 'निर्वह्निः स्यान्निर्धूमः स्यादि'ति तर्कस्य कुत्रोपयोग इति चेत्, पक्षीयसाध्यसन्देह[36]निबन्धनव्यभिचारशङ्काप्रतिबन्ध इति भ्रमः। यत्तु—'वह्निमानि' त्यनुमितिं प्रति तथा तर्कः कारणमिति, तन्न, मानाभावात्।

स च तर्कः आत्माश्रयान्योऽन्याश्रयचक्रकानवस्थाप्रमाणबाधितप्रसङ्गभेदेन पञ्चविध इत्याचार्याः। स्वस्य[37] स्वापेक्षायामनिष्ट[38]प्रसङ्ग आत्माश्रयः, स्वापेक्षापादकाधीन[39]प्रसङ्गः स इति यावत्। अपेक्षा च ज्ञप्ता[40]वुत्पत्तौ स्थितौ च, तत्राद्यायां[41] यथा—एतद्घटज्ञानं यदि एतत्घटज्ञानजन्यं स्यादेतद्घटज्ञानभिन्नं स्यादिति, द्वितीयायां[42] यदि घटोऽयमेतद्घटजन्यः स्याद् ×घटान्यः स्यादि×ति, अन्त्यायान्तु अयं घटः यद्येतद्घटवृत्तिः स्यात्तथोपलभ्येतेति। अन्योऽन्याश्रयस्तु तदपेक्षापेक्षितत्वनिबन्धनः प्रसङ्गः। यथा—[43]अयं घटः[44] यद्येतद्घटजन्यजन्यः स्यादेतद्घटभिन्नः स्यादिति, एवं ज्ञप्तौ स्थितौ च बोध्यम्। तदपेक्षणीयापेक्षणीयापेक्षितत्व[45]प्रसङ्गश्चक्रकम्, अपेक्षणीयत्वञ्च साक्षात्परम्परासाधारणमिति नाधिक्यम्, पूर्ववदुदाहरणीयम्[46]। अनवस्था तु अप्रामाणिकानन्तप्रवाहमूलकप्रसङ्गः, यथा—घटत्वं यदि यावद्घटजनकवृत्ति स्याद् घटाजन्यवृत्ति न स्यात्, घटत्वं यदि यावद्घटवृत्ति[47]वृत्ति स्याद् घटावृत्तिवृत्ति न स्यादित्यादि। यावत्यो अनवस्थाः सम्प्रदायसिद्धास्तावदन्यतमत्वमनवस्थात्वमित्यपि वदन्ति। एतच्चतुष्टयान्यः प्रसङ्गः प्रमाणबाधितार्थप्रसङ्गः। एकदेशिनस्तु—आपत्तिर्न साक्षात्कारो मानाभावात्, न चैवं प्रमारूपापत्तेः करणं[48]मानान्तरं स्यात् [इति वाच्यम्,]

---

36. ०साध्यसम्बन्ध० E. 37. स्वस्य om. B. 38. स्वापेक्षया अनिष्ट० B. 39. स्वापेक्षापादकः C, स्वापेक्षयापादकाधीनः E. 40. क्षमा० C. 41. तत्राद्या C. 42. द्वितीये तु C. X-X. घटान्यः स्यात् om. B. 43-44. अघटः B. 45. पेक्षणायापेक्षिततत्व० B. ०पेक्षणीयापेक्षित्व० C, E. 46. ०णीयत्वम् C: 47. ०वृत्ति० om. B. 48. कारणं B.

इष्टापत्तेः। यत्तु—आपत्तिः क्वचिदप्रि[49]प्रमैव नेति[50], तन्न, ह्रदो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादौ तत्साम्राज्यादित्याहुः ॥ ३८ ॥

क्रमप्राप्तं निर्णयं लक्षयति—

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ३९ ॥

अर्थावधारणं निर्णयः[51], तद्धर्मिकं तदभावाप्रकारकं तत्प्रकारकं[52]ज्ञानं निर्णय[53]इति यावत्[54]। स च जल्पवितण्डयोः संशयोत्तरं स्वपक्षस्थापनपरपक्षनिराकरणेनैव[55] भवतीति[56] बोधनाय विमृश्येति। विमर्शः संशयः, पक्षः स्वपक्षदूषणनिराकरणम्, प्रतिपक्षः परमते दूषणोद्भावनमिति[57]। पक्षप्रतिपक्षाभ्यां तत्तदभावसहचरितधर्माभ्यां विमृश्येत्यर्थ इति तु सारम्। संशयजन्यानुमितित्वं निर्णयत्वमिति तु वर्द्धमानः ॥३९॥

॥ समाप्तं न्यायोत्तराङ्ग[58]प्रकरणम् ॥

॥ इति न्यायरहस्ये प्रथमाध्यायस्याद्य[59]माह्निकम् ॥

49-50. प्रमैवेति E. 51. निर्णय om. A. F. 52. तत्प्रकारकं om. A,F. 53-54. इति यावत् om. A, F. 55. ०करणे नैव B. 56. इति om. B. 57 इति om. B. 58. न्यायोत्तरं E. 59. प्रथमाध्यायस्य प्रथ० E.

प्रथमाध्यायस्य द्वितीयाह्निकम्

एवं सप्तभिः[1] प्रकरणैः[2] प्रथमाह्निकं समाप्य प्रवर्तनविवेचनो[3]पालम्भपरपदार्थ[4]लक्षणाय द्वितीयाह्निकारम्भः। तत्र च[5] चत्वारि प्रकरणानि। तत्र क्रमप्राप्तं वादं लक्षयति—

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः[6] पञ्चावयवोपपन्नः[7] पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ ॥

तद्धर्मिणि तद्धर्मवत्तानुमिति[8]तात्पर्यकवाक्यकदम्बसहितस्तद[9]भाववत्तानुमितितात्पर्यकवाक्यकदम्बः पक्षप्रतिपक्षपरिग्रहः, [10]पक्षप्रतिपक्षौ तत्तदभावौ परिगृह्यतेऽत्रे[11]ति[12]यथाकथञ्चिद् व्युत्पत्त्या[13]तल्लाभात्[14], परमते दूषणाभिधानमपि स्वीयानुमितितात्पर्यकमेवेति न तदसंग्रह इति सम्प्रदायः। नव्यास्तु—पक्षप्रतिपक्ष[15]परिग्रह इत्यस्य कथेत्यर्थः; न च कथात्वं वादजल्पवितण्डाऽन्यतमत्वमित्यात्माश्रयः, न हि तत्र वादत्वादिकं[16] प्रविष्टं किन्तु यावन्तो वादादयस्तावद्व्यक्त्यन्यतमत्वम्। कथात्वं जातिविशेषः, स च पूर्व[17] पूर्ववर्णसंस्कारसहितेन चरमवर्णेन ग्राह्य[18] इति तु वर्द्धमानः। शब्दत्वव्याप्यजातिविशेष एव परम्परासम्बन्धेन कथात्वमित्यपि वदन्ति।

नन्विदं जल्पेऽतिप्रसक्तमित्यत आह—प्रमाणेति। प्रमाणतर्काभ्यामेव साधनोपालम्भौ यत्र स तथा, उपालम्भः प्रतिषेधः, प्रमाणतर्कपदं प्रमाणत्वतर्कत्वा[19]भ्यामनाहार्यज्ञानविषयपरम्; जल्पे तु परनिग्रहार्थमप्रमाणत्वादिना ज्ञातस्याप्युद्भावनात्, वादे च परनिग्रहो नोद्देश्यः किन्तु

---

1. सप्ततिः A. 2. प्रकरणः B. 3. ०पलम्भ० E. 4. ०परमार्थ B. 5. च om. A B. 6. सिद्धान्तविरुद्धः E. 7. ०वोपलम्भः B. 8. ०धर्मानुमिति० C, E. 9. ०सहिततत्तद० C, E. 10. स्मरति च add. E. 11. अत्र om. E. 12. पक्षप्रतिपक्षपरिग्रह add. C, E. 13. ०पत्ति C, E. 14. तल्लाभात् om. C, E. 15. पक्षे प्रतिपक्ष० C. 16. ०त्वादि A, F. 17. पूर्व om. C. E. 18. न गृह्यते C. 19. प्रमाणतर्कत्व० A,

तत्त्वनिर्णय इत्य[20]प्रमाणत्वादिना ज्ञातस्य[21]नोपन्यासः। [X]अथ तथापि यत्र जल्पे न तथोपन्यासस्तत्रातिव्याप्तिः, किञ्च यत्राप्रमाणत्वेन ज्ञातस्यापि जाति[22]साङ्कर्य[23]बाधकादेः सिद्धान्तानुरोधेनोपन्यासस्तत्राव्याप्तिः; यत्तु—प्रमाणतर्काभ्यामेवेत्येवकारे[24]णापसिद्धान्तादिभिन्ननिग्रहस्थानच्छल-जातिव्युदासः,[X] तेन तादृशनिग्रहस्थानादिसाधनोपालम्भकान्यत्वमर्थ[25] इति न जल्पातिव्याप्तिः, तत्र छलादिनोपालम्भादिति, तन्न, तथापि यत्र छलादिना न निग्रहस्तत्र जल्पेऽतिव्याप्तेरिति[26]। उच्यते[27]—प्रमाणे-त्यादेरुक्तरीत्या छलोपा[28]लम्भस्वरूपयोग्यान्यत्वमर्थः, तत्स्वरूपयोग्यता च जल्पत्वादिना। जल्पत्वञ्च यावन्तो जल्पास्तावदन्यतमत्वमिति नानुपपत्तिः। यद्वा—प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्ष [28]इत्यनेन यः[29] कश्चिद्वाद उक्तः, तेन तद्वृत्तिकथाविभाजकोपाधिमत्त्वमर्थः पर्यवस्यति, कथाविभाजकोपाधित्वञ्च वादत्वाद्यन्य[30]तमत्वम्, वादत्वा[31]दिकञ्च[32] उक्तजल्पत्ववन्निर्वचनीयमिति[33]। [34]तत्त्वनिर्णिनीषाजन्या[35] कथा वाद इत्यपि वदन्ति।

वादे यानि निग्रहस्थानानि समुद्भाव्यानि तान्याह—सिद्धान्ताविरुद्ध इति। तेनाप[36]सिद्धान्तो वादे उद्भाव्य इति ध्वनितम्। न त्विदं वादत्वघटकम्[37], यत्र सिद्धान्तविरोधेन वादपर्यवसानं तत्र[38] वादत्वा-भावप्रसङ्गात्। पञ्चावयवोपपन्न इति। तेन न्यूनत्वं वादे दोष इत्युक्तम्। न तु पञ्चावयवोपपन्नत्वं वादलक्षणनिविष्टम्, अवयवप्रयोगं विनाऽपि

प्रमाणतर्का० B. 20. सत्य० B. 21. ज्ञानस्य E. X-X. om. B. 22. जाति० om. E. 23. ०साङ्कर्यस्य E. 24. ०त्येवाकारे० E. 25. ०कान्यतमत्वमर्थं A. 26. व्याप्तिरिति A, F. 27. द्रव्यात् E. 28. नोपा० B. 28-29. इत्यनेनान्वयः A. 30. वादत्वान्य० B. 31. वादकत्वा० F. 32. ०दिक B. 33. ०नीयति B. 34-35. तत्त्वनिर्णीयाजन्या A, तत्त्वनिर्णयाजन्या B, तत्त्वनिर्णीयोः जल्पा E. 36. तेनातका० A. 37. वाददुर्घटकं C, वादत्वघटितं E. 38. तस्य C.

वादनिष्पत्तेर्भाष्यादावभिहितत्वात्। आचार्याः पुनरेवं वदन्ति—इह वादे चतुर्धा निग्रहस्थानगतिः। किञ्चिदसम्भावनीयमेव, यथा हानिः सन्न्यासो निरर्थकमर्थान्तरमविज्ञाता[39]र्थकमपार्थकमिति[40] षट्कम्, एषामशक्तिसमूहन[41]प्रकारत्वात्, तत्त्वबुभुत्सुतया च वादे तदभावात्। किञ्चित् सम्भवदप्यनुद्भाव्यमेव, यथा प्रतिज्ञान्तरं हेत्वन्तरमज्ञानम[42]-प्रतिभा विक्षेपो[43] मता[44]नुज्ञा पर्यनुयोज्योपेक्षण[45]मिति सप्त, एतेषा-मुद्भावनस्य तत्त्व[46]प्रतिपत्तावनुपयोगात्। किञ्चिदुद्भाव्यमात्रम्, न तु[47] कथापर्यवसानिकम्, यथा विरोधोऽप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमपसिद्धान्त[48] इति सप्तकम्, एतेषां Yवाक्यार्थबोध-तिरोधायकत्वेनY वादेऽप्युद्भाव्यत्वात्। तथाहि—विरोधे योग्यताविरहः, अप्राप्तकाले आकाङ्क्षाविरहः, न्यूने आकाङ्क्षितासमभिव्याहारः, स चानासत्तिविशेषः, अधिके अनाकाङ्क्षितसमभिव्याहारः, पुनरुक्ते-ऽप्येवम्, सोऽप्याकाङ्क्षाविरहविशेषः[49], अननु[50]भाषणे उक्ताप्रति-सन्धानम्, अपसिद्धान्ते सम्मुखप्रमाणबाधाक्रान्तिरिति। किञ्चित् कथावसानिकम्, यथा हेत्वाभासो निरनुयोज्यानुयोगश्च द्वयमितीति।

अत्र वर्द्धमानोपाध्यायप्रभृतयः—यद्यपि हान्यादिकमपि वादे सम्भ-वत्येव, तथाहि—पूर्वप्रतिज्ञादोषदर्शने[51] स्वयं बुद्धिपूर्वकत्यागे[52] प्रतिज्ञाहानिः, एवं भ्रमात्[53] सन्न्यासः, वाचकत्वभ्रमात् निरर्थकम्, उपयोगभ्रमादर्थान्तरम्, स्फुटार्थत्वभ्रमा[54]दविज्ञातार्थकम्, पूर्वापरा-

39-40. ०र्थकमिति B, ०र्थकमपार्थकमनर्थकमिति C. 41. ०संगूहन० C. 42. ०ज्ञान० E. 43. वक्षेपो E. 44. महा० B. 45. ०योक्षेपण० B. 46. ०तत्त्व० add. E. 47. ननु C. 48. ०मपि सिद्धान्त B. Y-Y. वाक्यार्थं बोधयति रोधकत्वेन B. वाक्यार्थबोधविरोधायकत्वेन C. 49. ०विरहशेषः B. 50. अयथा० A, E. In A, ०न० has been written over ०यथा० 51. ०दोषादर्शने B. 52. ०पूर्वकमत्यागः B, ०पूर्वकप्राक्त्यागे E. ०पूर्व-कभ्यागे F. 53. भ्रमात् om. E. 54. स्फुटं भ्रमा० E.

न्वय[55]भ्रमादपार्थकमपि सम्भवत्येव, तथापि स्वाशक्तिनिगूहनार्थं तेषां प्रयोगो न सम्भवतीत्याचार्याभिप्रायः। यद्यपि च यत्र हेतुविशेषाधीन-साध्यविशेषसिद्धये[56] तद्विचारे[57] प्रतिज्ञान्तर[58]हेत्वन्तरेऽवश्योद्-भाव्ये[59]ऽन्यथा तत्त्व[60]प्रतिपत्तिव्याघातः, पर्यनुयोज्यो[61]पेक्षणञ्च स्वयमुद्भाव्यम्[62], स्वकीय[63]दूषणानुद्भावने तत्त्व[64]प्रतिपत्तिव्याघाता-पत्तेः, तथापि यत्र न हेतुविशेषाधीनसाध्यविशेषसिद्धिस्तत्परत्वं प्रतिज्ञान्तराद्यनुद्भावनस्य, पर्यनु[65]योज्योपेक्षणञ्च[66] न स्वयमुद्-भाव्यम्, [64]तस्य मध्यस्थ[65]मात्रोद्भाव्यत्वेन सामयिकत्वादित्यभिप्रायः। न्यूनन्तु सर्वत्र न कथाविच्छेदकमित्यभिप्रायः, यत्र हेतुना न्यूने हेत्वन्त-रापरिस्फुर्तिस्तत्र तावतैव कथाविच्छेदात्। अधिकन्तु यद्यपि न शाब्द-धीपरिपन्थि तथाप्यधिकं न शाब्दबोधाङ्गमित्यवश्यज्ञाप्यत्वमेव तस्य। हेत्वाभासस्तु न सर्वत्र कथावसानकः, हेत्वाभासे पतितेऽपि तत्त्वनिर्णयाय तत्रैव विषये हेत्वन्तरप्रयोगात्, किन्त्वेवंविधस्थले[67] कथैकविच्छेदकः[68], अन्यत्र तु कथावसानक इति वदन्ति[69]। एवञ्च [Z]यतस्तत्त्वप्रतिपत्ति-व्याघातो[Z] न भवति तदुद्भाव्यम्, अनुद्भाव्यम्[70] अन्यदिति विभागः। समयबन्धविशेषेण[71] वादप्रवृत्तौ यथासमयमेव उद्भाव-नानुद्भावने इति वदन्ति। अत्र च वादे न मध्यस्थस्य न वा [72]राजा-देरुपयोगः, तत्कर्तव्याभावात्[73]। मध्यस्थानां हि कथास्थाने[74] कथा-विशेषव्यवस्थापनं पूर्वोत्तरादिस्थापनं विवदमानयोर्गुणदोषावधारणं भग्नवादिप्रतिवादिप्रबोधनं लोकनिष्पन्नकथाफलप्रतिपादनञ्च[75] कर्माणि,

55. पूर्वपराचय० E. 56. सिद्धयोः A. 57. तद्विचार B. 58. ०न्तरे० E. 59. ०भाव्वो० A. 60. तत्व० C, तत्० E. 61-62. ०पेक्षणञ्चान्वय-मद्भाव्यं C. 63-64. ०भूषणानुद्भावने तुत्त० C. 65-66. ०योज्यापेक्ष्य पञ्च E. 67. ०स्थान A, B. 68. ०विच्छेदः E. 69. वदं E. Z-Z. यतस्तत्त्वे प्रतिपत्तेर्व्याघातो B, यस्तत्त्वप्रतिपत्तिव्याघातोऽपि C. 70. अनुद्-भाव्यम् om. B. 71. ०विशेषण A, समयबन्धाविशेषे न B. 72. न वा om. B. 73. ०कर्तव्यताभावात् A. 74. कथास्थले F. 75. लोके

न चैवं वादे, तयोरेव[76] वीतरागतया शक्तत्वात्; राजादेस्तु यथाशक्ति यथानियमं सम्मानासम्मानव्यञ्जकं कर्म[77], नैतद्वादे, तत्र हि तत्त्वबुभुत्सया स्वयमेवात[78]त्त्वज्ञः तत्त्वज्ञानिनमुपासीतेति वदन्ति। [x]उक्तकर्माणि कारयितुं न तदुपयोगः, सम्वादेन प्रमादतः कथाभास-शङ्काममपनेतुं पुनः क्वचिदुपयोगेऽपि न क्षतिः। तदुक्तं मिश्रैः—"न वादे प्राश्निकानामुपादानं दैवागतानान्तु न वर्जनमि"ति। प्राश्निकाः मध्यस्थाः[x]। स्मरन्ति च—"कादा[79]चित्की सभा वादे" इति,[80] पठन्ति च[81]—"अनुविधेयस्थेयसभ्यपुरुषवती जनता सभे"ति।[82] अनुविधेयो राजादिः, स्थेयान् मध्यस्थ[83] इति ध्येयम्। अत्र[84] प्रकृतोक्तिकोऽविप्रलम्भको यथा[85]कालस्फुर्तिकोऽनाक्षेपको युक्तिसिद्ध-संप्रत्ययी[86] पञ्च वादे उपादेयाः पुरुषाः, प्रायेण विपर्ययेण हेयाः।[87] तत्त्वबुभुत्सुभि[88]र्गुर्वादिभिः सह वादो न तु [89]प्रतिद्वन्द्विना[90]; त्रिविधश्च फलम्, [91]अनधिगततत्त्वावबोधः[92] संशयनिवृत्तिः[93] अध्यवसिताद्यर्थज्ञानमिति वदन्ति ॥ १ ॥

क्रमप्राप्तं जल्पं लक्षयति—

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ २ ॥

यथोक्तोपपन्न इति। प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रहः

निष्पन्नकथाफलप्रतिवादनं B, लोके निष्पन्न० C, लोके तित्वकथा० E. 76. तयोरेव om. B. 77. कर्म om. A. 78. स्वयमेव त० B, न्ययमेमात० E. X-X. om. B. 79. कदा० B. 80-81. om. C, E. 82. सभेत्युच्यते C, E. 83. स्थेयो मध्यस्था A, स्थेयो प्रध्यस्थः E. 84. अच E. 85. ०यथा० add. E. 86. संप्रयी B. 87-88. तज्ञतत्सुधीभिः E. 89-90. प्रतिद्वन्दिमात्रं A, प्रभृतित्वल्पिनां C. 91-92. अनधिगत्त्वाबोधः B, अनधिगततत्त्वविबोधः C, अनधीततत्वावबोधः E. 93. After this, two folia are missing in E.

इत्यर्थः। यत्तु—प्रमाणसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः[94] पक्षप्रतिपक्षपरिग्रहः इति भाष्यव्याख्यानन्तदसत्, [95]तदुपादानलभ्यस्या[96]पसिद्धान्तन्यूनत्वादेरुद्भावनीयत्वस्येह निग्रहस्थानपदेनैव लब्धत्वात्, न च पञ्चावयवत्वं जल्पनियतम्, 'पञ्चावयवा न प्रयोक्तव्याः' इति समयबन्धाधीनजल्पाव्यापनात्। पक्षप्रतिपक्षपरिग्रह इत्यनेन वितण्डानिरासः, तत्र प्रतिवादिपरिग्रहाभावात्। प्रमाणतर्केत्यस्य प्रमाणत्वतर्क[97]त्वज्ञानविषयेत्यर्थः। न तु ज्ञानेऽनाहार्यत्वमपि निविष्टम्, अव्याप्तेः, अप्रमाणत्वेन ज्ञातस्यापि[98] [99]परेण प्रमाणत्वेन ज्ञातव्यमित्यभिप्रायेण तत्रो[100]पन्यासात्। अथ छलजातिनिग्रहस्थानैः प्रतिषेधः सम्भवति, न तु साधनम्, तेषामप्रमाणत्वात्तदला-[? ०त्तदा०-] भासात्त्वेति चेन्न[101], तेषां[102] परपक्षनिराकरणेन स्वपक्षसाधनयोगात्।[103] साधनस्य पराजितस्योपालम्भ[104] इति षष्ठीसमास इत्यपि केचित्। अथ छलादीनां समुदायोऽव्यापकः, प्रत्येकञ्चाननुगतम, अन्यतरत्वेनानुगमेऽपि वादेऽतिप्रसङ्गः, निग्रहस्थानपदस्यापसिद्धान्तापी [?०न्तादी०]तरनिग्रहस्थानपरत्वे यत्रापसिद्धान्तादेरेवोपन्यासस्तत्राव्याप्तिरिति—उच्यते। छलादि[105]पदं जल्पस्थछलादि[106]परम्, तथाच तच्छलोपालम्भक[107]-वृत्तिकथाविभाजकोपाधिमत्त्वं लक्षणम्, एवं जात्यादिघटितमपि लक्षणं निर्वाच्यमिति। उभयोः साधनोद्देश्यत्वव्याप्यविजिगीषु[108]कथा जल्प इत्यपरे। केचित्तु—जल्पे उभयसाधनप्रयोगो[109] नास्ति, अवसराभावात्; तथाहि—वादिना साधने प्रयुक्ते यदि द्वितीयेन तद्दूषितं निगृहीतस्तर्हि वादी, जितं द्वितीयेन, निवृत्ता कथा। न दूषितञ्चेत्,

94. पञ्चावयवापन्नः A. 95-96. तदुपाननस्या० B. 97. प्रमाणतर्कत्व B. 98. पारस्यापि B. 99. पारणप्रमात्वेन B. 100. तत्र om. B. 101. चेत् om. A. 102. एषां C. 103. ०साधनायोगात् F. 104. ०स्योपलम्भ A. 105. तुलादि० B. 106. जल्पस्थतुलादि० B. 107. तच्छलोपस्थक० B. 108. ०व्याप्ता जिगीषु० A. 109. केचित्तु उभयप्रयोगो B.

उत्तराभासवचनेन निगृहीतस्तर्हि द्वितीयो, जितं[110]प्रथमेन, निवृत्ता कथेति नास्ति द्वितीयसाधनावसर इत्याहुः। अत्राचार्याः—यथा वादे स्वसाधन[111]स्थितौ परसाधननिवृत्तौ तत्त्वनिर्णयो न विपर्यये, तथा जल्पेऽपि[112] स्वसाधनस्थितौ परसाधननिवृत्तौ विजयो न विपर्यये; 'स्वपरपक्षसाधनदूषणे[113] वक्तव्ये'—इति समयबन्धेनैव जल्पप्रवृत्तेः; 'एकेन साधनीयमन्येन दूषणीयमेवे'ति समयबन्धप्रवृत्ता च[114] कथा न जल्पः, किन्तु वितण्डा; उभयस्थितिनिवृत्त्योः परिषदेव विजयते। तदयं जल्पप्रवृत्तिक्रमः—वादिनि साधनमात्रं प्रयुज्य संक्षेपतो विस्तरतो[115] हेत्वाभासानुद्धृत्य[116] विरते सत्युच्यमान[117] ग्राह्यनिग्रहाप्राप्तौ आभासबहिरुक्तग्राह्यनिग्रहालाभे[118] वादिवचनार्थमवगम्याज्ञानाननुभाषणनिग्रहपरीहारार्थमनुद्य [119]प्रतिवादी स्वपक्षे स्थापनां[120] प्रयुञ्जीत; अप्रयुञ्जानस्तु[121] दूषितपरपक्षोऽपि[122] न विजयी, श्लाघ्यस्तु स्यात् समयबन्धैकदेशनिर्वाहात्, आत्मानम[123]रक्षन् परघातीव[124] वीरः। तस्मिन्नप्येवं विरते सति अनुक्तोच्यमाननिग्रहालाभे तद्वचनार्थमवगम्यानूद्य[125] दूषणाङ्ग[126] दूष्याभासबहिरुक्तग्राह्यनिग्रहालाभे प्रथमवादी स्थापनांशं दूषयेत्; अदूषयंस्तु रक्षितस्वपक्षोऽपि न विजयी, श्लाघ्यस्तु स्यात्, [127]दस्युतो निःसारितस्वधनधनिकवत्।[128] अनुक्तोच्यमानग्राह्याभासबहिरुक्तग्राह्यनिग्रहलाभे[129] तु तावतैव[130] कथाविरतिर्न साधनविचारावसरः, शरसन्धानसमय एव यो मूर्च्छितस्तद्वाणवारणतत्प्रहारानुष्ठानवद्विफलत्वात्। तत्रानुक्तग्राह्यमप्रतिभाऽज्ञान-

---

110. जिजतं C. 111. वादेऽर्थसाधन C. 112. जल्पापि C. 113. ०साधनभूषणे C. 114. च om. A, B. 115. निरस्तरतो B. 116. ०भासान्वभूत्य C. 117. सत्यनुक्तोऽप्यमानं A. 118. ०बहिरुक्तलाभे A, ०बहिरुक्तग्राह्यनिग्रहलाभे B. 119-120. प्रतिवादिनां पक्षे स्थापनां B, प्रतिवादीथंपक्षे स्थापनात् C, प्रतिवादीनां पक्षस्थापनं F, 121. अप्रपूञ्चानन्तु C.' 122. ०पक्षेऽपि A. 123-124. ०रक्षणघातीव B. 125. ०गम्यानुस्व C. 126. दूषणांशं F, 127-128. om. C, F. 129. निग्रहाणां लाभेः A. 130. तु भारते च C.

मननुभाषणञ्च, उच्यमानग्राह्यमप्राप्तकालादि, आभासबहिरुक्तग्राह्यं प्रतिज्ञाविरोधादि, एवमसत्[131]स्वाभासचिन्तेति वदन्ति ॥ २ ॥

क्रमप्राप्तां वितण्डां लक्षयति—

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ३ ॥

स जल्प इति भाष्यादयः, तन्न, वितण्डाया[131] जल्पत्वाभावात् । तत्पदस्यात्र[132] [133]प्रसिद्धार्थकत्वात् स कथासन्दर्भ इति तु वस्तुगतिः । वादिना यत्र साधनमुपन्यस्तं तद्विरुद्धार्थ[134]साधनोपन्यासः प्रतिपक्षस्थापना तया हीनः । ननु यत्र जल्पे प्रतिवादिना [135]सभाक्षोभादिवशान्न[136] साधनोपन्यासः कृतस्तत्रातिव्याप्तिः, (यत्र) परमतनिराकरणेच्छया सत्[137]प्रतिपक्षोपन्यासः कृतस्तत्राव्याप्तिश्च ।[138] अत्राहुः—वादिस्थापितार्थ[139]विरुद्धार्थसाधकत्वेनोद्देश्यत्वविरहविशिष्टा कथा वितण्डा; जल्पे[140] चाप्रति[141]भादिना तदनुप[142]न्यासेऽप्युद्देश्यत्व[143]सत्त्वान्नातिप्रसङ्गः, सत्[144]प्रतिपक्षोपन्यासश्च न[145] साधने[146]च्छया कृत इति नाव्याप्तिरपीति । यत्किञ्चिद्वितण्डाव्यक्तिमादाय तद्वृत्तिकथाविभाजकोपाधिमत्त्वं वितण्डात्वमित्यपि वदन्ति ।[147] सा च वितण्डा नानाप्रकारा, 'त्वया शब्दानित्यत्वं साधनीयं मया दूषणीयमेव तदि'ति प्रतिज्ञया क्वचित् तत्प्रवृत्तिः, क्वचिच्च 'त्वया शब्दानित्यत्वं साधनीयं परपक्षो दूषणीय' इति प्रतिज्ञया; 'मयाऽन्विताभिधानं साधनीयं परपक्षो दूषणीय' इति प्रतिज्ञयाऽपि

131. वितण्डा सा C. 132. अत्र om. B. 133. अप्रसिद्ध० B. 134. ०विरुद्धानु० C. 135-136. अप्रतिभादिना न C. 137. तत्० A. 138. च om. C, F. 139. ०स्थापनार्थ० B, ०स्थापितानु C. 140. जल्पे om. C. 141. नुप्रति० C. 142. तदुप० A. 143. ०त्व० om. A. 144. तत्र B, तत्० F. 145. न om. C. 146. साधके० C. 147. MS B ends here.

क्वचित्तत्प्रवृत्तिश्चेति वदन्ति। यत्तु केनचिदुक्तम्—यदि वितण्डा नाम कथान्तरं स्यात्तर्हि[148] जल्पकथैवोच्छिद्येत, न हि परपक्षनिराकरणमात्रेणैव विजये सम्भवति स्वपर[149]पक्षसाधनदूषणयोः समयबन्धे कश्चित् सचेताः[150] प्रवर्तेत इति; तन्न, स्वाधिकशक्तिख्यापनेच्छया[151]ऽर्थविशेषनिश्चयादीच्छया च तथा समयसम्भवात्। जल्पे हि शक्तिद्वयं निरूप्यते, स्वप्रत्यवेक्षा[152] पराघातश्च[153], कृतविद्यक्षत्रिययुद्धवत्; वितण्डायान्तु दाशरथि[154]दशाननतनयतमस्विनीयुद्धवत् काकोलूकयुद्धवद्वा एकस्य [155]स्वप्रत्यवेक्षाशक्तिः परस्य पराघाते नैपुण्यं[156] निरूप्यत इति। साम्प्रतनिस्तु स इत्यनेन जल्पवद् वादस्यापि परामर्शाद् वादवितण्डाऽपि चतुर्थी कथा, पुरुषाभिप्रायविशेषेण सम्भवत्यास्तस्याः निराकरणायोगात्, एवञ्च प्रतिपक्षस्थापनाहीना विजिगीषुमात्रकथा जल्पवितण्डा, तादृशी च[157] तत्त्वनिर्णिनीषुकथा वादवितण्डेति। न चैवं वादजल्पात्मिका पञ्चमी कथा स्यात्, असति[158] बाधके इष्टत्वात्। वादवितण्डायां[159] विजिगीषुकथात्वेनाप्रतिभादिकमप्युद्भाव्येत इति चेदुद्भाव्यत एव, न हि तावन्मात्रेण कथाविच्छेदापत्तिः, तत्त्व निर्णयार्थमपि[160] तत्प्रवृत्तिसम्भवात्। अथ प्रथमसाधननिवृत्तावेव न तत्त्वनिर्णयः, निःसाधनस्य तस्यानुपपत्तेः, स्वपक्षसाधनवचने च न प्रति[पक्ष]स्थापनाहीनत्वम्; न च वादिना यत्र सत्साधनमेव प्रयुज्यते तत्र तत एव तत्त्वनिर्णयः, शङ्कितप्रतिपक्षत्वात्, तदुक्तमाचार्यैः—"तत्त्वबुभुत्सुकथा च वितण्डा चेति व्याहतमि"ति चेन्न। यत्र बाधस्तत्र प्रथमसाधननिवृत्त्यैव तत्त्वनिर्णयसम्भवात्, यत्र वादिप्रयुक्तसत्साधनमाभासीभूतदूषणेन निराकृतं तत्र विजयानन्तर-

148. तर्हि om. C. 149. Reading in E starts here again after the break. 150. सचेताश्च C. E. 151. विधेयाकरख्यापनायस्येच्छया० C. 152. स्वप्रत्यपेक्षा E. 153. पराप्रतिश्च C. 154. दशारथः० E. 155-156. स्वप्रत्यपेक्षा परस्पराघाते नेव पुण्यं E. 157. च om. E. 158. अति E. 159. ०वितण्डानां E. 160. ०र्थमग्रेऽपि C.

माभासत्वेन ज्ञापितदूषणस्याविरोधित्वात् तत्त्वनिर्णयसम्भवाच्चेत्याह। उक्तत्रितयान्य[161]तमेऽन्तर्भावान्नाधिक्य[162]मित्यपि वदन्ति ॥ ३ ॥

॥ समाप्तं कथाप्रकरणम् ॥

क्रमप्राप्तं हेत्वाभासं लक्षयति विभजते च—

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥ ४ ॥

एतेन [स]व्यभिचारत्वाद्यन्यतमत्वं[1] लक्षणमुक्तं विभागोऽपि कृतः, एते पञ्च हेत्वाभासा इति मन्तव्यम्। ननु सत्प्रतिपक्षिता[2]सिद्धबाधिता अपि शास्त्रान्तरे हेत्वाभासतयोक्ता इति न्यूनत्वम् [इति चेत्] न, प्रकरणसमादीनामेव शास्त्रान्तरे संज्ञान्तरकरणादिति ॥ ४ ॥

क्रमेण लक्षयति—

अनैकान्तिकः सव्यभिचारः ॥ ५ ॥

[3]एकस्मिन्नन्ते नियतः[4] साध्यवति तदभाववति वा नियत ऐकान्तिकस्तदन्योऽनैकान्तिकः, तथा च साध्यतदभाववद्वृत्तित्वं व्यभिचारस्तद्वान् सव्यभिचार इत्यर्थः पर्यवस्यति, तेन सद्धेतुविरुद्धयोर्निरासः। ननु साध्यवद्वृत्तित्वांशज्ञानस्यानुमितेः परामर्शस्य वा अविरोधित्वात्[5] कथमुक्तं रूपं हेत्वाभासविभाजकमिति चेन्न, [न] ह्यनुमितितत्कारणपरामर्शान्यतरविरोधितावच्छेदकमेव हेत्वाभासविभाजकमित्यत्र मानमस्ति[6], स्वतन्त्रेच्छेन मुनिना येन रूपेण विभागः कृतस्तस्यैव विभाजकत्वात्। परं प्रति 'हेतुरयं व्यभिचारी'त्यादिदोषोद्भावना[7]न्तर्भूतव्यभिचारादिपदशक्यञ्च न मुनिना निरुच्यते, येन साध्यवद्वृत्तित्वाद्यंशस्यादोषतया मुनिवचनमप्रमाणं स्यात्, तादृशतत्तत्पदशक्यञ्च व्युत्पा-

161-162. ०तमेऽन्तर्भावादर्थाधिक्य० C, ०तमेऽभतिवोन्नाधिक्य० E.

1. व्यभिचाराद्यन्यतमवत्त्वं C, E, F. 2. ०पक्षता० E. 3-4. एकस्यांत नियत C, एकस्मिन्नस्तनि यः E. 5. तदविरोधात् E, 6. मामनन्ति C. 7. ०दोषान्तरेण० E.

दयिष्यतेऽस्माभिरित्यपि वदन्ति। वस्तुत एकस्मिन्नन्ते[8] साध्यवति नियत इत्यैकान्तिकः, साध्यवन्मात्रवृत्तिरिति[9] यावत्, तदन्योऽनैकान्तिकः, साध्याभाववद्वृत्तिरिति तु फलितार्थः। न च साध्याभाववद्वृत्तित्वत्वं[10] न व्यभिचारत्वम्, [X]शास्त्रान्तरसिद्धव्यभिचाराभावात्[11] साधारण्यानुपसंहारित्वाव्याप्तेरिति वाच्यम्[X], शास्त्रान्तरेऽन्यादृशसंकेतेऽप्यत्रैवं[12] संकेता[13]विरोधात्, एतन्मते तयोरलक्ष्यत्वात्[14]। न च साधारण्यानुपसंहारित्वयोरुद्भावनं न स्यात्, न हि हेत्वाभासविभाजकोपाधिरेवोद्भाव्यत इति नियमोऽस्ति, अपितु दूषणम्, तच्चासाधारण्यादिकमपि। न चैवं तयोरपि निग्रहस्थानत्वेन निग्रहस्थानविभागव्याघातः, अनुक्तसमुच्चायकेन[15] च शब्देन तयोरपि संग्रहात्, वस्तुतः साधारणस्य प्रकरणसमत्वेऽनुपसंहारित्वस्य साध्यसमत्वेऽन्तर्भावयिष्य[16]माणत्वादिति। एकस्मिन्नन्ते[17] नियत ऐकान्तिकः, साध्यव्याप्य इति यावत्, नञर्थश्च विरोधित्वम्, तथा च साध्यव्याप्तिग्रहविरोधित्वं व्यभिचारित्वम्, व्याप्तिश्चान्वयतो व्यतिरेकतश्च वाच्या, तच्च [18]साधारण्यासाधारण्यानुपसंहारित्व[19]साधारणम्। साधारण्यं हि साध्यवदन्यवृत्तित्वादि, असाधारण्यं[20] साध्यवदवृत्तित्वादि, अनुपसंहारित्वं व्यतिरेकव्याप्त्य[21]भावादि, सर्वञ्च व्याप्तिधीविरोधीत्यपि वदन्ति।[22] तत्र साधारणस्योदाहरणम्—'अनित्यः शब्दः, प्रमेयत्वात्'; असाधारणस्य—'नित्यः शब्दः शब्दत्वात्', इदं

---

8. एकस्यान्ते C. 9. ०वृत्तिः स इति C. 10. वृत्तित्वं C, E, F. X–X. om. C. 11. ०भावा E. 12. ०दृशसांकर्यप्यत्रैवं C. 13. शङ्किता० A. 14. ०लक्षणत्वात् C, F. 15. अन्तिमसूत्रस्थ—marginal note in A. अन्तिमसूत्र stands for हेत्वाभासाश्च यथोक्ताः (५।२।२४). 16. ०भंविष्य० A 17. एकस्यान्ते C. 18-19. साधारण्यानुपसंहारित्व० A. साधारण्यानुपरिहात्व० E. 20. हि add. C. 21-22. भावादि सर्वञ्च व्याप्तिधीविरोधि A. ०भावादीत्यपि वदन्ति C.

साधारणमपि[23] ; [Y]उक्तं द्वितय[24]मेवानुपसंहारिण उदाहरणम्, 'इदं वाच्यं ज्ञेयत्वा'दित्यादिकञ्च[Y] । परे तु—पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारण्यम्, एतद्धीश्च साक्षादनुमितिविरोधिनी, एतदसाधारण्योक्तसाधारण्यानुपसंहारित्वान्यतमत्वमेव व्यभिचारत्वम्[25], तद्वान् व्यभिचारः, तदाश्रयः[26] सव्यभिचार इति वदन्ति ॥ ५ ॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ ६ ॥

सिद्धः सिद्धिविषयः, स च साध्यमपीत्युक्तम्, अन्त इति विषयतापर्य्यवसानमित्यर्थः, पर्य्यवस्यति च विषयताविशेषे[27] । एवञ्च सिद्धान्तोऽनुमितिविशेष्यः, पक्ष इति यावत्, तम अभ्युपेत्य प्राप्य, सन्निति शेषः, पक्षवृत्तिरिति तु निष्कर्षः । तद्विरोधीति । तत्पदं साध्यपरम्, तथा च साध्यविरोधी साध्यवदवृत्तिरिति यावत् । पक्षवृत्तिरित्यनेन स्वरूपासिद्धनिरासः[28] । न च सोऽपि विरुद्धमध्य एव निवेश्यताम्, कृतं[29] पक्षवृत्तिरित्यनेन [इति वाच्यम्], स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात्, परिभाषायां परिभाषाकर्त्तुरिच्छाया एव नियामकत्वात् । 'अयं हेतुर्विरुद्ध' इति दोषोद्भावने तु[30] विरुद्धपदं योगमर्यादया विरोधिमात्रपरम्, पक्षवृत्तित्वांशस्यादूषण[31]स्योद्भावनानर्हत्वादित्यवधेयम् । वस्तुतः पक्षवृत्तित्वे सति साध्यवदवृत्तित्वमेव विरुद्धत्वं दूषणम्[32] उद्भाव्यञ्च, साध्यवदवृत्तित्वस्य साध्याभावव्याप्तित्वेन पक्षवृत्तित्वघटितस्य तस्य

---

23. साधारणस्यापि A. Y—Y. उक्तं द्वितयमिदं वाच्यं ज्ञेयत्वादित्यादिकञ्चानुपसंहारिण उदाहरणमिति वदन्ति A. 24. द्वितीय० E, 25. व्यभिचारित्वम् E. 26. तद्वान् E. 27. ०विशेष्ये C, E, F. 28. ०सिद्धिनिरासः C, E, F. 29. निवेश्य प्राकृतं C. 30. इति दोषोद्भावने तु om. E. 31. ०अंशस्य दूषण० C. E, F. 32. दूषणम् om. C.

साक्षादेवानुमितिविरोधित्वात्। केवलं साध्यवदवृत्तित्वमेव[33] परं न दोषः, साध्याभाववदवृत्तित्वस्य स्वव्यापकसाध्यकत्वस्य वा व्याप्तेः सामानाधिकरण्याघटितत्वात्; साध्याभाववदवृत्तित्वे सति साध्यसामानाधिकरण्यस्य स्वव्यापकसाध्यसामानाधिकरण्यस्य च गौरवेणानुमितावनुपयोगात्, उपयोगे तु केवलं साध्यवदवृत्तित्वमसाधारण्यमेवेति। परे तु—साध्यविरोधी साध्यव्यापकीभूताभावप्रतियोगी, एवञ्च पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धत्वम्[34], एतज्ज्ञानञ्च साक्षादनुमितिविरोधीति प्राहुः। तद्विरोधी साध्यविरोधोविरुद्धः। ननु तद्विरोधिनं सचेता उपन्यस्यत्येव न, कुत्र विरोध उद्भाव्य—इत्यत आह—सिद्धान्तमिति। स्वसिद्धान्तमभ्युपेत्यापि क्वचिदुद्भावित इति शेषः। यथा—[35]'शब्दो नानित्यः[36] शब्दत्वादिति मीमांसकोक्तौ। यद् वा—उदाहरणमाह सिद्धान्तमिति, मीमांसकैः स्वसिद्धान्तं शब्दनित्यत्वमभ्युपेत्योद्भावितं 'नित्यः शब्दः शब्दत्वा'दित्यत्र शब्दत्वमित्यपि मामकः[37] पन्थाः। तत्पदं पूर्वसूत्रोपात्तैकान्तिकत्वघटक[38]साध्यसामानाधिकरण्यपरम्, विषयो विषयिणमुपलक्षयतीति तद्धीलाभः, तात्पर्यमर्यादया तच्छब्दः साध्य[39][साधन] सामानाधिकरण्यधीपर इति तु परमार्थः, तथा च प्रकृतसाध्यसाधनसामानाधिकरण्यग्रहविरोधीति पर्यवसितम्। सिद्धौ [? सिद्धे] दृष्टान्ते सिद्धौ साध्यतावच्छेदकविशिष्टसाध्ये साधनतावच्छेदकविशिष्ट[40]हेतावुभयवन्तो[41]ऽवयवः [? ०वुभयत्रान्वयः]साध्यतावच्छेदकं हेतुतावच्छेदकञ्च तदभ्युपेत्य साध्यहेत्वोर्विदित्वा, वेद्य इति शेषः; साध्यतावच्छेदकविशिष्टसाध्यसाधनता[42]वच्छेदकविशिष्टहेतुग्रहाविरोधीति पर्यवसितोऽर्थः,

33. तु add. C, F. 34. विरोधित्वम् E. 35-36. नित्यः शब्दः E. 37. मदेकः C. 38. ०न्तिकघटक० C. 39. साध्य० om. A. 40-41. ०हेतूभयवन्तो० A. ०हेतुतयोरन्तो० C, E. 42. ०साध्यहेतुता० C, E,

तेन साध्यहेतुविशेषणासिद्धिनिरासः, एवञ्च विशिष्ट[43]साध्यहेतुग्रहा-विरोधी प्रकृत साध्यहेतुसामानाधिकरण्यग्रहविरोधी विरोधः, स यत्रास्ति स विरुद्ध इत्यपि परः पन्थाः ॥ ६ ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ७ ॥

प्रकरणं प्रक्रियमाणं साध्यं तदभावश्च, तयोर्विप्रतिपत्तिविषयत्वेन प्रक्रान्तत्वात्। चिन्ता ज्ञानम्, अनुमितिरिति यावत्। यस्मात् साध्यानुमितिर्यस्माच्च साध्याभावानुमितिः, परस्पर[44]विशिष्ट (पा० विरुद्ध) इति शेषः। निर्णयार्थमपदिष्टः स्वसाध्यनिर्णयार्थं हेतूकृतः,[45] प्रकृतहेतुरिति यावत्। यद् वा—प्रकरणं परेण प्रक्रियमाणम्, साध्याभाव इति यावत्, स इत्यस्य तत्सहित इत्यर्थः, निर्णयार्थं स्वसाध्यनिर्णयार्थमपदिष्टः हेतूकृतः[46] स्वसाध्यानुमित्युपयुक्तपरामर्शविषयः प्रकृतहेतुरित्यर्थः। यद् वा—प्रकरणं साध्यनिर्णयार्थ[47]मिति साध्याभावनिर्णयार्थ[48]मित्यर्थः, प्रयुक्तेन सहित इति शेषः। साध्यादेरनुमितिश्च परामृश्यमानात् लिङ्गात्, तेन[49] साध्याभावानु[50]मित्युपयुक्तपरामर्शविषय[X] लिङ्गविशिष्टः साध्यानुमित्युपयुक्तपरामर्शविषय[51X] प्रकृतहेतुः प्रकरणसम इति पर्यवसितार्थः। यथा—'पर्वतो वह्न्यभावव्याप्यद्रव्यत्ववानि'ति भ्रमात्मकपरामर्शदशायां 'वह्निव्याप्यधूमवानि'ति परामर्शविषयो धूमः। न चात्राभासान्तरमस्ति, प्रकरणसमस्य क्वचिदाभासान्तरसाङ्कर्येऽपि क्षतिविरहात्। 'अयं हेतुः प्रकरणसम' इति दोषोद्भावने प्रकरणसमपदार्थस्तु नायम्[52], एतज्ज्ञानस्यादोषत्वात्, किन्तु साध्याभावव्याप्यवत्पक्षकत्वमित्यवधेयम्। वस्तुतस्तु—प्रकरणः साध्याभावः, यस्मादिति पञ्चम्या ज्ञानजन्यत्वमर्थः;

---

43. तादृश० C. 44. स यस्यर० C. 45-46. हेतुकृत: A. 47-48. ०निर्णयत्वे० C. 49. लिङ्गविशिष्ट० C. 50. भावार्था० A. X—X. om. C, E. 51. ०विशिष्टषय० A. 52. नयेम C.

स इत्यस्य तद्वा[53]नित्यर्थः, प्रतिपक्षस्तद्वा[54]निति शेषो वा; निर्णयार्थमपदिष्ट इत्यस्य प्रकृतहेतुरित्यर्थः, तेन यज्ज्ञानजन्या साध्याभावानुमितिः[55]स प्रतिपक्षस्तद्वान् प्रकृत[56]हेतुः प्रकरणसम इति पर्यवसितार्थः। साध्याभावव्याप्यवत्पक्षज्ञानञ्च[57] साध्याभावानुमितिबीजम्, साध्याभावव्याप्यवत्पक्षक इति तु फलितार्थः, प्रकरणसमे तु[58] दूषणान्तरनियमेऽपि क्षतिविरहात्। वह्निमति पर्वतादौ पक्षे वह्न्यादौ साध्ये धूमादिकं न प्रकरणसमः, किन्तु ह्रदादौ पक्षे। न च तस्मिन् पक्षे धूमः सर्वदा प्रतिपक्षितः स्यात् [इति वाच्यम्], वह्नौ धूमव्याप्तिप्रतिसन्धानदशायामपि वह्नेर्धूमव्यभिचारित्ववदिष्टत्वात्। साध्याभावव्याप्यवदित्युपलक्षणम्, साध्यवद्भेदादिव्याप्यवदित्यपि बोध्यम्, व्याप्तिश्चान्वयतो व्यतिरेकतश्च बहुविधा ग्राह्या; न चैवमननुगमो दोषाय, नानार्थत्वात्; अस्तु वाऽन्यतमत्वादिनाऽनुगम इति तत्त्वम् ॥ ७ ॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥ ८ ॥

पक्षे साध्यत्वेन साध्या[59]विशिष्टः साध्यसम इत्यर्थः, यथा साध्यं[60] पक्षे साधनीयं तथेदमपि पक्षे साधनीयम्, न तु सिद्धमिति भावः। हेतुतावच्छेदकसम्बन्धेन पक्षतावच्छेदकविशिष्टपक्षासम्बन्धत्वं साध्यसमत्वम्, तद्वान् प्रकृतहेतुः साध्यसम इति तु[61] पर्यवसितार्थः। इदमेव स्वरूपासिद्धमिति गीयते, यथा 'ह्रदो वह्निमान् धूमादि'त्यादौ धूमादि। ननु पक्षे पक्षतावच्छेदकाभावात्मिकाश्रयासिद्धिरपि[62] साध्यसमत्वम्, इतरथा आभासाधिक्यापत्तेः; तथा[63] व्याप्यत्वासिद्धिरपि, सा हि[64] नानाविधा, साध्ये साध्यविशेषणाभाववत्त्वरूपा साध्यविशेषणासिद्धिः, हेतौ हेतुविशेषणाभावात्मिका च साधनविशेषणासिद्धिः, आलोकादौ धूमव्यापक-

---

53. तत्त्वा० C. 54. ०पक्षसत्त्वा० C. 55-56. सत्प्रतिपक्षस्तद्वान् प्रत्यत० C. 57. After this, there is a long lacunae in C and F. 58. तु om. A. 59. साध्य० E. 60. साध्यमसिद्धमिति E. 61. तु om. E. 62. ०मिद्धिरिति E. 63. तथा om. E. 64. हि om. A.

वह्निसामानाधिकरण्यविशिष्टधूमत्वाभावः व्याप्तिविशिष्टपक्षधर्मत्वाभावः,[65] 'वह्निमान् नीलधूमादि'त्यादौ व्यर्थविशेषणत्वम्, एवं साध्यविशेषणविशेषणासिद्ध्यादिकमपि;[66] तथा चैतेषु साध्यसमत्वस्य तद्वति च[67] हेतौ साध्यसमस्य लक्षणमव्याप्तमिति चेन्न। एतेषां च[68] शब्दसमुच्चितानां पृथगेव निग्रहस्थानत्वात्, परकीयव्यवहारानुरोधेन हेत्वाभासलक्षणनिर्वचने परामर्शाभावरूपाऽज्ञानलक्षणासिद्धित्वेन[69] पक्षताविरहरूपाश्रयासिद्धिरपि लक्षणेन संगृह्यते। परे तु—[X]असिद्धः साध्यसम इति सूत्रार्थः, असिद्धत्वञ्च उक्तान्यतमत्वमिति वदन्ति।[X] तत्राश्रयासिद्धिसाधनविशेषणासिद्धोनामुदाहरणानि 'काञ्चनमयपर्वतः काञ्चनमयवह्निमान् काञ्चनमयधूमादि'त्यादौ। व्यर्थविशेषणत्वधीस्तु[70] न व्याप्तिधीविरोधिनी, विषयविरोधाभावात्, तदुद्भावने[71] निग्रहस्तु सकलनैयायिकसमयानुरोधादिति संक्षेपः ॥ ८ ॥

कालात्ययापदिष्टः कालातीतः ॥ ९ ॥

काले किञ्चित्कालावच्छेदेनात्यये सति पक्षे साध्याभावे अपदिष्टस्तत्कालावच्छिन्नपक्षे हेतूकृत[72] इत्यर्थः, यथा गन्धप्रागभावकालावच्छिन्नो

---

65. This variety of व्याप्यत्वासिद्धि is not usually admitted; and may be regarded as an innovation on the part of Rāmabhadra. 66. साध्यविशेषणविशेषण=साध्यतावच्छेदकावच्छेदक. A case of unexemplified साध्यतावच्छेदकतावच्छेदक may be वायवीयदण्डिमान् दण्डिसंयोगात्. This is yet another innovation of Rāmabhadra. 67. हेतौ च A, च om. E. 68. Here again, च is taken from the aphorism हेत्वाभासाश्च यथोक्ताः (५।२।२४). 69. ०लक्षणानि द्वित्वेन A, ०लक्षणासिद्धिः E. X—X. उक्तान्यतयत्वं साध्यसमत्वस्य लक्षणं उक्तान्यतमवत्त्वं न साध्यसमत्वमिति वदन्ति E. 70. ०विशेषणत्वबुद्धिः A, which contains a marginal note—व्यर्थविशेषणत्वं स्वसमानाधिकरणसाध्यव्याप्यतावच्छेदकान्तरघटितत्वम्. 71. तद्भावेन A, उद्भावेन C, 72. हेतुकृत A.

घटो गन्धवान् पृथिवीत्वादित्यादौ[73] पृथिवीत्वादि। न चेह हेत्वाभासान्तरमस्ति, क्वचित् साङ्कर्येऽपि क्षतिविरहात्, अपदिष्टत्वम्वा [74]असत्प्रतिपक्षितत्वे सति[75] व्याप्यपक्षधर्मत्वम्। काल इत्यवच्छेदकमात्रोपलक्षणम्, तेन यदवच्छेदेन यत्र यदभावस्तदवच्छिन्नतत्पक्षकतत्साध्यकत्वं लक्षणम्, तेन 'मूलावच्छिन्नो वृक्षः कपिसंयोगी तद्वृक्षत्यादि'त्यादिकमपि संगृहीतम्, केवलं साध्याभाववत्पक्षकञ्च[76]पृथगेव निग्रहस्थानमिति। वस्तुतः [77]कालपदं [78]पक्षक[? पक्षमात्र]मधिकृत्य, तेन काले पक्षे साध्यात्यये सत्यपदिष्टः [79]साध्याभाववत्पक्षक इति पर्यवसितम्, इतरहेत्वाभाससाङ्कर्यन्तु न दोषाय। साध्याभावेत्युपलक्षणम्, साध्यवद्[80]भेदादिकमपि बोद्धव्यमिति तत्त्वम्। टीकाकृतस्तु—कालात्ययेऽकालेऽपदिष्ट इत्यर्थः,[81] सन्देहो हि न्यायकालः, पक्षे साध्याभाववत्तानिश्चयकालापदिष्ट इति तु पर्यवसितार्थ इत्याहुः ॥९॥

॥ समाप्तं हेत्वाभासप्रकरणम् ॥

क्रमप्राप्तं छलं लक्षयति—

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ १० ॥

अर्थो वक्त्रभिमतोऽर्थस्तद्विकल्पोपपत्तिस्तद्विरुद्धार्थकल्पना, तया[1] वचनविघातो वाक्यार्थदोषाभिधानं छलमित्यर्थः, वक्तृतात्पर्याविषये[2] तात्पर्यसञ्चारेण दोषाभिधानं छलमिति पर्यवसितार्थः। नन्वेवं 'नेपालादागतोऽयं नवकम्बलवत्त्वादि'ति नूतनकम्बलवत्त्वाभिप्रायेण

---

73. ०त्यादौ om. E. 74-75. साध्याभावासत्प्रतिपक्षितत्वेऽसति E. After सति, reading is again available in C and F. 76.० पक्षकन्तु F. 77. पाल० E. 78. All the mss. read कालपक्षकमधिकृत्त काल० seems to be redundant. 79. प्रतियोगिव्यधिकरणसाध्या० C, E, F. 80. साध्याभाव E. 81. ०दिष्टदित्यर्थः A.

1. तयोः C, E, F. 2. वक्तृतात्पर्यविषये C.

वादिना प्रयुक्ते प्रतिवादी यद्दूषणं वदति—अत्र नवकम्बलवत्त्वेन नूतन-कम्बलवत्त्वमभिप्रेतं संख्याविशेषवत्कम्बलवत्त्वं वा, आद्यं व्यभिचारि, द्वितीयमसिद्धमिति[3] तदपि [? तद्द्वयमपि] छलं स्यात्;न च[4] वक्तृतात्-पर्याविषय एव तात्पर्यसञ्चारेण दोषाभिधानं छलमिति नायं[5] दोष इति वाच्यम्[6], तथापि [यत्र] 'सर्वं प्रमेयं धर्मत्वादि'ति धर्मपदस्य सम्बन्ध-मात्र[7]बोधकत्वमित्यभिप्रायेण प्रयुक्तं तत्र यद्दूषणाभिधानं 'धर्मत्वं पुण्यत्वम्, तच्च भागासिद्धमि'ति, तत्राव्याप्तिः, सर्वस्यैव तात्पर्यविषयत्वे तदविषयाप्रसिद्धेः ; तद्रूपेण वक्तुस्तात्पर्याविषय एव तद्रूपेण तात्पर्य-सञ्चारेण दोषाभिधानं छलम्, अस्ति च हेतुत्वेन तात्पर्याविषयीभूते धर्मत्वे हेतुत्वेन तात्पर्यसञ्चारस्तत्र[8] इति नोक्तदोष इति चेन्न[9], यत्र तात्पर्यग्रहमन्तरेणैव[10] 'कुतोऽस्य नवकम्बला' इत्यभिधानं तत्राव्याप्तेः। अत्रोच्यते—बुद्धिविशेषपूर्वकदूषणाभिधानं छलम्, बुद्धौ वैलक्षण्यमनुभव-सिद्धमानसत्वव्याप्यजातिविशेषः। यद् वा—वाक्छलत्वाद्यन्यतमवत्त्वं छलत्वम्, वाक्छलत्वञ्च यावन्ति वाक्छलानि तावदन्यतमत्वम्, एवमन्यदपीति ॥ १० ॥

लक्षितं छलं विभजते—

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ॥ ११ ॥

स्पष्टार्थमिदम्[11] ॥ ११ ॥

तत्र वाक्छलं लक्षयति—

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ १२ ॥

अविशेषेण सामान्यशब्देनाभिहितत्वे सति वक्त्रभिप्रेतादर्थादर्थान्तर-कल्पना यत्र छले तद् वाक्छलमित्यर्थः। एकार्थ[12]तात्पर्येण प्रयुक्तेऽ-

3. सिद्धमपीति A. C, E. 4. अथ C, E. 5. नाद्यं C. 6. इति चेत् C, E, F. 7. ०मात्रा० C, E. 8. तत्र om. C, E. 9. इति तु न साम्प्रतम् A, 10. ०ग्रहसंभूवेनैव E. 11. स्पष्टार्थमेतत् E. 12. एकार्थेन C, E.

र्थान्तरतात्पर्य[13]सञ्चारेण छलं वाक्छलमिति[14] पर्यवसितार्थः। नन्विदमुपचारच्छलातिव्यापकमिति [चेत्]; अत्राचार्याः—अभिधावृत्तिसञ्चारो यत्र तद्वाक्छलम्, अभिधा मुख्यवृत्तिः,[15] यथा—'नेपालादागतोऽयं नवकम्बलवत्त्वादि'ति नूतने प्रयुक्तस्य नवशब्दस्य संख्यायामभिधासञ्चारेणाभिधानं 'कुतोऽस्य नवकम्बलवत्त्वमि'ति[16]; न च 'श्वेतो धावती'ति रूपविशेषाभिप्रायेण प्रयुक्ते श्वेतशब्दे 'इतः श्वा न[17] धावती'ति यत्राभिधानं तत्राव्याप्तिः, न हि तत्राभिधासञ्चारः किन्तु शब्दसञ्चार इति वाच्यम्, शब्दसञ्चारेऽपि अभिधासञ्चारानपायात्[18]। तन्न, उपचारच्छलातिव्याप्तेः। वर्द्धमानस्तु—मुख्यार्थतात्पर्येण प्रयुक्ते मुख्यार्थान्तरसञ्चारेण छलं वाक्छलम्, तेनोपचारच्छलव्युदास इत्याह। तदपि न, मुख्यार्थता हि यस्य कस्यचित् पदस्य तत्पद[समुदाय]स्य वा, नाद्योऽतिप्रसङ्गात्, नेतरः, 'श्वेतो धावती'त्यादावभावात्। अत्र वदन्ति—[X]मुख्यार्थतात्पर्येण प्रयुक्ते[X] मुख्यार्थान्तरसञ्चारेण यदभिधानं तद्वृत्तिच्छलविभाजकोपाधिमत्त्वं तदिति। 'श्वेतो धावती'त्यादिकं सामान्यच्छलमेवेत्यपि केचित्[19] ॥ १२ ॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ॥ १३ ॥

तत्सामान्यविशिष्टे सम्भवतोऽर्थस्यातिप्रसक्तं यत् सामान्यं[20] तद्योगाद-[21]सम्भूतार्थस्याविवक्षितार्थस्य कल्पना यत्र छले तत् सामान्यच्छलमित्यर्थः। यथा 'अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न' इति स्तुत्यर्थं वाक्यं कश्चिदाह, न तु ब्राह्मणत्वाद्धेतोर्विद्याचरणसम्पदस्य विवक्षिता, तत्र परो हेतुत्वमस्याविवक्षितमारोप्य दूषयति—'यदि ब्राह्मण-

13. तात्पर्ये० C, E. 14. तु add. C, E. 15. मुख्या वृत्तिः C, E. 16. नवकम्बल इति A. 17. श्वान् यत्र C, F. 18. सञ्चारपयत A. X–X. om. C, E, F. 19. कश्चित् C, F. 20. यत्तत् सामान्यं C, E. 21. गुण्योगाद्० C.

त्वादयं विद्याचरणसम्पन्नस्तदा व्रात्यो[22]ऽपि ब्राह्मणः, सोऽपि विद्याचरण-सम्पन्नः स्यादि'ति। अत्र [एतद्] ब्राह्मणत्वविशिष्टे सम्भवतो[23]ऽर्थस्य विद्याचरणसम्पत्तिरूपस्यातिप्रसक्तं यत् सामान्यं ब्राह्मणत्वं तद्योगादसम्भूतार्थकल्पनाया प्रतिषेध इति। इदञ्च[24] क्वाचित्कप्रदर्शनम्, लक्षणन्तु—वाक्छलोपचारच्छलभिन्नच्छलत्वं सामान्यच्छलत्वम्, तेन 'द्विशतं[25]भोजितमि'त्युक्ते विशेषणस्यापि भोजनं विवक्षितमित्यभिप्रायेण यत्राह 'ब्राह्मणा भोजिताः, न तु तद्गता[26] संख्यापी'ति तत्र[27] नाव्याप्तिः[28] ॥ १३ ॥

धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ १४ ॥

शब्दस्य स्वाभाविको धर्मः शक्तिः, तद्विकल्पस्तद्विपरीतं[29]लक्षणा, तया निर्देशे प्रयोगे कृतेऽर्थसद्भावेन[30] शक्त्या प्रतिषेध उपचारच्छलम्[31]। यथा 'मञ्चाः क्रोशन्ती'ति मञ्चस्थपुरुषाभिप्रायेण प्रयुक्ते दूषणवचनम्—'मञ्चस्थाः क्रोशन्ति, न तु मञ्चा' इति। ननु यत्पदं लक्षणया प्रयुक्तं तत्पदशक्तिर्विवक्षिता शक्तिमात्रं वा; आद्ये 'अगङ्गां[32] समुद्रञ्च पश्यत्ययमि'ति तीराभिप्रायेण गङ्गाशब्दे प्रयुक्ते यद्दूषणं 'नायमगङ्गां[33] पश्यती'ति तत्राव्याप्तिः, द्वितीयेऽतिप्रसङ्ग इति चेन्न; आद्यस्यैवोक्तत्वात्, न चाप्रसङ्गः,[34] तादृशाभिधानवृत्तिछलविभाजकोपाधि[35]मत्त्वस्य विवक्षितत्वात्[36]। अत एव यत्र शक्त्या भक्त्या वा प्रयोगे लक्षणया दोषाभिधानं तत्रापि नाव्याप्तिः। अथ[37] छलस्यासदुत्तरत्वप्रसिद्धिः कथमिति चेदित्थम्[38]—एवं हि वृत्त्यन्तरकल्पनया[39]छलवादिनं प्रति

---

22. व्राण्यो० C. 23. सवस्तुतो० A. 24. इदन्तु C, इत्थञ्च E. 25. द्विजातं C, E. 26. तस्यानां C, F. 27. संख्यापीत्यादेः C. तत्र om. C. 28. नासंग्रहः C, E. 29-30. लक्षणतया निर्देशे कृतेऽनुसञ्चरण C. 31. इति भावः add. C. 32. न गङ्गा C. वा गङ्गा E. अगङ्गा is a sentence according to Naiyāyikas, and as such, devoid of *śakti*. 33. नामसगङ्गां A. 34. न चातिप्रसङ्गः C, E, F. 35-36. ०मत्त्वात् A. 37. अत्र C, E, F. 38. इत्थम् om. C, E, F. 39. वृत्त्यन्तरकल्पनया om. C, E, F.

प्रत्यवस्थेयम्—ज्ञात्वा तावद्[40]ज्ञात्वा वा प्रयोगात् प्रतिषेधानुपपत्तिः, यदि तावन्नवकम्बलं बुद्ध्वा 'नायं नवकम्बल' इति प्रत्यवतिष्ठते तदाऽर्थान्तरमाह, अन्यद् बुद्ध्यतेऽन्यत् प्रतिषिध्यत इति। अथ तावन्नवैव कम्बला इत्यर्थो बुद्ध्यते तथाप्यज्ञानमिति ॥ १४ ॥

प्रसङ्गाच्छलं परीक्षितुं पूर्वपक्षयति—

वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ १५ ॥

तस्योपचारच्छलस्य वाक्छलादविशेषात्, यथा च भेदकधर्माभावाद् विभागव्याघात इति भावः[41]। अर्थान्तरकल्पनया दूषणाभिधानं वाक्छलमित्यभिप्रेत्य पूर्वपक्षः ॥ १५ ॥

राद्धान्तयति—

न तदर्थान्तरभावात् ॥ १६ ॥

तस्योपचारच्छलस्य वाक्छलादर्थान्तरभावात् उक्त एव भेदकधर्म इति भावः ॥ १६ ॥

येन केनापि रूपेणाभिन्नस्यावान्तरवैलक्षण्येन विभागकरणे व्याघात-[42]माह—

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलत्वप्रसङ्गः ॥ १७ ॥

अवान्तरभेदकसत्त्वेऽपि वाऽविशेषे विभागव्याघाते छलत्वादिरूपकिञ्चित्साधर्म्यादेकच्छलत्वप्रसङ्गः, तथा च 'छलं द्विविधम्, वाक्छलं सामान्यच्छलमि'ति तवाभिधानमपि व्याहन्येतेति भावः ॥ १७ ॥

॥ समाप्तं छलप्रकरणम् ॥

---

40. तावत् om. C, E, F. Retained here following a marginal insertion in A. 41. इति शेषः E. 42. व्याघातदण्ड० A.

क्रमप्राप्तां जातिं लक्षयति—

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥१८॥

साधर्म्यमात्रेण वैधर्म्यमात्रेण वा प्रत्यवस्थानं व्यापकतामपुरस्कृत्य प्रत्यवस्थानं जातिरिति भावः। साधर्म्यवैधर्म्यसमाद्यन्यतमत्वं जातित्वमिति तु निष्कर्षः ॥ १८ ॥

क्रमप्राप्तं निग्रहस्थानं लक्षयति—

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ १९ ॥

विप्रतिपत्तिः विपरीतविषयिणी[1] प्रतिपत्तिर्भ्रमः अप्रतिपत्तिरज्ञानम्[2] अनुमीयते[3] येन तदित्यादिः, प्रतिज्ञाहान्याद्यन्यतमत्वं निग्रहस्थानत्वमिति भावः। प्रपञ्चः पञ्चमे[4]। निग्रहः खलीकारः, तत्स्थानं तज्ज्ञापकमिति यथाकथञ्चिद्व्युत्पादयन्ति ॥ १९ ॥

अथ यदि जातित्वं निग्रहस्थानत्वमेको धर्मस्तर्हि तयोर्बहुत्वप्रवादो विलीयेतेत्यत[5] आह—

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ २० ॥

तयोर्जातिनिग्रहस्थानयोर्विकल्पादवान्तरभेदाद् बहुत्वमिति भावः। २०॥

॥ समाप्तमर्थ[6]दूषणाभिप्रायप्रयुक्तदोषप्रकरणम्[7] ॥

॥ इति न्यायरहस्ये प्रथमोऽध्यायः ॥

1. विरुद्धा C, E. 2. निग्रहस्थानम् add. C, E, F. 3. तत् add. C, E. 4. पञ्चमो C. 5. विलीयेतेत्याह A. 6. समाप्तमनु० E. 7. There is some disagreement about the name of this *prakaraṇa*.

द्वितीयाध्याये प्रथमाह्निकम्

अथ लक्षणानन्तरं परीक्षा[1]। तत्र [प्रमाणस्य] प्रथममुद्दिष्टत्वाल्लक्षितत्वाच्च प्रमाणपरीक्षायाः प्रथममुचितत्वेऽपि[2] तस्या बहुलत्वेनानाकाङ्क्षितत्वात्[3] लघीयसः[4] प्रमाणादिपरीक्षोपयोगिनश्च संशयस्य परीक्षायाः सैव [? परीक्षैव] प्रथमत आरभ्यते। अत्र संशयपरीक्षायां न संशयोऽङ्गमनवस्थानात्, 'शास्त्रे वादे च विमर्शवर्जमि'त्यभिधानाच्चेति वदन्ति। 'संशयः साधारणादिधर्मधीजन्यो[5] न वे'त्याकारक[6]संशयस्तत्परीक्षणेऽप्युपयोगीति वस्तुगतिः। अत्र प्रमाणपरीक्षैवाध्यायार्थः, संशयादिपरीक्षणन्तु तदुपयोगित्वेनेति सम्प्रदायः। यावत्परीक्षितं तावदन्यतमपरीक्षैवाध्यायार्थ इति तु वस्तुगतिः। अत्र संशयादिपरीक्षा प्रथमाह्निकार्थः। तत्र संशयकारणाक्षेपसूत्रम्—

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥ १ ॥

प्रथमाध्याये समानेत्यादिसूत्रे[7] उपपत्तिपदं स्वरूपपरमिति भ्रान्तस्येदं शङ्कासूत्रम्। संशय इत्यतः पूर्वं समानादिधर्मादित्यध्याहार्यम्, वा शब्दात् परं संशय इत्यनुषञ्जनीयम्। तथा च समानादिधर्मान्न संशयः यतस्तदध्यवसायादेव [सः] इत्यर्थः। [8]स्वाध्यवसायेनान्यथासिद्ध्या[9] न तेषां हेतुत्वमिति भाव इति सम्प्रदायः। परे तु—तत्र सूत्रे उपपत्तिपदं बुद्धिपरमित्यभ्रान्तस्यैवेदमाशङ्कासूत्रम्[10], 'संशयः समानादिधीजन्यत्वाभाववान्, यतस्तादृशादपि न कदाचित् संशय' इत्यनेकार्थ[11]पूर्व्येव[12] साध्यहेतुरूपार्थद्वयबोधिका, अन्वयव्यभिचारवारक[13]कारणेनान्यथा-

---

1. लक्षणान्तरपरीक्षा A. 2. प्रथमोचितत्वेऽपि A. 3. ०त्वाच्च A, C. 4. न प्रायशः C. 5. ०धर्मजन्यो A. 6. ०इत्याकारक० om. C. 7. Rāmabhadra refers to NS. 1.1.23. 8. स्व० om. C. 9. ०न्यथाशेषानध्यवसाप्रसिद्धा C. 10. ०शूत्रम् A. 11. इत्येकार्थ० C. 12. ०पूर्वोव A. 13. ०वाचक० E.

सिद्धया न हेतुत्वमिति भाव इति वदन्ति। अत्र समानानेकधर्मौ साधारणासाधारणधर्मौ, अन्यतरधर्मस्तत्कोटिसहचरितधर्मसहिततद्[14]-भावरूपकोटिसहचरितधर्मः, यथा च संशयसूत्रात्तल्लाभ[15]स्तथा तत्रैवोक्तम्। यद् वा—प्रत्येकरूपेण न हेतुत्वमन्यतराध्यवसायत्वादिनाऽपि न हेतुत्वमित्यर्थः॥ १॥

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥

विप्रतिपत्तेरुपलब्ध्यव्यवस्थानोऽनुपलब्धेरव्यवस्थातश्च,[16] न संशय इत्यनुवर्तते। कुतः? यतो विप्रतिपत्तेर[17]व्यवस्थायाश्चा[18]ध्यवसायादेव सः। अभिहितदिशा व्याख्यान्तरं[19] बोद्धव्यम्[20] ॥ २ ॥

विप्रतिपत्तिजन्यमात्रनिरासाय सूत्रम्—

विप्रतिपत्तौ च संप्रतिपत्तेः ॥ ३ ॥

विप्रतिपत्तौ च तद्दशायाञ्च[21] कोटेः संप्रतिपत्तेः निश्चयात्, वादिनोः मध्यस्थस्य चेति शेषः। यद् वा—विप्रतिपत्तेः[22] निश्चयस्यैव जनकत्वात् च, न हि शाब्दः संशय इति[23] ॥ ३ ॥

अव्यवस्थाजन्यसंशयनिराकरणाय सूत्रम्—

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ ४ ॥

तदुपलब्धितदभावोपलब्ध्योरव्यवस्थायाः प्रामाण्याभावान्न संशयः। कुतः? अव्यवस्थाया भ्रमस्याव्यवस्थात्मनि[24] भ्रमधर्मिणि[25] व्यवस्थितत्वात् प्रामाण्यात्, तथा च ज्ञाने प्रामाण्याभावो नास्तीति न तस्मात् संशय इति भावः॥ ४॥

---

14. ०सहितस्तद्० C, F. 15. संशयभूतास्तल्लाभे० C, F. 16. अनुपलब्धेरव्यवस्थातो add. C. 17. ०पत्तेपर० C. 18. ०व्यवस्थयोर० A, C. 19. व्याख्यानन्तरं C, E. 20. बोध्यव्यम् E. 21. चतुर्दशायाञ्च E, F. 22. ०पत्तौ C, E, F. 23. Rāmabhadra accepts the dictum परोक्षज्ञानमसन्दिग्धमनाहार्यम्. 24. भ्रमस्यात्मनि E, भ्रमस्य F. 25. ०धर्मिणोः C.

अथ कारणान्तरं नाङ्गीकुर्मो येनान्यथासिद्धिः स्यात्, अन्वयव्यभिचारश्च न[26] कारणत्वपरिपन्थीत्यत्राह—

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः[27] ॥ ५ ॥

तथा[28] कारणान्तरानभ्युपगमे अत्यन्तसंशयः स्यात्, विशेषदर्शनादावपि[29] संशयः स्यात्, तद्धर्माणां साधारणादीनां सातत्येन सततं[30] तत्तत्समयेष्युपपत्तेः सत्त्वाज्ज्ञायमानत्वात्। तथाशून्यमपि सूत्रमिच्छन्ति ॥ ५ ॥

सिद्धान्तसूत्रम्—

यथोक्ताध्यवसायादेव [31]तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥

यथोक्तानां समानधर्मादीनामध्यवसायादेव तेषां ते वा ये[32] विशेषाः सहकारिणो विशेषदर्शनादयस्तत्सापेक्षात् संशये उक्ते न कारणाभावादसंशयो न वाऽत्यन्तसंशयो[33] विशेषदर्शनादावपि संशयः। विभाजकसूत्र उपपत्तिपदं ज्ञानार्थकम्, विप्रतिपत्तिः तद्धीजन्या कोट्युपस्थितिः, प्रामाण्यं तत्तद्विषय[34]घटितम्, तदभावधीरव्यवस्था, भ्रमत्वज्ञानं वा। यस्य च समीचीना प्रतिपत्तिस्तस्य न विप्रतिपत्तिजन्माऽपि[35] संशय इति भावः। यद् वा—तथाविधात् संशये उक्ते समानधर्मज्ञानादीनामसंशयः संशयविरोधित्वं[36] संशयाजनकत्वं अत्यन्तसंशयो वा नेत्यर्थः[37]।

26. न om. C, E, F. 27. ०सत्तेभ्योपपत्तेः C. 28. तथा om. C, E, F. 29. ०दर्शनादेरपि C, E. 30. सततः C. 31. च विशेषा० C. 32. तेरये C, तेषां B—a case of dittography. 33. वात्यन्तसंशयो C. ०संशयो om. F. 34. तुन्नत्तद्विषय० C. 35. जन्यापि C. 36. Rāmabhadra treats असंशय as a case of भावप्रधाननिर्देश. 37. नेत्यर्थः om. C, E, F.

नव्याः[38] पुनरेवं व्याचक्षते सूत्राणि—समानादिधर्मदर्शनान्न संशयः, व्यभिचारात्, संशयत्वस्य जन्यतानवच्छेदकत्वाच्चेति भावः प्रथमसूत्रस्य। अथ तत् संशयजनकमेव न, किन्तु कोटिस्मारकतया क्वचित् प्रयोजकम्, संशयसूत्रे समानानेकधर्मोपपत्तेरित्यत्र पञ्चम्या प्रयोजकत्वार्थकत्वात्, पञ्चम्यर्थो वा विप्रतिपत्त्यन्वयी, तथा च तादृशी विप्रतिपत्तिर्विशेषणज्ञान[38]विधया हेतुरिति न व्यभिचारः। एवञ्च विप्रतिपत्तिर्विरुद्धकोट्योः प्रति[39]पत्तिरुपलब्धिर्धर्मिणः, सा च स्वातन्त्र्येण सन्निकर्षविधया[40] वा हेतुः, अनुपलब्धिः कोट्योरनिश्चयः, अव्यवस्था विशेषादर्शनं संशयकारणानि, संशयत्वञ्च न जन्यतावच्छेदकं[41] किन्तु विशिष्टबुद्धित्वादिकमिति न[42] कोऽपि[43] दोष इत्यत आह द्वितीयं सूत्रम्। विप्रतिपत्तेरव्यवस्थाया धर्माध्यवसायाच्च न [44]संशयः, प्रत्येकमन्वयव्यभिचारादिति भावः। अथ प्रत्येकमन्वयव्यभिचारो न दोषाय, कारणसमाजत[45] एव[46] कार्योत्पत्तेरित्यत आह तृतीयम्, विप्रतिपत्तौ च सत्यां संप्रतिपत्तेरेव कोट्योर्निश्चयस्यैव सत्त्वात्, तथा च प्रतिबन्धकस्य विद्यमानतयाऽसंशयप्रसङ्ग इति भावः। धर्मिणि कोट्युपस्थिति[47]र्हेतुरित्यभिमानः, यत्र कुत्रचित् कोटिनिश्चयोऽपि विरोधीत्यभिमानो वा, संप्रतिपत्तेस्तत्सामग्र्या इति वाऽर्थः, तथा च निश्चयसामग्र्याः प्रतिबन्धिकायाः सत्त्वान्न ततः संशय[48] इति भावः। अव्यवस्थाहेतुत्वे दूषणमाह[49] अव्यवस्थेत्यादिचतुर्थसूत्रेण[50]। विशेषादर्शनं नात्मनिष्ठं सत् कारणम्, ज्ञानस्याव्याप्यवृत्तित्वाद्विशेषदर्शनेऽपि संशयापत्तेः। अथ प्रतियोगिव्यधिकरणः स हेतुरिति चेत्,

38. ०विशेषज्ञान० C, E, F. 39. विप्रति० E. 40. Here, सन्निकर्ष = ज्ञानलक्षणासन्निकर्ष. 41. ०दकत्वम् C, E, F. 42. न om. A. 43. ०अपि om. A. 44. ०साय तेन E. 45. ०समाजात् C, E, F. कारणसमाज = कारणसामग्री. 46. एव om. C, E, F. 47. विप्रतिपत्ति० C, कोट्युपस्थिति० om. F. 48. सत्तार्थतत्तः C. 49. चतुर्थेण add. C, E, F. 50. ०चतुर्थसूत्रेण om. C, E, F.

तथा सत्यसंशयापत्तिः, अव्यवस्थायास्तादृशविशेषादर्शनस्य अव्यवस्थात्मनि व्यवस्थानाश्रय एव[51] व्यवस्थितत्वात् सत्त्वात्, आत्मनि कदाचिद्विशेषदर्शनाधिकरणे[52] तादृशंतदत्यन्ताभावासत्त्वादिति भावः। [53]अथोक्तदोषभयेन संशयं प्रति कोटिप्रतिपत्तेर्विशेषादर्शनस्य च न हेतुत्वम्, किन्तु साधारणधर्मादेर्यत्र कुत्रचिद् वर्तमानयोर्वा तयोर्हेतुत्वम्, अस्ति च भगवति कोटिप्रतिपत्तिरनात्मनि विशेषादर्शनम्, अत्राह—तथेति। यथोक्तेति। कोटिद्वयाध्यवसायमात्रादेव विशेषापेक्षात् शरीरनिष्ठविशेषदर्शनाभावाद्यपेक्षात् संशये[54] उक्ते नासंशयो नात्यन्तसंशय वेत्यर्थः। अन्यत्र च[55] कोटिनिश्चयो नान्यत्र संशयविरोधी, निश्चयसामग्री च निश्चयोपधायकतत्तद्व्यक्तिरेवेति भाव इत्याहुः॥ ६॥

संशयातिदेशेनैव प्रयोजनादिपरीक्षा बोध्येत्याह—

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः॥ ७॥

एवमुक्तप्रकारेण उत्तरोत्तरेषु प्रयोजनादिषु परीक्षायाः प्रसङ्गः सम्बन्धः, बोध्य इति शेषः। यत्र संशयो नास्ति तत्र परीक्षाऽपि न, व्युदसनीयाभावादिति प्रतिपादनायाह—यत्रेति[56]। यद् वा—यत्र संशयस्तत्रैवमुत्तरस्य लक्षणाद्यनुपपत्तिरूपस्य[57] उत्तरप्रसङ्ग उत्तरं प्रसञ्जनीयम्, तथा च यत्रेत्यनेन सूत्रेण विप्रतिपत्तेर्विचाराङ्गत्वं सूचितम्॥ ७॥

॥ समाप्तं सप्त[58]सूत्र्या संशयपरीक्षा[59]प्रकरणम्॥

---

51. च add. C, E, F. 52. ०विशेषण० A. ०दर्शनस्याधिकरणे C, E. 53. पञ्चमं सिद्धान्तयति add. C, E, F. 54. ०पेक्षसंशये A. 55. अन्यतर E. 56. यत्रेत्यादि C, E, F. 57. ०पत्तिभाषणरूपस्य C. 58. षट्० C, E, F. 59. ०परीक्षण० C.

अथावसरतः प्रमाणसामान्यपरीक्षणायाक्षेपसूत्रम्—

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ ८ ॥

कालत्रयेऽपि ततः प्रमाया असिद्धेः प्रत्यक्षादेः[1] प्रमायाऽजनकत्वेन न प्रमाकरणत्वमिति भावः ॥ ८ ॥

त्रैकाल्यासिद्धेरित्युपपादनाय त्रिसूत्री—

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ ९ ॥

हि यतः[2], प्रमायाः पूर्वं प्रमाणस्य प्रमाकरणस्य सिद्धौ सत्त्वे, अर्थोऽर्थ्यमाणः, प्रत्यक्षविषय[3] इति यावत्, तथा च प्रत्यक्षप्रमायाः पूर्वं नार्थेण सन्निकर्षः, [4]तदा तस्यार्थत्वाभावात्[5] इति कुतः प्रत्यक्षोत्पत्तिरिति। इदमुपलक्षणम्, न साध्यव्याप्य[6] पदार्थोपमेयसमानाधिकरणबुद्धिभ्योऽनुमित्याद्युत्पत्तिश्च[7], अनुमित्यादेः पूर्वं साध्यत्वा(द्य)भावात्; साध्यत्वं ह्यनुमेयत्वम्, पदजन्यान्वयबोध[8] विषयत्वं पदार्थत्वम्, उपमितिविषयत्वमुपमेयत्वम्। यद् वा—प्रत्यक्षाप्रामाण्ये तदधीनप्रामाण्यानामन्येषां सुतरामप्रामाण्यमिति हृदयम्। परे तु—प्रमायाः पूर्वं प्रमाणसत्त्वे तत्प्रमोपहितसत्त्वेनेन्द्रियार्थसन्निकर्षादितः प्रमाणसहकृतात् प्रत्यक्षाद्युत्पत्तिः, न प्रमाणात् प्रमोत्पत्तिरिति यावत्, प्राथमिकप्रमायामेव व्यभिचारात्, इतरथाऽनवस्थापत्तिरित्याहुः। अन्ये तु प्रमाणस्य सिद्धौ ज्ञाने न ततः प्रमाणसहकृतात्[9] तदुत्पत्तिः, प्रमाणसाधिकायां प्रमायां व्यभिचारात्, न हि कार्यं विना करणसाधकमन्यदस्तीत्याहुः ॥ ९ ॥

1. प्रत्यक्षादौ C, E. 2. इत्यतः C, द्विष्णः E. 3. ०विषय om. A. 4-5. om. C, E, F. 6. ०व्याप्यत्वा० A. 7. च om. C, E, F. 8. ०जन्यानुभवधी० C, F. 9. सहकृता C, E, F.

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥

प्रमायाः पश्चादेव [10]प्रमाणसत्त्वे न[11] प्रमाणेभ्यः प्रमोपहितेभ्यः प्रमेयस्य सिद्धिर्धीः प्रमेति यावत्। अन्ये तु—सिद्धौ ज्ञाने, न हीदमसिद्धं[12] परं साधयतीत्याहुः ॥ १० ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥

युगपदेव प्रमाप्रमाणयोः [सिद्धौ] सत्त्वे प्रत्यर्थनियतत्वं कारणत्वं प्राप्य[13] यत् क्रमवृत्तित्वं कारणोत्तरवृत्तित्वं कारणताघटकोत्तरवृत्तित्वमिति यावत्, तदभावः[14], प्रमाणमादिममित्यर्थः[15]। ×केचित्तु—प्रमाणप्रमेययोर्युगपत् सिद्धौ ज्ञाने प्रमाणप्रमेयज्ञानयो[16]र्युगपदुत्पाद इति यावत्; प्रत्यर्थेति योग्यायोग्यघटादिचक्षुरादिविषयकत्वात्, भिन्नानां घटादिसाक्षात्कारचक्षुराद्यनुमितीनां यौगपद्यप्रसङ्ग इत्याहुः×। परे तु—युगपत् सिद्धिर्यस्य कस्यचित् प्रमाणस्य, सर्वस्य वा; आद्ये न प्रमाणेभ्यः प्रमेयसिद्धिरित्येवोत्तरमिति न पृथगुत्तरितम्; अन्त्ये दूषणान्तरप्याह प्रत्यर्थेति[17], गन्धादिनियतत्वाद् बुद्धीनां घ्राणजादीनां यत्क्रमिकत्वं तदभावप्रसङ्ग इत्यर्थ इत्याहुः ॥ ११ ॥

सिद्धान्तसूत्रम्—

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥

प्रतिषेधस्यापि प्रामाण्यानुपपत्तिः अप्रमाणता[18], उक्तरीत्या कालत्रयेऽपि प्रमाहेतुत्वासिद्धेरिति जात्युत्तरमेतदित्यर्थः ॥ १२ ॥

10-11. प्रामाण्यस्य सिद्धोत्वेन C. 12. हि अयमसिद्धं A. 13. The author seems to invoke the rule ल्यब्लोपे पञ्चमी. 14-15. प्रमाणस्यादिमित्यर्थः A, प्रमाणत्वमर्थः C, E, F. X—X not in A,C, F. 16. ०प्रमाणज्ञानप्रमेय० in MS. 17. प्रत्यर्थेति om. A. 18. ०पत्तिश्च प्रयाणता E.

किञ्च त्वया प्रमाणमात्रं प्रतिषिध्यते, निषेधकातिरिक्तप्रमाणं वा ; नाद्य इत्याह—

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधासिद्धिः ॥ १३ ॥

अन्त्य आह—

तत्प्रामाण्ये वा न सर्वप्रमाणप्रतिषेधः ॥ १४ ॥

तस्य निषेधकस्य प्रामाण्यात्[19], [20]प्रमाजनकतावच्छेदकरूपावच्छिन्न[त्व]ात्[21], प्रमेत्यत्र[22] प्रमा चोपलक्षणम् [?] इत्युक्त्या यदि निषेधकप्रमाणस्वीकारस्तदा तद् युक्त्या[23] सर्वेषामेवि प्रामाण्यमिति न सर्वप्रमाणप्रतिषेध इति ॥ १४ ॥

ननु चक्षुरादिप्रमाणसत्त्वे[24] तेषां प्रमा[25]जनकत्वमुपपद्यते, तदेव तु नास्ति, प्रमाणाभावात् ; कार्यमेव प्रमाण[26]मिति चेन्न, उत्तरवर्त्तिनोऽसाधकत्वादित्याह—

शब्दादातोद्यसिद्धिवत्तत्सिद्धिः ॥ १५ ॥

[27]शब्दात् शब्दविशेषादुत्तरवर्तिन[28] पूर्ववर्तिनः[29] आतोद्यस्य[30] वीणाया सिद्धिवत् तत्[31]सिद्धिः, न हि शब्दादीनामातोद्यादेश्चाक्षुषादीनां वा चक्षुरादेः पूर्ववर्तित्वमपेक्षितम्, किन्तु तद्धियस्तद[32]नुमितेः ; न च तन्नास्तीति भावः। वार्त्तिकटीकादौ तु त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धिरित्येव[33] सूत्रम्, तत्र त्रैकाल्याप्रतिषेधः मानमेययोः

---

19. प्रमाणात् A, E. 20. प्रमेत्यस्य प्रमाजनकता० in all available MSS. 21. स्वरूपसतः add. C. 22. प्रमेत्यर्थं C, E, F. 23. तद्व्यक्त्या A, तद्बुद्ध्या E. 24. ०प्रतिमाण० C. 25. प्रमाण० C. 26. मान० C. 27. (न)शब्दात् C. 28. ०वर्तितः A. 29. ०वर्तिन्या A. 30. आतोद्यस्य om. A. 31. तत्० om. E. 32. ०धियं तद० C. 33. ०सिद्धिरिति तत् C.

त्रैकाल्यासिद्धेरभावः शब्दात् शब्दादित आतोद्यसिद्धिः आतोद्यादि-सिद्धिः, तथा च उत्तरवर्त्तिनः प्रमाणात् शब्दात् पूर्ववर्तिनः प्रमेयस्यातोद्यस्य सिद्धिवत्, पूर्ववर्तिनः पिपीलिकाण्डसञ्चरणात् प्रमाणात् परवर्तिनः प्रमेयस्य वर्षणस्य[34] सिद्धिवत्, समसमयवर्त्तिनः प्रमाणात् तदीयगन्धात्तदीयरसस्य प्रमेयस्य सिद्धिवत् अन्यत्रापि यथादर्शनं तत्सिद्धिरिति भावः। वस्तुतस्तु त्रैकाल्याप्रतिषेधश्चेति सूत्रादित्थं भाष्यम्, भास्करतत्त्वबोधादौ तत्शून्यस्यैव सूत्रस्य पाठादिति ध्येयम्[35] ॥ १५ ॥

नन्वेवं चक्षुरादीनां प्रमेयत्वे कथं प्रमाणता, तयोर्विरोधादित्यत्राह—

प्रमेया च तुलाप्रामाण्यवत् ॥ १६ ॥

तुलायाः परगुरुत्वेयत्तापरिच्छेदे[36] साऽपि परेण स्वगुरुत्वपरिच्छेदे प्रमेया। यद् वा—कदाचित्[37] संसर्गेण प्रामाण्यवती यथा[38] स्यात् तथा तुला प्रमेया इत्यर्थः, एवं चान्यत्रापि तयोर्न विरोध इति भावः। टीकादौ तु—यत्पुनराक्षिप्यते यदनियतं तन्न [39]परमार्थसत्, यथा रज्ज्वामारोपितं सर्पत्वम्[40], तथा च प्रमाणप्रमेयभावस्तस्मान्न परमार्थ-सन्निति[41], तत्रेदमुत्तर[42]सूत्रम्; अनियतपारमार्थिकनिमित्तसमावेशेन संज्ञासमावेशस्य तुलादौ दर्शनादप्रयोजकमिदमिति भाव इति ॥ १६ ॥

शङ्कते—

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥

चतुर्णां प्रमाणानां स्वतः सिद्धावात्माश्रयः परस्परसिद्धावन्योऽन्याश्रय

---

34. वर्षस्य C. 35. इति ध्येयम् om. C, E, F. 36. ०परिच्छेदे: A. 37. C reads प्रकारिता instead of कदाचित्. 38. प्रामाण्यवद्यथा C, E, F. 39-40. परमार्थसमर्था रज्वारोपितं न सिद्धं A. 41. ०सत्त्विति C. 42. तत्रेर्यतर० F.

इति पञ्चमप्रमाणसिद्धिप्रसङ्गः, एवं बहुनामपि प्रमाणानां सिद्धिप्रसङ्गो बोध्य इत्यर्थः ॥ १७ ॥

अथ प्रमाणं विनैव प्रमाणसिद्धिर्भविष्यतीत्यत्र[43] आह—

तन्निवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः ॥ १८ ॥

तस्य प्रमाणस्य निवृत्तेर्वाऽभावे[44]ऽपि प्रमाणानां सिद्धौ तद्वदेव प्रमेयसिद्धिरपि स्यादिति, किं प्रमाणमात्रेणेत्यर्थः ॥ १८ ॥

सिद्धान्तसूत्रम्—

प्रदीपप्रकाशसिद्धिवत्तत्सिद्धिः ॥ १९ ॥

क्वचिदेतदादौ नकारोऽपि दृश्यते। यथा प्रदीपोद्योतो घटादिकं प्रकाशयति, तञ्च[45] चक्षुरादिकम्; तथा चक्षुरादिकं[46] घटाध्यक्षं जनयति, तदध्यक्षेण चक्षुराद्युन्नीयते, तदध्यक्षञ्चानुव्यवसायेन गृह्यते, स च तत्प्रत्यक्षादिना, अनवस्था च प्रामाणिकीति भावः ॥ १९ ॥

अन्ये तु—प्रदीपप्रकाशस्य प्रदीपान्तरं विना स्वत एव सिद्धिवत् प्रमाणमपि प्रमाणान्तरं विनैव सिध्यतीत्यर्थमाहुः, तान् प्रत्याह—

क्वचित्तन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तिकः ॥ २० ॥

प्रमाणान्तरनिवृत्तौ दृष्टान्तोऽनैकान्तोऽनियतः[47]; क्वचित् प्रदीपादौ-प्रदीपान्तरनिवृत्तिदर्शनात् क्वचिच्च घटादौ [48]तदनिवृत्तिदर्शनात् ॥ २० ॥

[49]ननु भवद्व्याख्याने कथं नानैकान्त इत्यत्राह[50]—

विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनु[51]ज्ञानादप्रतिषेधः ॥ २१ ॥

विशेषेण व्याप्यत्वपक्षवृत्तित्वादिना हेतोः कार्यरूपस्य परिग्रहे[52] निश्चये

43. ०अत्र om. A. 44. ०र्वा तदभावे० A. 45. तथा C. 46. चक्षुरादिः A. 47. दृष्टान्तो नैकस्मिन्नर्थोऽतो नियतः C. 48. तदपि वृत्ति० C. 49. सन्नत्वद् व्याख्याने C. 50. इत्यत आह C. 51. ०संहारायर्थ० C. 52. परिग्रहे om. C.

सत्युपसंहारस्य प्रमाणानुमितेरभ्यनु[53]ज्ञानादनेकान्तात्मकः प्रतिषेधो न भवतीत्यर्थः[54]। इदं न सूत्रं तत्त्वबोधादावभावात्, किन्तु भाष्यमिति वस्तुगतिः।

परे तु प्रमाणत इति सूत्रस्यायमर्थः—प्रमाणानां प्रमात्वविशिष्टानां प्रमाणत एव सिद्धेः प्रमाणान्तरस्य ज्ञाततायाः सिद्धिप्रसङ्गः, ज्ञानस्यातीन्द्रियत्वेन ज्ञाततयैवा[X]नुमेय[55]त्वेन सुतरां तत्प्रामाण्यस्य तथैवा[X]नुमेयत्वादिति। द्वितीयमभिहितार्थम्। यद् वा—अथ स्वयमेव स्ववृत्तिधर्मो गृह्यते, किं तत्र प्रमाणान्तरापेक्षयेत्याह द्वितीयसूत्रम्, तन्निवृत्तेर्वा स्वेन[56]प्रमात्वविशिष्टस्वसिद्धिवत् स्ववृत्तिप्रमेयान्तरस्यापि घटादि[57]समानकालीनत्वस्यापि[58] सिद्धिप्रसङ्ग इति तदर्थः। सिद्धान्तसूत्रस्यायमर्थ—प्रदीपो यथा प्रत्यक्षेण [Y]प्रकाशः, तद्गतमुद्भूतत्वविशिष्ट[Y] रूपं यथाऽनुमानात् सिध्यति, तथा ज्ञानं प्रत्यक्षेण, तद्गतप्रामाण्यं प्रवृत्तिजनकज्ञानत्वादिलक्षणानुमानेन सिध्यतीति, न हि ज्ञानमतीन्द्रियम्, 'इच्छामी'त्यादिवज्'जानामी'ति साक्षात्कारस्य सर्वानु[59]भवसिद्धत्वात्[60]। तुरीयसूत्रार्थस्तु—क्वचित् प्रवृत्तिजनके प्रामाण्यस्य निवृत्तिरित्यादि, तथा च व्यभिचारेण प्रवृत्तिजनकज्ञानत्वेन[61] न प्रामाण्यमनुमेयमिति भावः। स साध्यत्वम् [?]। पञ्चमसूत्रे विशेषहेतुः समर्थप्रवृत्तिजनकज्ञानत्वम्। यद् वा—ज्ञातताजनकत्वेन न प्रामाण्यानुमानं व्यभिचारादिति परमते कस्यचिद् दूषणं तुरीयसूत्रेणोद्भाव्य

53. ०मितेरत्यनु० C. 54. ०अर्थः om. C. X–X not in A. 55. ०वार्थमे० C. 56. स्वत C. 57. ०घट० A. 58. ०त्वादेपि A. Y-Y. प्रकाशः आलोकगत सुस्थतत्त्वविशिष्टं C, F (which reads आलोक्यते instead of आलोकगत). 59. स्तर्का० C. 60. इति भावः add. A. 61. ०जनकत्वेन C, F.

पञ्चमेन स्वयं निरस्यति, विशेषहेतुर्यथार्थज्ञाततजनकज्ञानत्वम्। प्रोक्त-पञ्चमसूत्रानभ्युपगमे तु तुरीयसूत्रमेवमुत्थापनीयम्—ननु तत्प्रकारक-ज्ञानत्वेनैव प्रामाण्यमनुमीयतां कृतमितरविशेषणेनेति वादिनं प्रभाकरं प्रत्याह क्वचिदिति। एवं वा तुरीयसूत्रमुत्थाप्य समूहालम्बनविशेषे[62] व्यभिचारेण यः[63] प्रामाण्यानुमितेः प्रतिषेधस्तन्निराकरणाय पञ्चमसूत्रम्, तत्र[64] विशेषहेतुः तद्वद्विशेष्यकत्वावच्छिन्न[65]तत्प्रकारकत्ववत्प्रवृत्ति-जनकज्ञानत्वम्॥ २१॥

॥ समाप्तं प्रमाणसामान्यपरीक्षाप्रकरणम्॥

अथ प्रत्यक्षपरीक्षा। तत्राक्षेपसूत्रम्[1]—

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात्॥ २२॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमित्यस्य इन्द्रियजन्यमर्थजन्यं सन्नि-कर्षजन्यं ज्ञानमिति लक्षणत्रयमर्थः[2], तेषाञ्च प्रत्यक्षलक्षणानामनुपपत्ति-रितरभेदासाधकत्वम्, असमग्रेऽप्रत्यक्षे आत्ममनोऽनुमित्यादौ वचनात्[3] वृत्तेः[4]; समग्रधर्मविशिष्टस्यानतिव्याप्तानव्याप्तस्यावचनात्, अतिव्याप्त-त्वादिति यावदिति वा[5] भावः॥ २२॥

अत्र ज्ञानसामान्यं प्रति आत्मा मनस्तत्सन्निकर्षो वा न हेतुर्मानाभावा-दिति कश्चिदाह, तत्राह—

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः॥ २३॥

आत्ममनसोरभावे तत्सन्निकर्षाभावे च न प्रत्यक्षोत्पत्तिर्न[6] ज्ञान-

62. ०लम्बनविश्लेषे C. 63. शः C. 64. तत्र om. C, F. 65. तद्विशेष्यकत्वावच्छेदेन C.

1. Here, आक्षेपसूत्र stands for पूर्वपक्षसूत्र. 2. ०त्रयमिथः A. 3. वचनात् om. C, F. 4. वृत्तित्वात् C, F. 5. वा om. C, F. 6. न om. C, F.

मात्रोत्पत्तिः, तथा चान्वयव्यतिरेकानुविधायित्वमेव[7] मानमिति भावः ॥ २३ ॥

अत्राशङ्कते—

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २४ ॥

तेषामन्वयव्यतिरेकानुविधायित्वात्, तथा चातिप्रसङ्गात्तन्न कारणताग्राहकमिति भावः ॥ २४ ॥

अत्रोत्तरम्—

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २५ ॥

आत्मनो ज्ञानसमवायित्वादनवरोधः[8] कारणत्वाभावो नेत्यर्थः; न हि समवायं विना समवेत कार्यं जायत इति भावः ॥ २५ ॥

तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २६ ॥

अनवरोध[9] इत्यनुषज्यते। तेषां ज्ञानानामयौगपद्यं यस्माद्यज्जातीयान्मनःसंयोगात्तस्य लिङ्गत्वाद्धेतुत्वान्मनसश्चाकारणत्वा[10]भावः। कार्यस्या[11]समवायिकारणजन्यत्वनियमात् मनःसंयोगस्य हेतुत्वे मनसोऽपि हेतुत्वम्, न हि व्यापारेण व्यापारिणोऽन्यथासिद्धिरिति भावः। यद् वा—मनसो ज्ञानायौगपद्यलिङ्गत्वाज्ज्ञानानामयौगपद्यं लिङ्गं यत्र तत्त्वात्, इन्द्रियमनोयोगद्वारा ज्ञानविशेषं प्रति मनसो हेतुत्वे कल्प्यमाने जन्यज्ञानसामान्यं प्रत्येव मनोयोगद्वारा मनसो हेतुत्वं कल्प्यत इति भावः। यद् वा—पूर्वसूत्रे नानवरोध[12] इत्यस्य[13] [14]अप्रक्रान्तत्वकमनोयोगान्वयेनात्म[15]मनोयोगस्य नाकारणत्वमित्यर्थः। अत्र हेतुरात्मनो [X]ज्ञान-

---

7. ०मेव om. C. 8. ०नवबोधः C, F. 9. अनवरतबोध F. 10. ०मनःसञ्चारणत्वा० C, मनः संस्मरणत्वा० F. 11. Here, कार्य=भावकार्य. 12. ०सूत्रेण न विरोधे C, F. 13. इत्यत्र A. 14-15. प्रक्रान्तत्वादात्म० C, F. X—X. ज्ञानसामान्यं प्रत्येव मनयोगद्वारा

समवायित्वादिति समवेतकार्यस्यासमवायि[16]कारणजन्यत्वनियमादिति भावः[x]। आत्ममनःसंयोगस्य नानवरोध इत्यत्र हेत्वन्तरमाह तदयौगपद्येति सूत्रेण, तथा च ज्ञानविशेषे[17] कारणमनःसंयोगहेतुकत्वदर्शनात् जन्यज्ञानत्वेन तद्धेतुकत्वानुमानादात्ममनोयोगस्य हेतुत्वमिति भावः। एवञ्चेन्द्रियार्थसन्निकर्षोत्पन्नत्वस्यैकस्यैव लक्षणस्य तद्वाक्यार्थत्वेऽपि[18] न क्षतिर्न वाऽऽत्ममनसोः सन्निकर्षाभाव इति सूत्रे आत्ममनसोरभावेनाप्यन्वय इति मन्तव्यम्।

वस्तुतस्तु दिग्देशेत्यादिसूत्रत्रयमेवमुत्थापनीयम्—नन्वात्ममनसोर्विभुनोर्न नियतव्यतिरेकोऽस्ति[19], आत्मन्यात्मव्यतिरेकेऽपि ज्ञानोत्पत्तेः; न वा क्वचिदात्मनि मनोव्यतिरेकः, मनसो विभुत्वेन सर्वात्मना सहाजसंयोगित्वा[20]दात्मनि तद्व्यतिरेकासिद्धेः[21]। अनात्मनि व्यतिरेकस्तु न हेतुताग्राहकः, समवायिकारणत्वाभावादेव तत्र[22] कार्यानुत्पत्तेरन्यथासिद्धत्वात्। अथ क्वाचित्को यथा तथा व्यतिरेकः कारणताग्राहकस्तर्हि दिगादीनामपि हेतुत्वं स्यात्, रूपादौ संयोगेन तद्विरहे ज्ञानव्यतिरेकादित्यभिप्रायवानाशंकते — दिगिति। आत्ममनसोरनन्यथासिद्धावेव नियतव्यतिरेकौ स्तः, आत्मनो ज्ञानसमवायित्वात्, समवायिकारणस्य च तादात्म्येनाभावस्य कारणताग्राहकव्यतिरेकशरीरनिविष्टत्वात्, अस्ति च यत्रात्मभेदस्तत्र समवायेन ज्ञानविरह इति; मनसश्च विभुत्वं धर्मिग्राहकमानबाधितमित्यभिप्रायवानुत्तरमाह[23] ज्ञानेति सूत्रद्वयेनेति[24] परमार्थः॥ २६॥

मनसो हेतुत्वं कल्प्यत इति भावः C, which is a repetition of an earlier line. 16. ०कार्यस्य समवायि० F. 17. ज्ञानानविशेषे C, F. 18. ०वाक्यार्थोऽपि C. 19. ०व्यतिरेकेति C. 20. सहाजसंयोगसत्त्वा० A, महाजनसंयोगित्वा० C, F. 21. ०सिद्धेत् C. 22. तत्तत् F. 23. ०वान् सिद्धान्तमाह C, F. 24. सूत्रत्वामानति C.

सिद्धान्तसूत्रम्—

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य पृथग्वचनम् ।। २७ ।।

वचनं लक्षणम्, पृथक् अनुमित्यादिव्यावृत्तम्, इन्द्रियार्थयो[25]स्तत्-सन्निकर्षस्य च प्रत्यक्ष एव निमित्तत्वस्य लक्षणघटकत्वादित्यर्थः। भाष्यादौ तु स्वशब्देन वचनमिति पाठः,[26] तस्य स्वशब्देनासाधारण-शब्देनानुमित्यादिव्यावृत्तधर्म[27]प्रतिपादकशब्देन लक्षणवचनं तन्निर्वचनं कृतमित्यर्थः। ज्ञानत्वविशेषितं ज्ञानत्वानवच्छिन्नेन्द्रियजन्यत्वं तादृश-तत्सन्निकर्षजन्यत्वं विषयत्वेनार्थजन्यत्वञ्च, तद्वद्वृत्तिरनुभवत्वा-व्यापक[28]जातिर्वा लक्षणमिति भावः। इन्द्रियार्थसन्निकर्षघटितमेक-मेव लक्षणमभिप्रेत्य सिद्धान्तसूत्रमित्यपि कश्चित् ।। २७ ।।

इन्द्रियार्थसन्निकर्षोत्पन्नपदं तद्विशेषपरमतोऽपि न दोष इत्याह—

सुप्तव्यासक्तमनसाञ्चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ।। १८ ।।

सन्निकर्षो निमित्तं यत्रेति बहुव्रीहिः, तथा च सुप्तानां व्यासक्तमनसां योगिनाञ्चेन्द्रियार्थसन्निकर्षनिमित्तकस्य[30] प्रत्यक्षस्य स्वापस्य[31] योगज-विलक्षणज्ञानस्य च लक्षणघटकत्वादपृथग्वचनमित्यर्थः, स्वापवृत्तिर्वा या तादृशी[32] जातिस्तद्वत्त्वं लक्षणमिति भावः ।। २८ ।।

प्रकारान्तरमप्याह—

तैश्चापदेशो ज्ञानविशेषाणाम् ।। २९ ।।

तैरिन्द्रियैरर्थैस्तत्सन्निकर्षैश्च विशेषज्ञानानामितरव्यावृत्तज्ञानानामपदेशो-

25. इन्द्रियान्वयो C. 26. भाव: C. 27. ०धर्म्यं० C. 28. ०भवत्वाद्-व्यापक० F. 29. ०जातिविलक्षण० A. 30. ०निमित्तस्य C, F. 31. मुपेत्य C. 32. यतोदृशी C.

ऽभिधानमिन्द्रियार्थसन्निकर्षोत्पन्नशब्देन[33], तथा च चक्षुर्जन्यज्ञाने चाक्षुषे चक्षुःसंयोगजे[34] वा घटजे वा समवेता[35] या तादृशी जातिस्तद्वत्त्वं लक्षणम्, एवमन्यान्यपि बोध्यानि। यद् वा—विशेषलक्षणमाह—तैश्चेति। प्रत्यक्षविशेषाणां व्यपदेशो लक्षणमपि तैरिन्द्रियार्थसन्निकर्षैश्चक्षुर्जन्यं ज्ञान[36]मित्यादीनि[37] सुखनिर्विकल्पवृत्ति[38]-प्रत्यक्षत्वव्याप्यजातिमत्त्वादीनि चक्षुःसंयोगजन्यवृत्तितादृशजातिमत्त्वादीनि च[39] विशेषलक्षणानीति भावः॥ २६॥

शङ्कते—

व्याहतत्वादहेतुः॥ ३०॥

इन्द्रियार्थसन्निकर्षो न हेतुः, व्याहतत्वात्, आकाशादौ तत्सत्त्वेऽपि फलस्य व्याघातादिति॥ ३०॥

उत्तरम्—

नार्थविशेषप्राधान्यात्॥ ३१॥

अर्थ[40]विशेषे रूपादिमति सन्निकर्षस्य प्राधान्यात् प्रत्यक्षजनकत्वादित्यर्थः।

यदि च 'ज्ञानलिङ्गत्वादात्मनो नानवरोधः' 'तदयौगपद्यलिङ्गत्वाच्च न मनसः' इति सूत्रद्वयमपि[41] सिद्धान्तपरमिति भाष्यकारादीनां शपथस्तदा दिग्देशेत्यादिसूत्रत्रयमित्थं व्याख्येयम्—ये पुनरन्वयसहचारेणात्मनः-

---

33. ०मिन्द्रियार्थसन्निकर्षोत्पन्नशब्देन has been put within brackets in A. 34-35. वाघटाज॰ासमवेता C, वाघटाजरासमवेता F, 36. After ज्ञान०, A has some additional reading, which is too faint to be deciphered. Reading here after C and F. 37. ०दिनी A. 38. ०कल्पकबुद्धि० C. 39. च om. C,F. 40. नन्वर्थ० C. 41. ०द्वयमिति C.

सन्निकर्षहेतुत्वमाहु[42]स्तान् प्रत्याह दिग्देशेति ; तेषामप्यन्वयसहचारात् कारणत्वं स्यादिति भावः। राद्धान्त[43]माह—ज्ञानेति ; आत्मनो ज्ञानसमवायित्वादनवरोधो[44] लक्षणाघटकत्वं नेत्यर्थः, अर्थपदेन [45]ज्ञानानाश्रयस्योक्तत्वात्, तदनाश्रयस्यैव[46] तत्कर्मत्वादिति भावः। यद् वा—ज्ञानसमवायित्वमात्रत्वादर्थत्वाभावादित्यर्थः, अर्थत्वमिह पारिभाषिकं [47]प्रागुक्तगन्धाद्यन्यतमत्वमिति भावः। तदयौगपद्येति। तदयौगपद्यलिङ्गत्वमात्रत्वादनिन्द्रियत्वादित्यर्थः, इन्द्रियत्वमिह [48]प्रागुक्तं चक्षुराद्यन्यतमत्वमिति भावः।

भाष्यकारप्रभृतयस्त्वेवं व्याचक्षते सूत्राणि—इन्द्रियार्थसन्निकर्षोत्पन्नमिति न लक्षणपरम्, अतिव्याप्तेः, किन्तु कारणप्रदर्शनपरमिति मत्वा शङ्कते—प्रत्यक्षेति। प्रत्यक्षकारणप्रदर्शनानुपपत्तिः समग्रकारणावचनात्, आत्ममनोयोगेन्द्रियमनोयोगादेरवचनादित्यर्थः ; यदि कारणमभिधेयं तर्ह्यन्यदपि तदुच्यताम्, नो चेदिदमपि[49] नाभिधीयतामिति भावः। अत्रात्ममनोयोगो हेतुरेव न, मानाभावात्, क्व तत्प्रदर्शनाप्रदर्शनचिन्तेति कश्चिदाह, तं प्रत्याह—नात्मेति। ये पुनरन्वयमात्रेण हेतुत्वमाहुस्तान् प्रत्याह—दिगिति। ^X^एवमपि प्रत्यक्षहेतुत्वाद्वक्तव्यता [50]प्रसङ्ग इति तु तत्त्वबोधकृदर्थमाह। आत्ममनोयोगादेः कारणत्वमर्थतो लब्धमतो[51] नात्र तत्प्रदर्शितमित्यभिप्रायेण सिद्धान्तमाह—ज्ञानेति।^X^ आत्ममनोयोगस्य नाकारणत्वम्, आत्मनो[52] ज्ञानसमवायित्वात्, ज्ञानस्य समवेतकार्यत्वेनासमवायिकारणजन्यत्वानुमानेनात्ममनोयोग[53]-हेतुत्वसिद्धेर्नात्र तदुक्तमिति भावः। इन्द्रियमनोयोगहेतुत्वमपि प्रकारान्त-

---

42. °हेतुमाह° C. 43. वाध्यस्त° C. 44. °नवबोधो C, F. 45-46. ज्ञानानाश्रयस्यैव C. 47. See N.S 1.1.14 48. See N.S 1.1.12. 49. चेदिदमिति C, X-X. om. A. 50. °त्वादुक्तव्यता° C. 51. वचनतो C. 52. आत्ममनो° C. 53. °जन्यत्वानुमानायोग° C.

रलब्धमित्याह—तदयौगपद्येति। इन्द्रियमनोयोगस्य नानवरोधो[54] किन्तु[55] तस्य कारणत्वम्, मनसो ज्ञानायौगपद्यलिङ्गत्वादित्यर्थः। अथार्थेन्द्रियसन्निकर्षस्यापि हेतुत्वस्य प्रकारान्तरलब्धत्वेन[56] तदपि नोच्यतामिति प्रकारान्तरमाह—प्रत्यक्षेति। प्रत्यक्षासाधारणनिमित्तत्वाच्चेत्यर्थः। वचनं लक्षणसूत्रे, आत्ममनोयोगस्तु साधारण इति तन्नोक्तमिति भावः। इन्द्रियमनोयोगस्यानभिधाने हेत्वन्तरमाह—सुप्तेति। सुप्तानां योगिनाञ्च प्रत्यक्षस्य इन्द्रियार्थसन्निकर्षनिमित्तकत्वात् तद्वचनमित्यर्थः। न हि मानसं तज्ज्ञानमिन्द्रियमनोयोगनिमित्तकं येन तदप्य[57]भिधीयेत, तथा च निखिलजन्याऽध्यक्षजनकतया प्राधान्येन इन्द्रियार्थसन्निकर्ष एवोक्त इति भावः। हेत्वन्तरमाह—तैश्चेति। तैरिन्द्रियैरर्थैश्च ज्ञानविशेषाणां व्यपदेशश्चाक्षुषं रासनं रूपज्ञानं रसज्ञानमित्यादि, अतस्तस्य प्राधान्येन निर्देशः कृत इति भावः। एतावतेन्द्रियसन्निकर्ष एव कारणमित्युक्तमिति भ्रान्त आशङ्कते—व्याहतत्वादहेतुः। प्रत्यक्षनिमित्तत्वादित्यादित्रिसूत्र्याऽभिहितो हेतुरहेतुः, आत्ममनोयोगादेरपि तद्धेतुत्वेन व्याहतत्वात्। उत्तरम्—नार्थविशेषप्राधान्यात्। न अर्थविशेषस्येन्द्रियार्थसन्निकर्षस्य प्राधान्यज्ञापकत्वात्, त्रिसूत्र्येति शेषः, न हि तयेतरहेतुता व्यवच्छिद्यत इत्याहुः॥ ३१॥

प्रसङ्गात् प्रत्यक्षस्यानुमानत्वं[58] शङ्कते—

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः॥ ३२॥

एकदेशस्य पुरोभागस्य ग्रहणा[59]दवयविन उपलब्धेः प्रत्यक्षत्वेनाभिमत-

---

54. ०योगस्यानवरोधने A; योगस्य नानवबोधो C. 55. किन्तु om. C, F. Retained here in the light of a marginal insertion in A. 56. न add. A. 57. तद्यप्य० C. 58. प्रत्यक्षस्य प्रमाणान्तरत्वं C, F. 59. दर्शना० C, F.

मनुमितिः, ज्ञानकरणकत्वाद् विशिष्टज्ञानकरणकत्वाद्वेति[60] भावः ॥३२॥

प्रत्यक्षत्वेनाभिमते सर्वत्रानुमितित्वं साध्यते, [61]अवयविविषयके वा, नाद्य[62] इत्याह—

न प्रत्यक्षेण यावत्तावतोऽप्युपलम्भात् ॥ ३३ ॥

यावत्तावतो यस्य कस्याप्येकदेशदर्शनस्य प्रत्यक्षत्वमनवस्थाभिया त्वयाप्यभ्युपेयमिति भावः ॥ ३३ ॥

द्वितीय आह[63]—

न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३४ ॥

एकदेशस्यैवोपलब्धिः प्रत्यक्षमिति, न चैकदेशाध्यक्षेऽवयविनोऽपि विषयतया सद्भावात्, अवयविन्यपि तदिन्द्रियसन्निकर्षादिसत्त्वादिति वाऽर्थः, सामग्रीसत्त्वात्तदाऽवय[64]विनोऽप्युपलब्धिरिति भावः। ज्ञानकरणकत्वं व्यभिचारि[65], विशिष्टज्ञानकरणकत्वञ्चासिद्धमि[66]त्यपि ध्येयम्।

नव्याः पुनरेवं वर्णयन्ति—प्रत्यक्षलक्षणमनुमिति[67]व्यावृत्तं वक्तुमशक्यं[68] तस्या अपि प्रत्यक्षत्वादिति शङ्कते—प्रत्यक्षेति। अनुमानम् अनुमितिः प्रत्यक्षम्, एकदेशे पक्षादौ ग्रहणात् सन्निकर्षात्, एकदेशे प्रत्यक्षत्वस्य उपलब्धेश्चेत्यर्थः, 'पर्वतं पश्यामी'त्यादि[69] प्रत्यक्षात् पर्व-

60. Neither of the two reasons adduced here are adequate, unless one interpretes विशिष्टज्ञान as व्याप्तिविशिष्टपक्षधर्मताज्ञान. All cases of परोक्षप्रमा are ज्ञानकरणक. See note no. 65. 61-62. अवयविविषया करणकत्वे C. 63. याह A. 64. ०सत्वा तु साऽवय० C. 65. उपमिति is सादृश्यज्ञानकरणक, and शाब्दबोध is पदज्ञानकरणक, while neither of them is a case of अनुमिति. 66. See note no. 60. 67. ०लक्षणं नानुमिति० C, F. 68. वक्तुमर्हं C, F. 69. ०आदि० om. A.

ताद्यंशेऽनुमितेः प्रत्यक्षत्वमिति भावः। उत्तरमाह—नेति। [70]यावत्तावत् पूर्वभावि परभावि वा पर्वतादेः प्रत्यक्षमभिव्याप्य [?] प्रत्यक्षत्वेनोपलम्भात् नानुमितेः प्रत्यक्षतयोपलम्भ इति भावः। यद् वा—यावत्तावदपि साध्याद्यंशेऽप्रत्यक्षतयोपलम्भात्, 'वह्निं न साक्षात्करोमी'त्युपलम्भात् (च) अनुमितिर्न प्रत्यक्षमिति सिद्धान्तसूत्रार्थः। यद् वा—प्रत्यक्षेण सन्निकर्षेण यावत्तावद् व्याप्यत[71] इति शेषः, सकलविषये सन्निकर्षाभावान्न तस्य प्रत्यक्षत्वमिति भावः। ननु साध्यादावपि ज्ञानस्य सन्निकर्षस्य सत्त्वादस्त्येव सकलविषयसन्निकर्ष इत्यत आह—अप्युपलम्भादिति। साध्यादावनुमितित्वप्रत्यक्षत्वाभावादेरुपलम्भादपीत्यर्थः। ननु पक्षाद्यवच्छेद एवानुमितौ प्रत्यक्षत्वं स्यादन्यावच्छेदेन तदभावः, न चैवं पूर्वभावीत्यादिकुसृष्टिकल्पनमपि, धारावाहिकानुमितित्रयेऽप्यनुमित्युत्पत्तिसमयेऽपि तथानुव्यवसायो[72] कथं निर्वाह्यः[73], प्रत्यक्षमितिसामग्र्याः प्रतिबन्धकत्वञ्चैवं स्यात्, तथा सत्यतीवगौरवमित्यत्राह—न चेति। एकदेशेन किञ्चिदवच्छेदेन तत्प्रत्यक्षमिति न, जातेरवयविन इव सद्भावात्, जातेर्व्याप्यवृत्तित्वादिति यावत्, न चैवं नियमे मानाभावः[74], तदा 'वह्निं साक्षात्करोमी'त्यादि[75]धीप्रसङ्गादिति भावः।

अत्र वदन्ति—तस्मिन् ज्ञाने वह्निविषयकत्वसाक्षात्कारत्वे गृह्यत एव, अनुमितित्वमपि पर्वताद्यवच्छेदेन, वह्न्यंशे साक्षात्कारत्वन्तु न गृह्यते, वह्नेस्तद्विषयकत्वस्य वा तदवच्छेदकत्वाभावात्, पक्षादिनाप्यसन्निकर्षे सर्वांश एवानुमितेः[76] साङ्कर्यमेव स्यादिति चेत्; न हि सङ्कीर्णयोरपि जातित्वे बाधकमन्यत् साधकमन्तरेण, सन्तु वाऽनुमितित्वादयः उपाधय एवाखण्डाः, जयतु च जैमिनी(या)नां† मतम्। ये तु

70. न add. C, F. 71. ०व्याप्य A. 72. ०साया A 73. प्रत्यक्षं add. A. 74. ०भावात् A. 75. ०आदि० om. C. 76. ०मितिः A.

† Ramabhadra is perhaps referring here to the view of

विभिन्नयोः प्रत्यक्षानुमित्योर्यौगपद्यमङ्गीकृत्य दूषणानि निरस्यन्ति तेऽपि गौरवेण निरसनीयाः। अस्ति च साध्यादावपि ज्ञानं सन्निकर्ष इति तत्रापि प्रत्यक्षत्वमेव, परन्तु न लौकिकत्वविशेषितम्, अतीतदण्डादिमत्तया प्रत्यभिज्ञान इवेत्यनुमितित्वादिव्याप्यमेव साक्षात्कारत्वम्, असङ्कीर्णं[77] च चाक्षुषत्वादिनेति[78] परमार्थः। एतेन शाब्दादि[79]व्याख्यातमिति दिक्॥ ३४॥

॥ समाप्तं प्रत्यक्षपरीक्षणम॥

अथ प्रसङ्गादवयविसद्भावादित्युपोद्घातेन वाऽवयविपरीक्षा—

साध्यत्वादवयविनि सन्देहः॥ ३५॥

[x]संशयानुगुणं साधारणधर्ममाह—साध्यत्वादिति। साध्यत्वं ज्ञेयत्वम्। साधारणधर्मवत्यवयविनि सन्देह इत्यर्थः[x]। स च द्रव्यं समवेतं न वेत्याकार(क)[1] इति केचित्, तन्न, कपालादौ घटादेः स्वरूपसम्बन्धसिध्याऽर्थान्तरत्वापत्तेः। द्रव्यं संयोगाद्यतिरिक्तद्रव्यसम्बन्धवन्न वेत्याकारकः[2] सः, तादृशसम्बन्धवत्ता च[3] विज्ञान एव प्रसिद्धेत्यपरे[4],

प्राभाकरमीमांसक-s, who do not admit any जाति residing in गुण and कर्म. अनुमिति being a variety of ज्ञान, is a गुण, and cannot thus be characterized by a जाति. The uniform and unanalyzable properties residing in अनुमिति are thus to be treated as cases of अखण्डोपाधि. 77. कारत्वस्य सङ्कीर्णं C, F. 78. ०त्वादीनामिति C, F. 79. शब्दादेः A. X-X. This portion occurs as a marginal insertion in A. Omitted in other manuscripts. See, however, f. n. 14.

1. वाधाकार C. 2. सम्बन्धरथंवेद्याकारः C, सम्बन्धरथंवत्त्वाकारः F. 3. ०वत्ता च om. A. 4. प्रसिद्धेरित्यपरे C, F.

तदपि न, विधौ सिद्धसाधनात्, निषेधे च बाधात्, बौद्धैरपि द्रव्ये द्रव्यान्तरस्योपादानोपादेयभावस्वरूपसम्बन्धस्वीकारात्। अथेदं द्रव्यं [5]स्वसमानकालीनद्रव्योपादानवन्न[6]वेत्याकारकः सः, न चेदं बौद्धाः स्वीकुर्वन्ति, तन्मते जगत एव क्षणिकत्वेनोपादेयस्योपादानासमानकालीनत्वादिति चेन्न, क्षणिकत्व एव विवादपर्यवसानात्; तस्मादिदं द्रव्यम् [Y]एतदन्योपादेयोपादानं न वेत्याकारकः सः, तदुपादेयत्वं संयोगाद्यतिरिक्तेन तत्र सम्बद्धत्वम्, तदुपादानत्वञ्च तेन तद्वत्त्वमिति[Y]। न चैतद[? चैवम]न्यद्रव्योपादेयद्वित्वसंयोगादिमत्तया सिद्धसाधनबाधौ, तैराश्रयातिरिक्तद्वित्वानङ्गीकरणात्; अस्तु वा द्रव्यत्वमप्युपादेय[7]विशेषणम्, एतेन विधौ द्वित्वमादायार्थान्तरप्रसङ्गोऽपि निरस्तः। यद् वा—द्रव्यमुभयो[8]पादेयं न वेत्याकारकः सन्देहः[9], तन्मते [Z]विधिप्रसिद्धेर्युगपदुत्पन्नानेकविज्ञानोपादेयैकविज्ञाने द्रव्यत्वावच्छेदेन विधिनिषेधसिद्धे[10]रुद्देश्यत्वान्नांशतः सिद्धसाधनम्। अथवा—द्रव्यमणुर्न वेत्याकारकः सः[Z], विधिनिषेधयोः पक्षतावच्छेदको[11] (द्रव्यत्वम्), तत्सामानाधिकरण्यासिद्ध[? °करण्येन सिद्धे-]रुद्देश्यत्वान्नांशतः सिद्धिबाधौ। वस्तुतः [12]स्पर्शवदणुर्न वेत्याकारकः[13] [M]सः, तेन (न) निषेधेनात्मसिद्ध्याऽर्थान्तरत्वमिति। बौद्धैकदेशिनये तु तन्तुः पटो न वेत्याकारकः सः[M], ते हि तथोत्पन्नपरमाणौ तन्तुत्वपटत्वादि(कं) स्वीकुर्वन्ति। न च सतः

---

5. स्व० om. A. 6. ०पादानन्न C, F. Y—Y. एतदन्येद्रव्ये संवन्धं यूत्तादृशसंवन्धेन तत्वन्तरेत्याकारः स तथा तत्त्वत्वं च तन्मते क्षणिकपरमाणूपादाने एतदन्यद्रव्योपादेय एव प्रसिद्ध C. The same reading, with some minor variants, is found in F. 7. द्रव्यत्वमपि यत्पदार्थं C, F. 8-9. ०पादेयत्ववेद्याकारः स C. Z—Z. om. C. 10. निषेधसिद्धे० A, विधिसिद्धे० C,F. 11. ०च्छेदा A, ०च्छेद C, F. 12-13. स्पर्शवत्तथवत्याकारः C, स्पर्शवदन्तन्नवेत्याकारः F. M—M. This portion is found in A as a marginal insertion. Also found in C and F.

परमाणोरसत्ता तन्तुत्वपटत्वादिना सम्बन्धाभावादयुक्तमिदमिति वाच्यम्, तैस्तेषामसत्त्वानङ्गीकरणात्।[14]

तत्र प्राञ्चो बौद्धाः—द्विविधा हि वृत्तिः, कार्त्स्न्येन परिसमाप्त्या, यथा कलविङ्ककण्ठगुणस्य, एकदेशेन वा, यथा कुसुमेषु स्रक्सूत्रस्य, तृतीया विधा नास्त्येवेति वस्तुस्थितिः। तदिह पटादिरेकत्र तन्त्वादौ कार्त्स्न्येन परिसमाप्त्या[15]वर्तते, एकदेशेन वा। आद्ये एकत्र तथा वृत्तेरपरत्र वृत्तिविरोधः। अन्त्ये स एकदेशस्तदवयविरूपोऽतिरिक्तो वा। नाद्यः, आत्माश्रयात्। अन्त्ये तत्रैकदेशे पटो वर्तते न वा। अन्त्ये एकदेशत्व-व्याघातः। आद्ये तत्रापि [N]कार्त्स्न्येन वृत्तिरेकदेशेन वा। आद्ये अन्यत्र वृत्तिविरोधः[N]। अन्त्ये स एकदेशः स एव चेदात्माश्रयः, तत्तन्तुरूप[16]-श्चेदन्योऽन्याश्रयः; अतिरिक्तश्चेदापतितमनवस्थया, तत्रापि तथा विकल्पात्। अथ माऽस्तु पटादिरनेकवृत्तिः, एकमात्रवृत्तिरेव स्यादिति चेत्, तर्हि महत्त्वव्याघातः, अवयवबहुत्वमहत्त्वप्रचयानामभावादित्यणु-रेवायमिति। न च साक्षात्परम्परासाधारणावयवबहुत्वमेव महत्त्वा-रम्भकमिति परमाणुसमवेतसमवेते महत्त्वं नानुपपन्नमिति वाच्यम्, जगत एव क्षणभङ्गित्वेन तादृशावयवानामेकदाऽनवस्थानात्। नन्वेवं क्रमेण देश[17]विकल्पेन जात्यादिकमपि विलीयेतेति चेद्विलीयत एवेति वदन्ति। तन्न।[18] एकदेशेन वृत्तेः क्वचिदप्यभावेन द्विविधेत्यस्य व्याघातात्। न च कुसुमेषु स्रक्सूत्रमेकदेशेन वर्तते, सूत्रकुसुमयोः परमाणुपुञ्जत्वेन तत्-परमाणौ कार्त्स्न्येनैव वृत्तेः। नन्वस्त्वेक[19]विधैव वृत्तिः, तथा च यद् यत्र वर्तते तत्तत्र कार्त्स्न्येन परिसमाप्त्यैव वर्तत इत्येव नियम इति चेन्न, विकल्पासहत्वात्। तथाहि—कार्त्स्न्येनेत्यस्य यावदवयवत्वेन[20]इत्यर्थो

14. संशयानुगुणं साधारणधर्ममाह साध्यत्वादिति। ज्ञेयत्वं साधारणो धर्म इति भावः add. C. F. This occurs at the beginning of the commentary on this सूत्र in A. 15. ०समाप्तौ C. N—N. कार्त्स्न्येन वृत्तावन्यत्र वृत्तिविरोधः C, F. 16. तत्र तु रूप० C. 17. कार्यैकदेश० C, F. 18. तत्त्वं C. 19. नन्वेक० A. 20. यावदवयवेन स C. F.

वा, यावत्सम्बन्धिना सह[21] इत्यर्थो वा, स्वरूपसम्बन्धविशेषरूपपरि-समाप्तिविशेषपरत्वं[22]वा(ऽर्थः) ; नाद्यौ, तवाप्यसिद्धेः, नान्त्यः[23], [24]तथा नियमे मानाभावात्।[25] अथ माऽस्तु तथा नियमः, परिसमाप्त्यैव [26]वर्तत इति नियमादेवाभिमतसिद्धिर्भविष्यतीति चेत्, अस्तु तावदेव-मापाततः, तथाप्येकत्र परिसमाप्तस्यान्यत्र तथात्वे विरोधाभावात्। अपि चैकदेशेन कात्स्न्येन[27] च मा वर्ततां वर्तते (वा) इत्यत्र को विरोधी, उक्तनियम इति चेन्न, तत्र मानाभावात्, एतेन जात्यादि(कं) व्याख्यान-मिति। एतेन—यत्सत्तन्निरवयवमिति व्याप्तेः बहिरिन्द्रियजप्रत्यक्ष-विषयस्य द्रव्यत्वावच्छिन्नस्य वा सत्त्वेन निरवयवत्वं साध्यम्[28] ; न च निरवयवत्वं नासमवेतत्वं[29] तव[30] समवायासिद्धेः, नानुपादेयत्वं विज्ञाने व्यभिचारात्, नानेकानुपादेयत्वं ज्ञानविशेषे व्यभिचारात्, न मूर्त्तानु-पादानकत्वं तव मतेऽपि बाधात्, नानेकमूर्त्तानुपादानकत्वं प्रतियोग्य-प्रसिद्धेरिति वाच्यम् ; अनेकोपादानकत्वद्रव्यत्वोभयाभावस्य तत्त्वात् ; अस्तु वाऽनेकोपादानकान्यत्वमेव तत्, द्रव्यत्वमेवं हेतुरिति परास्तम्, अप्रयोजकत्वात्।

नव्यास्तु बौद्धाः—सकम्पत्वा[31]कम्पत्वादिलक्षणविरुद्धधर्माध्यासेनै-तत्तन्त्वादि[32]-समवेत^X^-द्रव्यस्य तत्तन्त्वादि[33]-समवेत^X^ - द्रव्यादन्यत्वं सिध्यति। तथा हि—एतत्तन्तुतत्तन्तुकम्पाकम्पयोः सत्त्वदशायां[34] 'पटोऽत्र कम्पते न तु तत्रे'ति प्रतीतेरेतत्तन्तुवृत्तिपटतत्तन्तुवृत्तिपटयोः सकम्पत्वाकम्पत्वसत्त्वात्तयोर्भेदः सिध्यति। अथ तत्र तन्तुरेव कम्पते न पटः, प्रतीतिस्तु परम्परासम्बन्धेन ; न चैवं चलाचलत्वेन तन्तुपटयो-

---

21. स C, F. 22. ०परं C. 23. नास्त्ये: C, F. 24-25. तथा नियमात् C. 26. ०समाप्तौ A. 27. कृत्स्नेन C. 28. न च निरवयवत्वं साध्यं add. C, F. 29. ०समवेतरे F. 30. तत्र C, F. 31. नव्यास्तु सकलाद्वा C. F also omits बौद्धाः. 32. ०नैतत्तत्वादि० C. X—X. om. A. 33. ०द्रव्यस्य च तत्त्वादि० C. 34. सत्त्वदशायां om. C, F.

वस्त्रोदकवद्युतसिद्धिप्रसङ्गः, युतसिद्धिर्हि न भेदः, इष्टत्वात्, नोपादानोपादेयभावाभावश्च[35], न [?] समवेतत्वे सत्यचलत्वस्य तद्व्याप्यत्वे मानाभावादिति चेन्न, साक्षात्सम्बन्धे बाधकाभावादिति। तदपि न, संयोगतदभावयोरिव कम्पतदभावयोरप्येकत्र वृत्तौ विरोधाभावात्, कथमन्यथाऽयमेवात्र कम्पते न तत्रेति भावाभावयोरेकत्र प्रतीतिः; भ्रान्तेयमिति चेन्न, बाधकाभावात्। व्याप्यवृत्तितानियमो बाधक इति चेन्न, तदसिद्धेः। अन्यथा संयोगस्याव्याप्यवृत्तिता विलीयेत; न चेष्टापत्तिरुक्तप्रायोत्तरत्वात्; न च क्षिप्तशरकर्मणोऽव्याप्यवृत्तित्वेन व्याप्यवृत्तिजातीयस्याव्याप्यवृत्तित्वविरहान्न कर्मणोऽव्याप्यवृत्तित्वम्, प्रतीतिस्तु परम्परयैवेति प्राचीननैयायिकसिद्धान्तः सचेतसां[36] चेतसि पदमर्पयति, तादृशनियमे मानाभावात्। किञ्च सकम्प[37] एव तत्रावयवी, तदभावप्रत्ययस्तु परम्परासम्बन्धालम्बन इत्येव किं न स्यात्; तस्माद्विनिगमकाभावादुभयोरेव[38] साक्षात्सम्बन्धावलम्बनत्वमिति। एतेनावृतत्वानावृतत्व[39]गृहीतत्वागृहीतत्वरक्तत्वारक्तत्वादिकमपि व्याख्यातम्। (एवञ्च) अनावृतमेव गृहीतमेवारक्तमेव तत्रावयवि, अवयवस्तु न तथेत्यपि वदन्ति। तस्माल्लाघवतर्क[40]सहकृतमानबलादेवावयविनिरसनम्, तथा हि—यदा भवद्भिः पटोत्पत्तिः स्वीक्रियते तदाऽणुसमूहस्तावत् सर्वसिद्धः, तत्र च द्रव्यतदभावान्यतर[41]ग्राहकप्रमेयत्वादिना लाघवसहकारेण तदभावादि सिध्यति, एवञ्च विश्वेषां क्षणिकत्वात् पूर्वाणुसमूहस्यैवोत्तराणुसमूहोपादानत्वस्यागत्या स्वीकारादुभयमेव प्रोक्तं[42]निरवयवत्वं निर्वहति। यदि चाणूनां क्षणिकत्वं न मानसिद्धं ×किन्तु पराभ्युपेतं नित्यत्वं× तदोत्तरमेव निरवयवत्वं निर्वहति, न तु प्रथमम्, उपादेयद्रव्याप्रसिद्धेः, निर्वहति च निरुपादानत्वं निरवयवत्वमपीति रहस्यम्। यानि तु बौद्धप्रणीता[43]-

35. ०भावाभावाभावश्च C, F. 36. सचेतषां A. 37. न कम्प A.
38. ०भानुभयोरेव C. 39. एतेनाहृतद्वालावृतत्व० C. 40. तस्मात्तर्कं F.
41. ०भावाद्यन्यतर० A. 42. ०विप्रतिपद्युक्तं A. X—X. om. C, F.
43. बौद्धग्रन्थीया० A.

न्यवयविनि बाधकसूत्राणि वार्त्तिककृता लिखितानि तानि न युज्यन्ते। तथा हि—द्रव्यान्तरेभ्यो द्रव्यान्तरानिष्पत्तेर्नान्योऽवयव्यवयवेभ्यः। नान्य इत्यादिकमासिद्धान्त[44]मनुवर्तते। अवयवित्वेनाभिमतः पटादिः अवयवेभ्य[45]स्तन्त्वादिभ्यो नान्यः, तन्त्वादिजन्यद्रव्यत्वात्[46], [Y]यन्नैवं तन्नैवं यथा तन्त्वादिरिति[Y] व्यतिरेकी प्रयोगः; पटादिकं न तन्त्वादिभिन्नद्रव्यम्, तन्त्वादिजन्यत्वादिति वाऽन्वयी प्रयोगः। अनुकूलतर्कमाह—द्रव्येति। तज्जात्यवच्छिन्नभिन्नद्रव्यस्य तज्जातिमद्द्रव्याजन्यत्वात्, न हि गोरश्व उत्पद्यत इति भावः। इदमयुक्तम्, दण्डादितो [47]घटादेरुत्पत्तेः, तज्जन्य[Z]त्वं [48]तत्समवायिकारणकत्व[49]मिति चेन्नाप्रयोजकत्वात्॥ द्रव्यान्तरोत्पत्तिदेशाव्यवच्छेदात्॥ द्रव्यान्तरस्य उत्पत्तेर्य आश्रयस्तत्र द्रव्योत्पत्तिदेशान्तरव्यवच्छेदाभावादित्यर्थः। यद्द्रव्यं यद्[Z]द्रव्यान्यत्[50] तत्तत्समवायिनि[51] समानकालीनतत्समवायिनि वा [52]समवेतादन्यद्रव्यम्, एतत्तन्तुसमानकालीनश्चायं पटो[53] नैतत्तन्तुसमवायिसमवेतादन्य इति न[54] एतत्तन्तुभिन्न इति भावः। तथा चायं[55] पट एतत्तन्तुभिन्नो न, एतत्तन्तुसमवायिसमवेतद्रव्यत्वात्, एतत्तन्तुसमानकालीनत्वे सति तादृशद्रव्यत्वाद्वा, [M]एतत्तन्तुवदिति तु निष्कर्षः। अत्रापि हेतोरुभयासिद्धत्वम्॥ अवयवान्तरावयविनोऽवयवान्तरार्थाभावात्[56]॥ तज्जातीयभिन्नसमवेतस्यैव तज्जातीयभिन्नत्वे सति द्रव्यत्वात् समवेतद्रव्यत्वाद्वा[M] इत्यर्थः[57]। इदं पुनरापाद्यापादक[58]योर्व्याप्तिप्रदर्शनम्, समवेत[59]द्रव्यं

---

44. इत्यासिद्धान्त० C, F. 45-46. ०स्तत्वादिजन्यद्रव्यत्वात् C. Y—Y. om. C, F. In A, it occurs as a marginal insertion. 47-48. घटादेरुपादानजन्य० A. Z—Z. om. F. 49. ०कारणत्व० A. 50. ०द्रव्यान्यं A. 51. ०वायिनः C, F. 52-53. समवेतादन्यत् अयं च द्रव्यमेतत्तन्तुसमानकालीनश्च पटो C, F. 54. स A. 55. तायं A. स्वयं C, F. Reading reconstructed according to the context. M—M. om. F, a case of haplography. 56. ०न्तरान्तरभावात् C. 57. ०द्रव्यत्वेत्यर्थः A. 58. ०द्यापक० A. 59. समेत० C.

[N]पटो न तन्तुभिन्नत्वे सति समवेतद्रव्यं [N]तन्तुभिन्नासमवेतत्वात्, तन्तुरूपवदित्यादिना तु व्यतिरेकः साधनीयः इति तु[60] मन्तव्यम्। अत्रापि नानुकूलस्तर्कः ॥ सत्यन्यकर्त्तुरर्थान्तर[61]भावात् ॥ तद्द्रव्यान्यस्यैव कर्त्तुः समवायिनस्तद्द्रव्यासमवायिन एव तद्द्रव्यान्यत्वात्, क्षणभङ्गपक्षे तद्द्रव्यान्यस्य तत्पूर्वद्रव्यस्यापि तद्द्रव्यसमवायित्वाद्[62]व्यभिचार इति। सतीति। तथा च तद्द्रव्यसमानकालीनत्वविशिष्टतद्द्रव्यसमवायित्ववर्जितस्यैव तद्द्रव्यभिन्नत्वमिति भावः। इदञ्च व्यतिरेकव्याप्तिप्रदर्शनम्, तथाचायं तन्तुरेतत्[63]पटाभिन्नः, एतत्पटसमानकालीनत्वे सति एतत्पटसमवायित्वात्, एतत्पटसमवायित्वाद्वेति[64] प्रयोगः। इदमपि पूर्ववत् ॥ आत्मसंयोगव्यतिरेकभावान्यत्वात् ॥ पटादि न तन्त्वादिभिन्नं तन्त्वादिर्वेत्यनुवर्तते। अत्र व्यतिरेकी हेतुः [65]स्वभिन्नं तन्त्वादि[66], तदात्मनस्तज्जातीयस्य यः संयोगस्तद्व्यतिरेकभाव्यन्यत्वं तदसमवायिकारणकान्यत्वव्यतिरेकः, तदसमवायिकारणकत्वमिति यावत्, द्रव्यत्वे सतीति पूरणीयम् ॥ इदमपि पूर्ववत् ॥ द्रव्यान्तरगुणानां द्रव्यान्तरगुणाकारणत्वेऽगुणत्वप्रसङ्गात् ॥ [67]पटादौ तन्त्वादि[68]रूपासमवायिकारणकरूपवत्त्वादिषु तन्त्वादिरूपासमवायिकारणरूपवत्त्वादिना व्यतिरेकिणा तन्तुत्वादिकमनुमेयम्। तर्कप्रदर्शनायेदं सूत्रम्; द्रव्यान्तरं तन्त्वादि, द्रव्यान्तरम् अतन्त्वादि, गुणपदानि रूपादिपराणि। तथा च पटादि यदि तन्त्वादिर्न स्यात्तन्त्वादिरूपासमवायिकारणकरूपवन्न[69] स्यात्। अत्रेष्टापत्तिं निवारयति—अगुणत्वेत्यनेन। यदि च तन्त्वादिरूपासमवायिकारणकेतररूपाभावत्वे सति तादृशरूपासमवायिकारणक[70]रूपवन्नस्यान्नीरूपं[71]स्यादिति भावः ॥ अत्रेष्टापत्तिवादिनं प्रत्याह—

N—N. om. C, a case of haplography. 60. तु om. C, F. 61. ०कर्त्तुरभ्यन्तर० C. 62. ०द्रव्यसमत्वात् C, ०द्रव्यस्य समवायित्वात् F. 63. त्तन्तुरेतत् A, तुरेतत् C. 64. ०वायित्वान्नेति C, F. 65-66. स्वेति स्वतन्त्वादि C, F. 67-68. पटादित्यादि० A. 69. ०वत्त्व C, F. 70-71. ०रूपवत्वस्यास्वीरूपं C.

अप्रत्यक्षत्वप्रसङ्गात् ।। पटादीनां नीरूपत्वेऽचाक्षुषत्वप्रसङ्गादिति भावः । इदमपि पूर्ववत् । वार्त्तिककृतस्तु—अवयविनोऽनन्यत्वे हेत्वन्तरमाह अप्रत्यक्षप्रसङ्गादिति[72] ; यत्किञ्चिदवयवसन्निकर्ष[73]दशायामवयविनोऽप्रत्यक्षत्वप्रसङ्गादनेकवृत्तिधर्मप्रत्यक्षे यावदाश्रयसन्निधेर्हेतुत्वादिति भावः, इदमप्यसिद्धमित्याहुः ।। संयोगाप्राप्तथभावात् ।। संयोगस्य तदप्राप्तेश्चाभावादित्यर्थः ; तदसंयुक्तत्वे सति तत्सम्बद्धद्रव्यत्वेन तदभेदः साधनीय इति भावः, अत्र नियमे मानाभावः ।। गुरुत्वान्तरकार्याग्रहणात् ।। गुरुत्वान्तरस्य यत् कार्यमवनमनविशेषस्तस्यादर्शनादित्यर्थः । अयं भावः —(यदि) अवयवी कश्चनाधिकः[74]स्यात्तर्हि सोऽवयवगुरुत्वाधीनगुरुत्वान्तरवान् स्यात्, तथाच पाषाणगुडकावयवद्वयपाषाणगुडकान्तरसंयुक्ततुलायाः पाषाणावयवद्वयमात्रसंयोगदशापन्नावनमनादतिशयितमवनमनमिव तदवयवद्वयारब्धगुडकमात्रसंयोगदशायामपि तथाऽवनमनं स्यात्, तस्य बहुतरगुरुत्वकार्यत्वात्, तस्मान्न तन्त्वादितोऽतिरिक्तः पटादिरिति । अत्र वर्द्धमानादयः—न तावद्गुरुत्वाधिक्यमवनमनातिशयप्रयोजकः, व्यभिचारात्, महत्तरपाषाणद्वयसंयोगदशातः स्वल्पतरबहुलपाषाणसंयोगदशायां तुलावनतेरपकर्षस्यैवोपलम्भात्, किन्त्वतिशयितं गुरुत्वम्, तच्च तत्र नास्तीति तत्र नातिशयितावनतिरिति । तन्न, गुर्वन्तरसंयोगे तादृशावनत्यनुत्पत्तिप्रसङ्गात्, न हि तत्रैकमपि गुरुत्वमतिशयितम्, प्रत्येकसंयोगदशायां कार्यानुत्पत्तेः । फलबलाद्विशिष्यैव हेतुहेतुमद्भाव इति नानुपपत्तिलेशोऽपीति[75] नव्याः । अणूनामेव [76]तवेव ममापि[77] गुरुत्वाधिक्यं तत्र प्रयोजकमित्यन्ये । यत्तु—अवयविनि गुरुत्वमेव नास्ति, पतनन्तु परम्परया गुरुत्वसम्बन्धादिति ; तन्न, लाघवेन साक्षात्सम्बन्धेनैव गुरुत्वस्य पतनकारणत्वात् । वस्तुतो गुरुत्व(वत्)-

72. ०इति om. C, F. 73. निखिलावयवसन्निकर्ष० C, F.
74. कम्बलाधिक: C. 75. ०पत्तिनोसापीति C. 76-77. om. A.

संयोगगत एवोत्कर्षस्तत्प्रयोजक इति न कोऽपि दोष इति तत्त्वम्। अवयवावयविभावानापन्नगुरुत्वबाहुल्यं तत्र प्रयोजकमित्यपि कश्चित्। परमार्थतस्तुलादेरवनतिं प्रति दिग्विशेषस्थः संयोगविशेषः प्रतिबन्धकः, तत्र फलबलात्तावद् [78]गुरुत्वस्योत्तेजकत्वमिति न काऽप्यनुपपत्तिरिति दिक् ॥ ३५ ॥

अत्र समाधिसूत्रम्—

सर्वाग्रहणमवयव्यसिद्धेः ॥ ३६ ॥

अवयविनोऽसिद्धेरभावस्याभ्युपगमे परमाणुपुञ्जाभ्युपगमे च सर्वेषां पटतद्रूपादीनामग्रहणम् अप्रत्यक्षता स्यात्, न हि परमाणूनां तद्गुणानां वा ग्रहणसम्भवः, प्रत्येकविभक्तानामपि तेषां तद्रूपादीनाञ्च ग्रहणापत्तेरिति भावः ॥ ३६ ॥

युक्त्यन्तरमाह—

धारणाकर्षणोपपत्तेः ॥ ३७ ॥

अवयविनोऽर्थान्तरत्वमित्यादिः, सम्भवादिति च[79] शेषः। परमाणुपुञ्जत्वे एकदेशधारणेन समस्तस्य धारणमपतनरूपम्, एकदेशाकर्षणेन च समस्तस्याकर्षणञ्चाभि[80]मुखक्रियारूपं न स्यादिति भावः। तवेतरभागाणुप्रभृतीनां[81] धारणाकर्षण इव[82] [83]ममापि ते नानुपपन्ने[84], परम्परासंयोगविशेषस्वाभाव्यादिति नैषा युक्तिः समीचीनेति ध्येयम् ॥ ३७ ॥

परमाणूनां पृथग्ग्रहणेन पुञ्जस्याप्यग्रहणं स्यादिति प्रागुक्तम्। अत्र पूर्वपक्ष[85]पुरःसरं सिद्धान्तमाह—

सेनावनादिवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३८ ॥

---

78. ०बलात्तत्तावद्० C, F. 79. च om. C, F. 80. समस्ताकर्षणञ्चातिमुख० C, F. 81. तवेतरभानाणुपृथिवीनां C. 82. इव om. A. 83-84. समायितनानुपपन्नो A, ममापि तेनानानुपपत्ते C. 85. ०पक्षे० C, F.

यथा सेनादिघटकानां दूरे परस्परा[86]सन्निधानेनाग्रहेऽपि परस्परसन्निधानेन तेषां ग्रहस्तथा परमाणूनामपीति पूर्वपक्षः। सिद्धान्तस्तु—प्रत्यक्षयोग्यता[87] महत्त्वम्, तद्वत्त्वात् सेनादीनां ग्रहणमुपपद्यते, अणूनां तु[88] तदभावात् कुतो ग्रहणमिति। अत्र वदन्ति—न वयमणूनामतीन्द्रियत्वं स्वीकुर्मः किन्तु संयोगविशेषसहकारेण तेषामैन्द्रियकत्वम्, त्वयाऽपि हि द्रव्यारम्भकतावच्छेदकत्वेन संयोगगतविशेषः स्वीकरणीयः; न च पटानुत्पाददशायां पटारम्भकतन्तौ पटत्वादिग्रहप्रसङ्गः, पटारम्भकतयाभ्युपगतस्य संयोगविशेषस्यैव पटत्वग्राहकत्वात्, पटाद्यत्यन्ताभाववच्च पटत्वादिकमपि सामयिकमिति न तदा पटबुद्धेः प्रमात्वम्। 'तन्तुषु पट' इत्यादि धीः कथमिति [89]चेदभेदेनाधाराधेयभावात्[90], अतएव घटाभावे स [?] इत्यादिधीः।[91] एवं तर्हि 'तन्तौ तन्तुः', 'पटे पटः' इत्यपि धीः स्यादिति चेन्न, तन्तुत्वपटत्वादिनिरूपिताधेयतायाः स्वावच्छेदेनाभावात्। 'तन्तुः पटः' इति धीः स्यादेवमित्यपि नाशङ्कनीयम्, तन्तौ पटाभेदसत्त्वेऽपि तन्तुत्वावच्छेदेन तदभावात्, अतएव 'तन्तुर्न पट' इत्यपि धीरुपपद्यते। यदि च 'पटत्वं न तन्तौ' 'तन्तुत्वं न पट' इत्यपि धीरपि प्रामाणिकी तदाऽस्तां तदन्यव्याप्यवृत्तिप्रतीतेर्दु र्निवारत्वात्[92]। अथ घटारम्भककपालेन स्थाल्यारम्भे स्थालीत्वघटत्वयोः संकर इति चेत्, किमेतावता, न हि साङ्कर्यं जातित्वाभावनियतं मानाभावात्, अस्तु वाऽखण्डा एवोपाधयस्ते[93], तत्रान्यदेव कपालम्[94] (अन्या) स्थालीत्यपि केचित्। 'पटो महानि'ति धीः सम्भवतु कथमिति चेन्न, संयोगविशेषातिरिक्ते महत्त्वे मानाभावात्, महत्त्वत्वस्य संयोगत्वव्याप्यत्य[95]स्वीकारात्, [96]अस्तु वा संयोगविशेषसहकारेणाणुषु महत्त्वस्य त्ररेणुषु वा तारतम्य-

86. परम्परा० C, F. 87. प्रत्यक्षतायोग्यता C, F. 88. तु om. A. 89-90. चेदभेदेन विरोधेयाभावात् A. 91. इत्यादिरपि धीः A. 92. ०प्रतीतेर्वा निर्वार्यत्वा A. 93. ०ते om. A. 94. तत्रान्यदेवकालीनं C, तत्रान्यदेवकूपं नि F. 95. ०व्याप्य A. 96-97. त्रसरेणुषु om. A. अन्तरा

स्योत्पत्तिः,[97] अखण्ड एव वा सामयिक[98] उपाधिविशेषो महत्त्वादिः संयोगविशेषसहकारेण गृह्यते। एतेनैकत्वादिकं व्याख्यातम्; द्वित्वादि च तत्तत्तन्तुषु न पटत्वावच्छेदेन पर्याप्तम्। सत्यपि कपाले संयोगनाश[99]-दशायां 'घटो नष्टो न कपालः' इत्यादि धीः कथमिति चेत्, घटत्वांश एव संयोगनाशस्य संयोगनाशजन्यनाशस्य वा प्रतियोगितायाः[100] तत्कपाले स्वीकारात्। एतेन प्रागभावोऽपि व्याख्यातः, अवगाहतां वा परम्परया संयोगविशेष एव [?] 'पटो नष्टः' इत्यादि धीः पटत्वादिकम्। एतेन 'तन्तुभ्यः पटः' इत्यादिधीरप्युपपद्यते, अस्तु वा संयोगविशेषगतमेव पटत्वादिकम्। 'पटो द्रव्यं रूपवानि'ति प्रतीतिस्तु परम्परयैव यथार्था, एवञ्च पटत्वादेः सामयिकत्वम्, संयोगादिकञ्च न पटत्वांश इति। 'तन्तु-संयोगादेतस्मात् पटः' इति तु धीर्ज्ञाप्यत्वमेवावगाहते न जन्यत्वमिति पुनरनुभवकलह इति तु ध्येयम्। नन्वेवं[101] 'Aजन्यपटनिष्ठ' इत्यादाविव 'जन्यं द्रव्यमि'त्यादावपिA पटत्वादेः साक्षात्, द्रव्यत्वादेः परम्परया संयोग एव भाण[102]स्वीकारे नित्यतैव सर्वद्रव्याणां स्यादिति चेत्, स्यादेवेति सांख्यैकदेशिनः। परे तु पटानुत्पादकालीनतन्तौ न पटत्वम् किन्तु तदुत्तरभावितन्तौ क्षणिकत्वाद् विशेष्य [?][103] एवञ्च न साङ्कर्य-शङ्का, न वा 'पटो [104]नष्टः', 'तन्तुभ्यः[105] पटः', 'तन्तुसंयोगात् पटः', 'पटो द्रव्यम्' इत्यादिप्रतीत्यनुपपत्तिः। 'पटात् पटः' इति तु न प्रतीतिः, पटत्वावच्छिन्नजनकत्वस्य पटत्वांशेऽभावात्, अतएव च न 'पटे पटः' इत्यादिधीरपीत्याहुः। न युक्तमेतत्, बहुतरतन्तुकल्पनापेक्षया एकपट-कल्पनाया एव लघुत्वात्, क्षणभङ्गस्य च निराकर्तव्यत्वात्॥ ३८॥

॥ समाप्तं चतुःसूत्र्याऽवयविपरीक्षाप्रकरणम्॥

संयोगविशेषसहकारेणाणुषु महत्त्वस्य त्रसरेणुषु वा उरतमस्योत्पत्तिः C. 98. सामवायिक C. 99. संयोगविशेष० A. 100. प्रतियोगितायाः om. C, E, F. 101. विनाशत्वादि add. C, E, F. A—A in A only. 102. भाण० om. C, E. 103. क्षणिकत्वाद्विशेषाम् C, F. क्षणिकत्वाच्च विशेषाम् E, 104-105. नष्टत्वं तुभ्यः C.

[1]अथानुमानपरीक्षा[2] । तत्राक्षेपसूत्रम्—

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ।। ३९ ।।

अनुमानम् अनुमानत्वेनाभिहितं[3] पूर्ववदादि नदीपूरो[4]त्कर्षःपिपीलिका[5]ण्डसञ्चारो मयूरसम्बन्धी शब्दो न प्रमाणम्, न[6] उपरिवृष्टेः सन्निहितभाविवृष्टेः मयूरस्य च[7] प्रमानुमितेरनुमितेर्वा[8] करणं[9] करणतावच्छेदकं वा, न[10] तत्तत्साध्यव्याप्यमिति तु निष्कर्षः। नद्या रोधेन पूरोत्कर्षे, आश्रयोपघातात्[11] पिपीलिकाण्डसञ्चारे, मयूरशब्दसादृश्यान्मयूरसम्बन्धिनि [12]शब्दे च तत्तत्[13]साध्यानां व्यभिचारादित्यर्थः ।। ४० ।।

उत्तरसूत्रम्—

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ।। ४० ।।

उदाहृतलिङ्गानां तदुत्[14]कर्षतत्सञ्चारतन्मयूरशब्दानामेकदेशरोधत्रास[15]जाण्ड[16]सञ्चारमयूरशब्देभ्यो [१०मयूरशब्दसदृशशब्देभ्यो] भिन्नत्वान्न व्यभिचार[17] इत्यर्थः, तथा च तेषामव्याप्यत्वेऽपि न क्षतिरिति भावः ।। ४० ।।

।। समाप्तमनुमानपरीक्षाप्रकरणम् ।।

त्रिकालविषयमनुमानं त्रैकाल्यग्रहणादित्युक्तम्। तत्र वर्तमानकालाक्षेपसूत्रम्—

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ।। ४१ ।।

---

1. अथ० om. A. 2. om. C. 3. ०नाहितं C. 4. ०पूर्वो० C. 5. पिपिलिका० A, पिपीड़िका C. 6. om. A. 7. om. C. 8. प्रमानुमितेर्वा C. 9. कारणं E. 10. तु add. C. 11. ०घातेऽपि C. 12. मयूरशब्दसदृश० add. C, E. 13. तत्० om. C. 14. तत्वत्० C. 15. ०देशबोधत्रास० C. 16. ०जाशु० A. 17. न व्यभिचार om. C, E. Found as marginal insertion in A.

वर्तमानाभावः[1], कालत्वं भविष्यदतीतान्यतरव्याप्यमिति भावः[2]। कुतः। पततो वस्तुनः पतितकालस्य पतितव्यकालस्य च केवलमुपपत्तेः। वृन्तात् पततः फलस्य समवधिं कृत्वा वृन्तं[3] यावद्योऽध्वा[4] स पतिताध्वा,[5] भूमिञ्च यावत् पतितव्याध्वा,[6] 'इदमेतावति पतितम्, इतो भूमौ पतिष्यती'त्येव प्रतीतेः[7], न चात्र वर्तमानवार्तापीति भावः ॥ ४१ ॥

सिद्धान्तसूत्रम्—

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ॥ ४२ ॥

तयोर्भविष्यदतीतयोस्तदपेक्षत्वादिति। तयोरित्यनुवर्तते। वर्तमानप्रागभावध्वंसप्रतियोगिसमयौ हि भविष्यत्ताऽतीतत्वे इति भावः॥ ४२॥

नन्वतीत[8]प्रागभावप्रतियोगिसमयो भविष्यत्ता, अतीतता च भविष्यद्[9]-ध्वंसप्रतियोगिसमय इति न तदपेक्षत्वं तयोरित्यत्र सिद्धान्तमाह—

नातीतानागतयोरितरेतरापेक्षासिद्धिः ॥ ४३ ॥

अन्योऽन्याश्रयादिति व्यक्तो[10] हेतुः ॥ ४३ ॥

सिद्धान्तान्तर[11]माह—

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ४४ ॥

सर्वाग्रहणं स्यात्। प्रत्यक्षेति।[12] "सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादिने"ति[13] [नियमात्]। प्रत्यक्षमूलञ्च प्रमाणान्तरमिति भावः। 'वृन्तात्[14] पतति फलमि'त्यादिप्रतीतिसाक्षिको वर्तमानकालो दुरपह्नव इति तु वस्तुगतिः ॥ ४४ ॥

---

1. ०मानकालाभावः A, ०मानाचारः C, E. 2. इति भावः om. A. 3. वृत्त C. 4. यावस्योध्वा C, यावस्योध्या E. 5. पतितात्वा C. 6. ०व्यायवा C. 7. एव प्रतीतेः om. C. 8. ननु नतीत C. 9. चाभविष्यत्व० C. 10. व्याक्तो A. 11. सिद्धान्तर० C, E. 12. प्रत्यक्षे हि A. 13. चाक्षुरादिनेति A. This half-verse is from श्लोकवार्त्तिक, प्रत्यक्ष ८४. 14. दृष्टान्तात् C.

ननु यदि वर्तमानध्वंसप्रागभावप्रतियोगित्वेऽतीतत्वभविष्यत्त्वे तर्हि कथम् 'अयं घटः' [15]श्याम आसीद्रक्तश्च[16] भविष्यती'ति वर्तमानस्यातीतत्व[17]भविष्यत्त्वाभ्यां ग्रहणमित्यत आह—

कृतताकर्तव्यतोपपत्तेस्तूभयथा[18]ग्रहणम् ॥ ४५ ॥

विशेषण इत्यादिः । कृतताकर्तव्यत्वेऽतीत[त्व]भविष्यत्त्वे[19], तथा च विशेषणे सम्बन्धादुभयथा[20]ऽतीतत्वेन भविष्यत्त्वेन च [21]परम्परासम्बन्धेन विशेष्यस्य[22] ग्रहणं नानुपपन्नमिति भावः ॥ ४५ ॥

॥ समाप्तं वर्तमानकालपरीक्षाप्रकरणम् ॥

अथोपमानपरीक्षणाय पूर्वपक्षसूत्रम्—

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ ४६ ॥

प्रसिद्धसाधर्म्यं [M]तज्ज्ञानं वोपमितिकरणमुक्तं[1] "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमान"मित्यनेन सूत्रेण[2] ; तत्र प्रसिद्धपदस्य प्रकृष्टार्थकत्वभ्रमेणाशङ्कते[3]—किं तावत् प्रसिद्धसाधर्म्यमत्यन्त[4]साधर्म्यं[M] ; तद्वृत्तियावद्धर्मवत्त्वरूपं [वा], प्रायसाधर्म्यं तद्वृत्तिबहुलधर्मवत्त्वं वा, एकदेशसाधर्म्यं तद्वृत्तिधर्मवत्त्वरूपं वा, न चैतत्त्रितयरूपेणाप्यु[5]पमितिहेतुताऽन्वयव्यभिचारात् ; तदुक्तम्—"तादृशसाधर्म्यादपि क्वचिदुपमानासिद्धि"रिति ॥ ४६ ॥

15-16. श्यामोऽभूत् रक्तो C, E. 17. ०स्यातीत० C, E. 18. ०पत्तेमुभयथा० A. 19. ०भविष्यत्ते C. 20. ०उभयथा० occurs as a marginal insertion in A. om. C, E. 21-22. om. C, E.

M—M. om. E. 1. ०कारणमुक्ता C. 2. न्यायसूत्र १।१।६. 3. भ्रमेणांशते C. 4. ०साधर्म्यमित्यन्त० C. 5. रूपो नाप्यु A, C, E.

अत्रोत्तरसूत्रम्—

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४७ ॥

प्रसिद्धं प्रकृष्टसिद्धिविषयस्तत्पदवाच्यत्वसमानाधिकरणतया ज्ञातं यत् साधर्म्यं गवादिवृत्तिधर्मस्तस्माद्गवयादिपदवाच्यत्वसमानाधिकरणतया गवादिवृत्ति[6]धर्मज्ञानाद् वा गवयपदवाच्यत्वादेरुपमितिसिद्धेर्यथोक्तदोषानुपपत्तिरिति भावः ॥ ४७ ॥

अनुमानेनोपमानकार्यम्भविष्यतीति किमुपमानेनेत्याशङ्कते—

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४८ ॥

प्रत्यक्षेण गोसादृश्यगवयत्वादिनाऽप्रत्यक्षस्य गवयादिपदवाच्यत्वस्य सिद्धेरनुमितेः, उपमानासिद्धिरित्यनुवर्तते[7] ॥ ४८ ॥

अत्रोत्तरमाह—

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः ॥ ४९ ॥

न गवयादिपदवाच्यत्वव्याप्यधर्मवत्तयाऽप्रत्यक्षेऽज्ञाते गवये उपमानस्य प्रमाणार्थं प्रमारूपं प्रयोजनं पश्याम इति भावः ॥ ४९ ॥

ननु तत्रापि व्याप्त्यादिधीः कल्प्यताम्, अस्तु वा ज्ञानलक्षणाप्रत्यासत्त्या गवयादिपदवाच्यतया गवयादेः प्रत्यक्षमेव, किं मानान्तरेणेत्यत आह—

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ५० ॥

[8]तथा गवयपदवाच्यतया अयमुपमितो, न साक्षात्कृतो न वाऽनुमित इत्युपसंहारादनुभवादुपमितित्वविशिष्टसिद्धेर्नाविशेषोऽनुमितित उपमितेः ॥ ५० ॥

॥ समाप्तमुपमानपरीक्षाप्रकरणम् ॥

6. ०वृत्ति० om. C. 7. ०रित्यावर्तते C. 8. C, E add. यथा गौस्तथा गवयः in excess.

अथ शब्दपरीक्षणायांक्षेपसूत्रम्—

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ५१ ॥

शाब्दत्वेनाभिमतं विज्ञानमनुमितिरिति फलितार्थः। अर्थस्य घटादि-पदार्थस्य घटादेरनुपलब्धेर्व्यभिचारोपलम्भविरोध्युपलम्भविषयत्वात्, कर्मत्वादिवृत्ति[M]तया गृह्यमाणस्य तदपदस्य [?][M] तदमपदादि[1][?] जन्यस्मृतिविषयाविशेषस्य [2]तत्कर्मत्वादेर्वा व्यापक[3]तयोपलब्धेः कर्मत्वादावनुमेयत्वात्[4][?], इदं ज्ञानमनुमितिरनुमितिसामग्रीजन्यत्वा-दिति भावः। यद् वा—शब्दार्थस्य प्रत्यक्षादनुपलब्धे[5]रनुमेयत्वादि-त्यर्थः। प्रत्यक्षान्यानुभवत्वेन तद्बुद्धेरनुमितित्वमिति भावः ॥ ५१ ॥

उपलब्धे[6]रद्विप्रवृत्तित्वात् ॥ ५२ ॥

उपलब्धेः प्रत्यक्षान्यानुभूतेरद्विप्रवृत्तित्वादनुमितित्वादनुमितित्वान्यानु-भवत्वव्याप्यजातिरहितत्वाद्वेति यावत्। तेन च अनुमितित्वमनुमेय-मिति भावः ॥ ५२ ॥

सम्बन्धाच्च ॥ ५३ ॥

तदनुमितिरिति शेषः। सम्बन्धो व्याप्तिः, तस्मात्तद्ग्रहजन्यत्वादिति यावत्। व्याप्य[7]विषयकत्वेन विशेषणाच्च न व्यभिचारः ॥ ५३ ॥

अथ सिद्धान्तः—

आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्ययः ॥ ५४ ॥

तन्ना[8]नुमितिर्यत्र तादृशात्[9] शब्दादेवार्थे[10] सम्प्रत्ययः। आप्तं प्राप्तम्[11] उपदेशस्य शाब्दबोधस्य सामर्थ्यमाकाङ्क्षादि येन तस्मादाकाङ्क्षादिम-

---

M—M. om. C, E. 1 Can तदर्थस्य तदर्थपदादि० give a better sense? 2-3. ०तत्कर्मत्वस्वादि व्यापक० C, E. 4. ०दामन्नामयत्वात् C. 5. अप्रत्यादनुपलब्धेः in excess in A, found as marginal insertion. 6. उपलब्धि० C. 7. व्याप्स्य० A. 8. तत्त्वा० C. 9. एतादृशात् C, E. 10. शब्दादिवार्थे C. 11. आप्तं om. C, प्राप्तम् om. A. E.

त्तया ज्ञातादेव शब्दादर्थप्रत्ययो यतोऽतः स प्रत्ययो[12] नानुमितिरित्यर्थः। तथा च व्याप्तिधीजन्यत्वं स्वरूपासिद्धम्[13], प्रत्युत व्याप्तिग्रहाजन्यत्वेनाननुमितित्वमेवैतस्य सिद्ध्यतीति भावः, अनुभवो लाघवञ्चात्र[14] नियामकमित्यवधेयम् ॥ ५४ ॥

न च शब्दार्थयोर्व्याप्तिरस्तीत्याह—

पूरणप्रदाहपाटनानुपपत्तेश्च सम्बन्धाभावः ॥ ५५ ॥

शब्देऽर्थव्याप्यत्वाभावः, अन्नाग्निरस्यादि[15]शब्दोच्चारणे मुखपूरणादेरभावादित्यर्थः, तद्व्याप्यत्वे मुखे शब्दसत्त्वेनान्नादि[16]सत्त्वान्मुखपूरणाद्यापत्तेरिति भावः। चिन्त्यमेतत् ॥ ५५ ॥

आक्षिपति—

शब्दार्थव्यवस्थानादप्रतिषेधः ॥ ५६ ॥

शब्दार्थयोः सम्बन्धप्रतिषेधो न, शब्दार्थविशेषस्यैव प्रतीतेः, अन्यथाऽसम्बन्धत्वाविशेषात् सर्वार्थप्रत्ययापत्तेः, सम्बन्धश्च पारिशेष्याद्[17] व्याप्तिरेवेति भावः ॥ ५६ ॥

उत्तरम्—

न सामयिकत्वात् शब्दार्थसम्प्रत्ययस्य ॥ ५७ ॥

सामयिकत्वात् शक्तिग्रहाधीनत्वात्, तथा च पारिशेष्यमेव[18] नास्तीति भावः।

यद् वा—शब्दोऽनुमानमित्यस्य शब्दोऽनुमितित्वव्याप्यपरीक्षानुभववृत्तिजन्यताक इत्यर्थः, तत्प्रतिषेधव्याप्ते[१०आप्ते]त्यादिना

---

12. संप्रत्ययो A. 13. स्वरूपादितं C. 14. लाघवं वात्र C. 15. अन्नाग्निरास्यादि० A. अन्नग्रादि० C. अर्थाग्निस्यादि० E. 16. ०नार्थादि० A, E. ०नान्वादि० C. 17. या विशेष्या C, गोविशेष्याद् E. 18. गोविशेष्यमेव E.

कृतस्तत् शङ्कते—शब्दार्थेति। यत्र न व्याप्त्यादिज्ञानं तत्र शब्दादर्थस्य व्यवस्थानात्, अगृहीतासंसर्गकस्मरणस्यैव भावादप्रतिषेध इत्यर्थः। उत्तरम्—नेति। सम्यक् प्रत्ययो विशिष्टज्ञानं शब्दाद् व्याप्तिग्रहा-सहकृतात्तस्य सामयिकत्वादानुभविकत्वात्। तादृशशब्दादर्थे प्रत्ययस्य सामयिकत्वात् प्रवर्तकत्वाद्वेत्यर्थः, प्रवर्तकत्वेन च विशिष्टज्ञानत्वं तस्येति भावः॥ ५७॥

प्रत्यक्षान्यानुभवत्वं हेतुं दूषयति—

जातिविशेषे चानियमात्॥ ५८॥

अनुमितित्वे उक्तहेतोरप्रयोजकत्वेन नियमाभावादिति भावः। कश्चित्तु—ननु प्रत्यक्षान्यानुभवसामान्यं प्रति नियमाधीनहेतुताकल्पनादिदम-सङ्गतमित्याह [M]जातीति, शाब्दत्वेन विशिष्टं प्रति नियमस्यानुपयोगात् किन्त्वनुमितावेव तदुपयोग इत्याह। जातिविशेषेऽनुमिति[त्व]व्यावृत्त-शाब्दत्वेऽनुभवसिद्धे भवदुक्तानां नियमानामभावादित्यर्थ इत्यप्याहुः।[M] भाष्यादिकृतस्तु—सामयिक एव सम्बन्धो न स्वाभाविक इत्यत्र हेतुमाह जातीति, आर्यम्लेच्छादेरर्थ[19]विशेषबोधानियमप्रसङ्गात्, स्वाभाविके सम्बन्धे यवशब्दादार्या दीर्घशूकं प्रतियन्ति[20] म्लेच्छास्तु कङ्गुमिति[21] नियमो न[22] स्यादित्यर्थ इत्याहुः। तच्चिन्त्यम्॥ ५८॥

॥ समाप्तं शब्दसामान्यपरीक्षाप्रकरणम्॥

प्रसङ्गाच्छब्दविशेषस्य वेदस्य परीक्षा। तत्राक्षेपसूत्रम्—

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः॥ ५९॥

M—M. om. C. 19. ०म्लेच्छादेवस्व० C. 20. प्रतियंति C. 21. कुकुमिति C. 22. नियमे ने C.

तेषां वेदानाम[प्रामाण्यम]प्रमाजनकत्वं[1] मोहजनकत्वञ्च[2], अनृतत्वादिदोषात्। पुनरुक्तेति भावप्रधानो निर्देशः। पुत्रेष्टिकारीर्यादावनृतत्वं पुत्रवृष्ट्याद्यजनके तज्जनकत्वरूपयोग्यताज्ञानम्। व्याघातः पूर्वापरविरोधः, अपरवाक्यार्था[3]वधारिताप्रामाण्यकं पूर्ववाक्यार्थयोग्यताज्ञानम् यथा—"उदिते जुहोति", "अनुदिते जुहोति", "समयाध्युषिते जुहोति"। एतस्य होमेऽनिष्टासाधनताबोधकस्य विरोधः "श्यावो[4]ऽस्याहुतिमभ्यवहरति य उदिते[5] जुहोति", "शवलो[6]ऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोति", "श्वाव[7]शवला[8]वस्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोती'ति † निन्दानुमिताऽनिष्टसाधनताबोधकागमेन। पुनरुक्तता समानानुपूर्वीकतया समानार्थकत्वेन[9] च। तथा च निराकाङ्क्षत्वान्न ततः शाब्दधीरिति, यथाऽत्रैवोदितानुदितवाक्ये। यथा वा "त्रिः[10] प्रथमामन्वाह त्रिरुत्तमामन्वाह" [द्रः शतपथब्राह्मण १।३।५] इत्यत्र, उत्तमत्वस्य आद्यत्वरूपत्वात्, 'त्रिस्त्रि'रित्येव वा पुनरुक्तम्।

---

1. ०प्रयोजनत्वं C. 2. प्रमाजनकत्वञ्च C, E. 3. ०वाक्यायाः० C.
4. स्यावो० A. 5. य ज्ञिते C. 6. शरलो० C, E. 7. स्याव० A.
8. ०शरला० C, E.

† रेखामात्रोदिते सूर्ये रश्मिभिः परिदृश्यते। उदितं तं विजानीयात् तत्र होमं प्रकल्पयेत्॥
रात्रेः षोडशमे भागे ग्रहनक्षत्रभूषिते। अनुदितं विजानीयात् तत्र होमं प्रकल्पयेत्॥
प्रभातसमये जाते नष्टे नक्षत्रमण्डले। रविर्यावन्न दृश्येत समयाध्युषितं विदुः॥
The editors of न्यायदर्शन (Calcutta Metropolitan Series) have given these verses as footnotes on p. 548, as also the following verse from वायुपुराण (१३८/३१):

द्वौ श्वानौ श्यावशावलौ वैवस्वतकुलोद्भवौ।
ताभ्यां बलिं प्रयच्छामि स्यातामेतावहिंसकौ॥

See also शाङ्ख्यायन ब्राह्मण (२।८।९).

9. समानानकत्वेन C. 10. यथा रात्रिः C.

एवञ्चात्र व्याप्तिग्रहाद् वेदत्वेनाप्रामाण्यं वेदमात्रे साधनीयमिति भावः ॥ ५९ ॥

क्रमेण समाधत्ते—

न कर्मकर्तृसाधनवैगुण्यात् ॥ ६० ॥

फलाभावेनानृतत्वमिति शेषः। कर्म क्रियाऽबुद्धि[11]पूर्वकत्वाविद्वत्ता[12]-ऽप्रोक्षितत्वादिकञ्च तद्वैगुण्यम्। स्वरूपायोग्यत्वात् फलाभावेन हि तस्यानृतत्वम्, न तु सहकारिविरहात् फलाभावेन। न हि फलोपधायकत्वं वेदार्थोऽपि तु स्वरूपयोग्यता, न च सहकारिविरहात् कार्याभावे सा हीयत इति ॥ ६० ॥

अभ्युपेत्य कालभेदे दोषवचनात् ॥ ६१ ॥

न व्याघात इति शेषः। अग्न्याधानसमये कालविशेषमुदितादिकमभ्युपेत्य परिगृह्य तस्य कालस्य भेदे त्यागेऽन्यकालपरिग्रहे "श्यावोऽस्ये"त्यादिना दोषाभिधानात् ॥ ६१ ॥

अनुवादोपपत्तेश्च ॥ ६२ ॥

न पुनरुक्तमिति चार्थः। अनुवादस्योपपत्तेः सप्रयोजनत्वाद्भिन्नवाक्यार्थघटकीभूतार्थकत्वादिति यावत्। प्रयोजनान्तरभावो हि पौनरुक्त्यदोष इति भावः। "त्रिः प्रथमामि"त्यत्र ह्युत्पत्तिवाक्ये[13] एकादशसामिधेन्यः श्रुताः, तेन प्रथमोत्तरयोस्त्रिरभिधाने पञ्चदशत्वमासाम्भवतीत्येव प्रयोजनम्, तथा च मन्त्राभिवादः—"इदमहं पञ्चदशा[वि]रेण [14]वाग्वज्रेणावबाधे भ्रातृव्यं योऽस्मान् द्वेष्टि यं च वयं द्विष्म"[15] [द्रः शतपथ ब्राह्मण १।३।५]।

11. ०क्रियात्मबुद्धि० C. 12. ०त्वाबुद्धित्वत्वा० C. 13. तूत्पत्तिवाक्ये C. 14. वाग्देवेन० C, वाग्वक्तेन० E. 15. द्विश्व A, दृश्य C, दिव्य E.

इति पञ्चादशसामिधेनी[16]वैजं मन्त्रोऽभिवदति ॥ ६२ ॥

ननु प्रमाणशब्दानामनुवादकत्वं न शिष्टपरिगृहीतमित्यत आह—

वाक्यविभागस्य चार्थग्रहणात् ॥ ६३ ॥

अनुवादे वाक्यविभागस्य शिष्टैः[17] परिग्रहादित्यर्थः। यद् वा—अप्रामाण्याभावे प्रामाण्ये वा हेतुमाह—वाक्येति। अर्थग्रहणाद्दर्शनात्, विभक्तवाक्यत्वं फलितो हेतुः, विभक्ताप्रमाणे [?] तदर्थेण च विशेषणार्थ [? °णान्न] व्यभिचारः ॥ ६३ ॥

कीदृशो विभाग इत्यत आह—

विध्यर्थवादानुवादवचनविनियोगात् ॥ ६४ ॥

विधिरूपतयाऽर्थवादरूपतयाऽनुवादरूपतया च वचनानां वाक्यानां विनियोगाद् व्यवहारात् वाक्यं त्रिविधमिति भावः।

परे तु—वाक्यविभागस्य वेदस्य चार्थो नाप्रामाण्यम्, अर्थग्रहणात् शिष्टानुगृहीतत्वात् प्रमाणत्वप्रमाविषयत्वादिति यावत्। प्रसङ्गाद् वाक्यं विभजते विध्यर्थेतीति वदन्ति ॥ ६४ ॥

अत्र विधिलक्षणमाह—

विधिर्विधायकः ॥ ६५ ॥

विधायकः प्रवर्तकः, प्रवृत्तिजनकीभूतज्ञानजनकेष्टसाधनताशक्तप्रत्ययसमभिव्याहृतवाक्यमिति यावत्, यथा—

"अग्निहोत्रं जुहुयात् स्वर्गकामः" [तैत्तिरीय ब्राह्मण २।१] इत्यादि।

परे तु—इष्टसाधनत्वबलवदनिष्टाजनकत्वान्यतरबोधकप्रत्ययसमभिव्याहृतं वाक्यं सः, तेन निषेधविधेर्हिंसादिविधेश्च संग्रह इत्याहुः ॥ ६५ ॥

अर्थमिष्टमनिष्टम्वा वदतीत्यर्थ[18]वाद इति योग[19]बलादेव इष्टसाधनता-

16. °धेनां C. 17. शिष्टेः C. 18. °तीनुर्थ° E. 19. याग° C.

शक्तप्रत्ययातिरिक्तेष्टानिष्टान्यतरसाधनताबोधकसमभिव्याहृतवाक्यमर्थ-वाद इति[20] लक्षणलाभाद् विभागमाह—

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६६ ॥

स्तुतिरिष्टसाधनता[21]शक्तप्रत्ययातिरिक्तेष्टबोधकसमभिव्याहृतं वाक्यम्, यथा—"सर्वजिता[22] वै देवाः सर्वमजयन् सर्वस्याप्त्यै[23] सर्वस्य जित्यै [24]सर्वमेवैतेनाप्नोति सर्वं जयती"त्यादि ।

निन्दा अनिष्टबोधकसमभिव्याहृतं वाक्यम्, यथा—

"एष वा प्रथमो यज्ञानां यज्ज्योतिष्टोमो य[25] एतेनानिष्ट्वा अथान्येन यजते स [26]गर्त्यपत्यमेव तज्जीर्यते वा प्र वा मीयते"[27] इत्यादि ।

पुरुषविशेषसम्बन्धितया पूर्वविरुद्धवचनं परकृतिः, यथा—

"हुत्वा वपा[28]मेवाग्रेऽभिघा[29]रयन्त्यथ[30] पृषदाज्यं तदु ह[31] चर-काध्वर्यवः[32] पृषदाज्यमेवाग्रेऽभिघारयन्त्यग्नेः प्राणा वै पृषदाज्य[33]-स्तोममि"त्यादि† ।

ऐतिह्यसमाचरिततया कीर्तनं पुराकल्पः, यथा—

"तस्माद्वा एतेन पुरा ब्राह्मणा वहिष्पवमानं[34] सामस्तोममस्तौषन्[35] योने यज्ञं[36] प्रतनवामहे"[37][ ] इत्यादि, यथा वा—"ब्राह्मणो वै ब्राह्मणमुपधावती"-[ ] त्यादि†† ॥ ६६ ॥

---

20. इति om. C. 21. ०साधना० A. 22. सरजिता C. 23. ०स्याप्तौ C. 24. ववासवे० C. 25. स C. 26-27. गर्ते पतयत्ययमेवैतज्जीर्यते वा प्रमीयते A, C and E give a similar reading, with गर्भे instead of गर्ते. Text emended in the light of ताण्ड्यमहाब्राह्मण १६।१।२. 28. रपा० C, E. 29. ०भिघा० C,E. 30. ०न्त्यर्थं C. 31. तदूह C, तत्वह E, 32. चरकावर्यंवः C. 33. ०दाज्या० C. † शतपथब्राह्मण ३।८।२।२४ contains a similar line. 34. वहिः परमाण C. 35. सामास्तामतोनयन C, सामास्तामतोषपन् E. 36. योऽनेयंज्ञं C, E. 37. प्रत्यहवामहे A, ग्रहणनामाह C, E. Text

अनुवादलक्षणमाह—

विधिविहितस्यानुवचनमनुवादः ॥ ६७ ॥

अनु पश्चाद् वचनं[38] तदर्थकवाक्योत्तरं तदर्थकवाक्यमनुवाद इति सामान्यलक्षणम्, तद्विशेषो विध्यनुवादो विहितानुवादश्च, तत्राद्यः शब्दानुवादापरनामा तादृशानुपूर्विका तादृशानुपूर्वी, चरमोऽर्थानुवादापरनामा तदानुपूर्वीसमानात्मिका तादृशानुपूर्वीभिन्ना तदुत्तरानुपूर्वी ॥ ६७ ॥

अनुवादलक्षणं पुनरुक्तातिव्याप्तमित्याक्षिपति ††—

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥ ६८ ॥

[39]अनयोरविशेषः[40], उभयत्रापि शब्दाभ्यासस्य शब्दपौनःपुन्यस्योपपत्तेः ॥ ६८ ॥

सिद्धान्तयति—

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६९ ॥

यथा 'शीघ्रं शीघ्रं गम्यतामि'त्यभ्यासेन शीघ्रतरगमनोपदेश[41]स्तथाऽर्थविशेषलाभान्नाविशेष[42] इति भावः ॥ ६९ ॥

अप्रामाण्यं निराकृत्य प्रामाण्यं साधयति—

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ७० ॥

दृष्टार्थविषघ्नमन्त्रादीनामायुर्वेदस्य[43] च प्रामाण्यमिव प्रमाणमन्त्रायुर्वेदवत्तेषां[44] प्रामाण्यम्; आप्तं[45] गृहीतं प्रामाण्यं येन वेदत्वेन, तस्मात्;

---

emended in the light of न्यायभाष्य and न्यायसूत्रवृत्ति. †साममन्त्रब्राह्मण १।४।१।४ contains a similar expression. 38. वदनं C, E. †† भ्रान्त आक्षिपति C, E. 39-40. शब्दो बोधजनकत्वेनाविशेषः तदेव कुत C, E. 41. ०गमनो देशः C, E. 42. ०लाभाद्वा विशेषः C. E. 43. मन्त्रादीनां माज्यवदस्य C. ०विषघ्नद्यसत्तादीनामाप्ग्मवदस्य E. 44. ०वेंदवद्वात्तेषां C, E. 45. प्राप्तं C.

वेदाः प्रमाणं वेदत्वात्, मन्त्रायुर्वेद[M]वदिति भावः[46]। वेदत्वं स्मृत्यादि-भिन्नलौकिकभिन्नवाक्य[M]त्वम्, उपदेशसहकृतप्रत्यक्षवेद्योऽखण्ड एव वा कश्चन धर्म इति।

यद्वा—आप्तं सम्बद्धं[47] प्रामाण्यं यत्र योग्यताज्ञाने तस्मादित्यर्थः, वेदाः प्रमाणं योग्यताप्रमावत्त्वादिति भावः। [N]आप्तप्रामाण्यादाप्तोक्त-त्वादित्यर्थ इति केचित्[N] ॥ ७० ॥

॥ समाप्तं शब्दविशेषवेदपरीक्षाप्रकरणम् ॥

॥ इति द्वितीयस्याद्यमाह्निकं विभागपरीक्षानिरपेक्षसाङ्ग-प्रमाणपरीक्षणं नाम ॥

M—M. om. C. 46. •विति वः E. 47. संबद्ध om. C.
N—N. om. C, E.

द्वितीयाध्यायस्य द्वितीयाह्निकम्

इदानीं[1] विभागसापेक्षप्रमाणपरीक्षणमारभते। अत्र[2] द्वितीयाह्निके चत्वारि प्रकरणानि। तत्र प्रमाणचतुष्ट्वमाक्षिपति[3]—

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥ १ ॥

न[4] प्रमाणचतुष्ट्वं प्रमाणत्वं न प्रत्यक्षादिचतुष्टयान्यतमव्याप्यं प्रत्यक्षाद्यन्यवृत्तित्वादिति फलितार्थः। ऐतिह्यम् अनिर्दिष्टप्रवक्तृकं[5] प्रवादपारम्पर्यम्,[6] विशेषतोऽज्ञातप्रवक्तृकः[7] प्रवादः, यथा[8]—

"वटे वटे यक्षः"

इत्यादि, तज्जन्यधीर्वा,[9] विशेषत आप्तोक्तनिश्चयाभावान्न ततः शाब्दधीरित्यभिमानः[10]। अर्थापत्तिर्व्यतिरेकव्याप्तिविशिष्टवत्तानिश्चयजन्यज्ञानविशेषस्तत्करणं वा, यथा—'असत्सु मेघेषु न [11]वृष्टि'रिति ज्ञानाद् वृष्ट्या[12] मेघज्ञानं [13]तत्करणं वा[14], अन्वयव्याप्तिधीरेवानुमितिबीजमित्यभिमानः। सम्भवो [15]व्यापकत्वाविषयकसहचारधीजन्यज्ञानं तत्करणं वा, यथा—'सम्भवति मेघे जलमि'त्यादिमेघदर्शनाज्जलविज्ञानं तत्करणं वा। अभावः कार्याभावादिना[16] कारणाभावादिविज्ञानं तत्करणं [17]कार्याभावादि वा। भावनिष्ठ[18]व्याप्तिधीरेवानुमितिबीजमित्यभिमानः ॥ १ ॥

सिद्धान्तसूत्रम्—

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानामनर्थान्तरभावाच्चाप्रतिषेधः ॥ २ ॥

---

1. ०सापेक्ष्य० C. 2. तत्र C, E. 3. ०चतुष्टयमा० F. 4. स C. 5. ०प्रवृत्तिकं C. 6. ०म्पर्यः C. 7. ०वक्तृकण्ठः C. 8. यथा om. C,F, occurs as marginal insertion in A. 9. धीवश C. 10. ०भिनमनः C. 11. वृत्ति० C. 12. दृष्टया C. 13-14. om. C, F. 15. व्यापकता C. F. 16. कार्यादिना C. 17-18. कार्या०......भावपिष्ट०

प्रामाण्यं न प्रत्यक्षादिचतुष्टयान्यतमत्वव्याप्यमिति प्रतिषेधो न। शाब्दे ऐतिह्यस्यानर्थान्तरभावोऽन्तर्भावः, विशेषत आप्तोक्तत्वं न शाब्द[19]-प्रयोजकम्, न वाऽनुमितौ लिङ्गस्य भावत्वं तन्त्रम्। व्यतिरेकव्याप्ति-धीरप्यनुमितावङ्गमित्यन्यत्र व्यवस्थापितम्, व्याप्तिग्रहमन्तरेण [20]सह-चारग्रहान्न[21] जायत एव स्मरणेतरबोध इति भावः॥ २॥

आक्षिपति—

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्॥ ३॥

अर्थापत्तिर्व्यतिरेकव्याप्तिज्ञानमप्रमाणम् अनुमितावकरणम्, अनैकान्तिकत्वाद् व्यतिरेकव्याप्तिज्ञानं विनाऽप्यन्वयव्याप्तिज्ञानादनुमित्युत्पत्तेः। यद् वा—अर्थापत्तिः साध्याभावसहचारा[22]भावप्रतियोगिमत्ता[23]ज्ञान-मिति भ्रान्ताशङ्केयम्, अनैकान्तिकत्वात् अन्वयव्यभिचारादित्यर्थः॥३॥

सिद्धान्तसूत्रम्—

नानर्थापत्तावर्थापत्त्यभिमानात्॥ ४॥

अनुमानशब्द इवार्थापत्तिशब्दोऽपि फले करणे च वर्तते, तथा चानर्थापत्तौ अर्थापत्त्यजन्येऽर्थापत्तिजन्यत्वाभिमानाद् व्यतिरेकव्याप्तिज्ञानजन्यता[न]-वच्छेदके तज्जन्यतावच्छेदकत्वभ्रमादिति यावत्। न ह्यनुमितित्वं व्यति-रेककव्याप्तिधीजन्यतावच्छेदकं किन्तु तद्विशेषः, स चान्वयव्याप्तिमात्रा-जन्यानुमितित्व[24] तत्तद्व्यक्तित्वमखण्ड एवोपाधिविशेषः इत्यन्यदेतत्। अर्थापत्तिजनकतानवच्छेदके तज्जनकतावच्छेदकत्वाभिमानादिति वाऽर्थः, न हि व्यतिरेकव्याप्तित्वाद्धेतुमत्पक्षज्ञानत्वं तज्जनकतावच्छेदकं किन्तु व्यभिचारधीविरोधिज्ञानत्वादिकमन्वयव्यतिरेकिपरामर्शान्य-तरत्वम्वेति भावः। पक्षताजन्यधीत्वमेव [? पक्षताधीजन्यत्वमेव] च

C, कार्याभावाभावनिष्ठं॰ F. 19. शाब्दे C. 20-21. सहाचार॰ A, ॰ग्रहार्थं C. 22. ॰सहचारो C. 23. ॰योगिसत्ता॰ F. 24. मात्रजन्या॰ F.

तद्विज्ञानस्यानुमितित्वे बीजमिति वदन्ति। यद् वा—अनर्थापत्तौ ज्ञानविशेषाकरणे तत्करणत्वाभिमानात्, न हि साध्याभावसहचराभावप्रतियोगिमत्ताधीः[25] तद्बीजमपि तु साध्याभावव्यापकाभावप्रतियोगिमत्ताधीरिति भावः॥ ४॥

प्रतिवन्दिमुखेनोत्तरमाह—

प्रतिषेधाप्रामाण्यञ्चानैकान्तिकत्वात् ॥ ५॥

प्रतिषेधस्य प्रतिषेधकस्य [26]तदनैकान्तिकत्वनिष्ठतज्जन्यत्वाभावव्याप्तिज्ञानस्य च अप्रामाण्यम् अनुमित्यजनकत्वं प्रसज्येत, अनुमितिसामान्येऽनैकान्तिकत्वादित्यर्थः। यद् वा—प्रतिषेधकस्यानैकान्तिकत्वनिष्ठतज्जन्यत्वाभावसामानाधिकरण्यज्ञानस्याप्रामाण्यमनुमित्यजनकत्वं स्यात्, अन्वयव्यभिचारादित्यर्थः॥ ५॥

अथानुमितिविशेष एव प्रतिषेधककार्यः, नियतसामानाधिकरण्यज्ञानमेव च प्रतिषेधानुमितौ बीजमिति प्रतिषेधकप्रामाण्यम्, तर्हि अर्थापत्तेरपि तदित्याह—

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६॥

तुल्यन्यायादिति भावः।

सम्प्रदायविदस्तु अर्थापत्तिरप्रमाणमित्यादिनी सूत्राण्येवं व्याचक्षते। वृष्ट्यभावे मेघाभावव्यापकताग्रहाद्दृष्ट्या मेघोऽर्थादापद्यत[27] इति वस्तुगतिः, मेघाभावे वृष्ट्यभावव्यापकताताग्रहान्मेघेत वृष्टिरर्थादापद्यत इति भ्रान्त आशङ्कते—अर्थापत्तिरप्रमाणमिति। अर्थापादकमप्रमाणं मेघादेर्वृष्ट्यादिव्यभिचारित्वादित्यर्थः। सिद्धान्तसूत्रम्—नानर्थापत्ताविति। मेघादि नार्थापत्तिकरणमपि तु वृष्ट्यादि, तत्र च न व्यभिचारोऽस्तीति

25. ०सत्ताग्रोः C. 26. तदा°C, F. 27. मेघोऽन्यादयत्यत्र C.

भावः। अथ वृष्ट्यादिकमपि न मेघादिसाधकं मेघादेवृष्ट्यादिव्यभिचारित्वात्, साध्ये हेतुव्यभिचारस्यापि हेतौ साध्यव्याप्तिधीविरोधित्वादित्यत्र व्याघातमाह—प्रतिषेधेति। 'वृष्ट्यादि न[28] मेघादिसाधकं [29]स्वव्यभिचारिमेघादिकत्वादि'ति प्रतिषेधस्यापि न प्रामाण्यं तत्र साध्यहेत्वो[30]र्व्यभिचारादित्यर्थः। अथ साध्ये हेतुव्यभिचारग्रहो[30] न विरोधी विरोध्यविषयकत्वादिति चेत्, तुल्यमिहापीत्याह—तत्प्रामाण्ये वेतीति वदन्ति ॥ ६ ॥

अभावप्रामाण्यमाक्षिपति—

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥

प्रमेयस्याभावस्य (असिद्धेः), [31]प्रमेयत्वस्य भावत्वव्याप्यत्वात्[32] प्रमाणत्वमपि तथेति भावः॥ [33]अभावत्वात्यन्ताभावत्वादिकन्तु नासिद्धं तथा प्रतीतेः, परन्तु तद्भाववृत्तीति हृदयम् ॥ ७ ॥

सिद्धान्तसूत्रम्—

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः ॥ ८ ॥

तस्याभावस्य प्रमेयस्य सिद्धिः, लक्षितेषु घटादिषु अलक्षितानां पटादीनां यदलक्षणं [34]पटत्वाद्यभावस्तेन लक्षितत्वात् साक्षात्कृतत्वात्। यद् वा—लक्षितेष्विवेति लक्षणलक्षितत्वस्येवेति शेषः ॥ ८ ॥

आक्षिप्य निराकरोति—

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥ ९ ॥

असति तद्वत्तयाऽसति अर्थे न[35] तदभावः तत्र प्रतियोगिप्रसिद्धेस्तत्राभावग्रहहेतुत्वादिति भावः। चेन्नेति[36]। अन्यत्र लक्षणस्य प्रति-

---

28. वृष्ट्यादिना C, F. 29. अभिचारि° C, F. 30. °चारिग्रहो C, F. 31-32. प्रमेयत्वस्याभावत्वाव्याप्य० C, प्रमेयत्वस्य भावत्वाव्याप्य० F. 33. अभावात्य० A. 34. घटत्वा० F. 35. अर्थेण C, आत्मन F. 36. चेर्षेति C.

योगिन उपपत्तेर्ग्रहाश्च प्रतियोगिग्रहमात्रं कारणम्, लाघवादिति भावः ॥ ९ ॥

आक्षिपति—

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

लक्षितेषु पटादिषु तत्सिद्धेर्लक्षणस्य पटत्वादेर्निश्चयात् अलक्षितेषु घटादिषु पटत्वादेरभावोऽहेतुः, प्रतीतौ विषयतयाऽहेतुर्घटादौ प्रतीत्यविषय इति यावत्, तन्निश्चयस्य[37] तदभावग्रहप्रतिबन्धकत्वादिति भावः ॥ १० ॥

उत्तरम्—

न लक्षणावस्थितापेक्षसिद्धेः ॥ ११ ॥

लक्षणस्य पटत्वादेरवस्थितं यत्र तदपेक्षसिद्धेः, नेत्यस्य[38] विरोधित्वमिति शेषः। यद् वा—नेत्यस्य पूर्वपक्षो नेत्यर्थः, लक्षणं साक्षात्कारः, तद्विशेष्यविशेष्यकसिद्धेरेव विरोधित्वमित्यर्थः, समानविशेष्यकनिश्चयस्यैव विरोधित्वं फलबलादिति[39] भावः।

यद् वा—असत्यर्थेऽलीके पटत्वादौ नाभावः[40] प्रतियोगितयेत्यर्थः[41], अन्यत्र [? अन्यस्य] घटादेरन्यत्र पटादौ तदुपपत्तेः पटत्वादेरसत्त्वात् तत्सिद्धेरिति, पटादिषु तस्य लक्षणस्य पटत्वादेः [42]सिद्धेरलक्षितेष्वघटादावभावप्रतीतेरहेतुत्वमुक्तयुक्तेरिति पूर्वपक्षः[43]। उत्तरम्[44]—न लक्षणं ज्ञानमात्रापेक्षसिद्धिकत्वादभावस्य[45], लाघवादित्यर्थः।

---

37. तन्नियमात् यस्य C. 38. ०इत्यस्य om. C, F. 39. ०वशादिति C, F. 40. लीकेनाभाव: C ; लीकेलाभाव: F. 41. प्रतियोगितया पटत्वादेरभावोऽङ्गीक्रियते, न तदलीकं C, F. 42-43. अलक्षितेषु पटादिषु तस्य क्षणस्य पटत्वादेः सिद्धेहेतुर्घटादावभावप्रतीतेनं हेतुत्वमिति पूर्वपक्षः C, F. 44. उत्तरम् om. C, F. 45. ०पेक्षासिद्धेरभावस्य C.

ᴹवस्तुतस्तु—अन्यलक्षणोपपत्तेरित्यस्य अन्यस्य पटाद्यन्तस्य [? °द्य-न्यस्य] लक्षणेन पटत्वादिना उपपत्तेर्ज्ञानादित्यर्थः, 'पटप्रागभाव' इत्यादि प्रत्यक्षे विशेषणतावच्छेदकप्रकारकज्ञानमेव हेतु नं प्रतियोगिज्ञान-मिति भावः। शङ्कते—तत्सिद्धेरिति। अलक्षितेषु अज्ञातेषु प्रति-योगिषु तत्सिद्धेः, 'पटप्रागभाव' इत्यादि यथार्थलक्षणांशे लौकिकप्रत्य-क्षस्य हेत्वभावः सन्निकर्षाभावभावभाविनि ज्ञानमेव सन्निकर्ष इति भावः। उत्तरम्—नेति। लक्षणं पटत्वादि, तज्ज्ञानजन्यप्रतियोगि-सिद्धेः पटत्वादिसामान्यलक्षणप्रत्यासत्त्या भावस्यैव ज्ञानमेव सन्निकर्षो-ऽस्तीति भावःᴹ ॥ ११ ॥

प्रागभावे मानमाह—

प्रागुत्पत्तेरभावोपपत्तेः ॥ १२ ॥

अभावस्य प्रागभावस्य उपपत्तेः साक्षात्कारात्, 'घटो भविष्यती'त्याकारादिति भावः ॥ १२ ॥

॥ समाप्तं प्रमाणचतुष्टयपरीक्षा प्रकरणम् ॥

प्रसङ्गात् शब्दनित्यत्वं मीमांसकाभिमतं निराकरोति—

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥ १३ ॥

शब्दोऽनित्य इति शेषः। आदिः कारणं तद्वत्त्वात्[1] ; ऐन्द्रियकत्वात् बहिरिन्द्रियजन्यलौकिकसाक्षात्कारविषयत्वात् ; कृतकवदुपचारात् कार्य इव प्रत्यक्षात्[2], कार्यत्वप्रकारकप्रत्यक्षविषयत्वादिति[3] यावत्। कार्य-त्वादिति हेतुसाधकश्चैतत्[4], अस्ति च 'उत्पन्नो गकार' इति प्रत्यक्षम्।

M—M. om. C,F. The text of commentary on न लक्षणावस्थिता-पेक्षसिद्धेः is not satisfactory.

1. तद्वत्तात् C. 2. च add. C. 3. ०विषयत्वाच्चेति C. 4. ०साधकत्वे तत् C.

यद्वा—कृतकवदिति दृष्टान्तः, कृतकपदञ्च कृतकविशेषघटतद्रूपादिपरम्, उपचारादिति विनाशित्वेन प्रत्यक्षादित्यर्थः, तथा च 'विनष्टो गकार' इति प्रत्यक्षमेव मानमुक्तमिति भावः ॥ १३ ॥

आक्षिपति—

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च ॥ १४ ॥

कार्यत्वादि[5] न हेतुः, कार्यस्यापि घट[6]ध्वंसस्य ऐन्द्रियकस्यापि घटत्वादेर्नाशाप्रतियोगित्वात्, नित्येष्वप्यात्मादिषु अनित्यवदुपचारात्, 'सुखी उत्पन्नः दुःखी नष्ट' इत्यादि प्रत्यक्षाच्च। तथा च कार्यत्वप्रत्यक्षविषयत्वमनित्यत्व[7]व्यभिचारि, कार्यत्वानित्यत्वाभ्यां प्रत्यक्षञ्च[8] न तत्साधकमिति ॥ १४ ॥

अन्त्ये समाधानमाह[9]—

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः ॥ १५ ॥

यथार्थायथार्थयोर्भेदेन प्रतीतेर्नानात्वस्य साधकासाधकत्वस्य व्यवस्थितेरव्यभिचार इत्यर्थः। तादृशप्रमाविषयत्वं हेतुः, प्रमैव च विषयसाधिका, आत्मावगाहिनः 'सुखी नष्ट' इत्यादेश्च न प्रामाण्यमिति भावः ॥ १५ ॥

द्वितीयप्रथमयोर्व्यभिचारमुद्धरति—

सन्तानानुमानविशेषणात् ॥ १६ ॥

सन्तानः सम्यग् विस्तीर्णः सम्यक्सम्बद्धः समवेत इति यावत्, यद्वा—सन्तानः सन्तन्यमानवृत्तिधर्मः गुणत्वजातिमत्वादिकमिति यावत्, तेनानुमानस्य हेतोर्विशेषणादव्यभिचार इति भावः ॥ १६ ॥

5. ०त्वादिति C. 6. घट० om. A. 7. ०विषयत्वमनित्य० A, ०विषयत्वानित्यत्व० C, ०विषयत्वानियत्व० F. 8. प्रत्यक्षत्वञ्च C. 9. समाधिमाह C.

शब्दो द्रव्यहेतुकः समवेतत्वे सत्यव्याप्यवृत्तित्वात् संयोगवदिति हेतु-साधकानुमानाभिप्रायेणाह—

कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ॥ १७ ॥

कारणं द्रव्यं यस्य तस्यैव प्रदेशशब्देनाव्याप्य[10]वृत्तिशब्देनाभिधानाद-व्याप्यवृत्तित्वादिति यावत् ।

प्राञ्चस्तु—कृतकवदुपचारादित्यस्य कृतक इव शब्दप्रयोगादित्यर्थः, 'उत्पन्नो गकार' इत्यादि शब्द एव तत्र मानमिति भावः । शब्दो न साधको व्यभिचारादित्याह—नित्येष्वपीति[11] । उपचारात् प्रयोगात्, स च 'आकाशस्य प्रदेश'[12] इत्यादि प्रथमहेतावुक्तम् । ध्वंसे व्यभि-चारमुद्धरति—तत्त्वेति । अयम्भावः—अनित्यत्वं नित्यत्वाभावः, नित्य-त्वञ्च ध्वंसाप्रतियोगित्वे[13] सति प्रागभावाप्रतियोगित्वं सदातनत्वं[14] वा, न चेदृशं नित्यत्वं ध्वंस इति ध्वंसे साध्यसत्त्वान्न व्यभिचारः, ध्वंसे नित्य[त्व]प्रयोगस्तु ध्वंसाप्रतियोगित्वमादाय भाक्त इति । द्वितीये तमुद्धरति—सन्तानेति । जातिमत्त्वे[15]नानुमानविशेषणादित्यर्थः । तृतीय आह—कारणेति । [16]कारणद्रव्यं समवेतद्रव्यमित्यर्थः, प्रदेश-शब्देन तस्यैवावयवाभिधानादित्यर्थः । कस्तर्हि 'आकाशस्य प्रदेश' इत्यत्र प्रदेशशब्दार्थः ? संयोगिद्रव्यमिति गृहाण, न चेदं बाधितमिति न व्यभिचार इति भावः । न कारणद्रव्यस्येति क्वचित्कपाठस्तु सम्मुख एव समीचीनः, अत्र प्रदेशशब्देन समवायिकारणस्यानभिधानादिति तदर्थादित्याहुः ॥ १७ ॥

कार्यत्वे तर्कं प्रमाणान्तरमाह—

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १८ ॥

---

10. °व्याप्त° C. 11. नित्येष्टपीति C. 12. अर्थाकारस्य प्रादेश C, आकारस्य प्रदेश F. 13. °योगिमत्त्वे A. 14. सदातनत्वं om. C. 15. °सत्त्वे° C, F. 16. कारणे द्रव्यं add. F.

शब्दस्याकार्यत्वे उच्चारणात् प्रागुपलभ्येत, तदानीं सततस्तस्य श्रवण[17]-सन्निकर्षात्, न च तदा प्रतिबन्धकसद्भावः, प्रतिबन्धकस्यानुपलब्धेस्तद-भावात्, अतीन्द्रियानित्यप्रतिबन्धककल्पनापेक्षया च शब्दानित्यत्वकल्प-नैव लघीयसीति भावः ॥ १८ ॥

अत्र भ्रान्ताक्षेपसूत्रम्—

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ १९ ॥

आवरणानुपलब्धेः [18]स्वानुपलम्भात्मकत्वादावरणानुपलब्धेरनुपलब्धेर-भाव आवरणस्य उपपत्तिरुपलम्भः स्यात्, तथा च सिद्धमावरणेनेति भावः ॥ १९ ॥

अथावरणानुपलब्धेरनुपलम्भेऽपि[19] न तदभावस्तर्ह्यावरणानुपलम्भादपि नावरणाभाव इत्याह—

अनुपलम्भादप्यनुपलब्धेः सद्भाववदावरणानुपपत्तिरनुपलम्भात् ॥ २० ॥

अनुपलम्भादिति आवरणानुपलब्धे-[?]-रित्यादिः। अनुपलब्धिवा-रण[? अनुपलब्धेरावरणं]स्यानुपपत्तिरभावः आवरणानुपलब्धित आव-रणाभावोऽपि नेत्यर्थः ॥ २० ॥

सिद्धान्तसूत्रम्—

अनुपालम्भकत्वादनुपलब्धेरहेतुः ॥ २१ ॥

आवरणानुपलब्धेरावणा[20]नुपलम्भात्मकत्वमेव न स्वानुपालम्भात्मकत्वम्, अत[21] आवरणानुपलब्धेरनुपपत्तित्वं[22] न हेतुः, स्वरूपासिद्धत्वादिति भावः ॥ २१ ॥

17. कारण० A. 18. स्व om. C, F. 19. ०वरणानुपलम्भेऽपि C.
20. ०लब्धे वारणा० C. 21. अत्र C. 22. ०रनुपलब्धिः A.

अनित्यत्वसिद्धिं सत्प्रतिपक्षेणाक्षिपति—

अस्पर्शत्वात् ।। २२ ।।

शब्दो नित्यः अस्पर्शत्वात्[23] गगनवदिति भावः ।। २२ ।।

उत्तरम्—

न कर्मानित्यत्वात् ।। २३ ।।

अस्पर्शत्वं कर्मणि[24]नित्यत्वव्यभिचारि, द्रव्यत्वविशेषितन्तु[25] स्वरूपासिद्धमिति भावः ।। २३ ।।

अथ श्रोत्रेतरेन्द्रियाग्राह्य[26]समवायित्वे[27] सतीति विशेषणान्नायं[28] दोष[29] इत्यत आह—

नाणुनित्यत्वात् ।। २४ ।।

द्व्यणुकपरिमाणे नित्यत्वाभावादित्यर्थः, तथा च तत्रैवमपि व्यभिचार इति भावः। यद्वा—अन्वयेन व्यभिचारमुपदर्श्य व्यतिरेकव्यभिचारमाह—नाण्विति[30] ।। २४ ।।

तथा[?तमा०]क्षिपति—

सम्प्रदानात् ।। २५ ।।

सम्प्रदीयमानत्वादित्यर्थः। सम्प्रदीयते च आचार्येणान्तेवासिने, तृतीयक्षणवृत्तिध्वंसा[31]प्रतियोगी शब्दः स्थिर इत्यादिः। स्थैर्यञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगी यो यस्तदन्यत्वम्, उत्तरकालश्च[32] पक्षतावच्छेदकविशिष्टसाध्येन नित्यत्वं[33] साधनीयमिति भावः ।। २५ ।।

---

23. अस्पर्शत्वात् om. A. 24. कर्माणि C, F. 25. ०विशेष तन्तु० A. 26. ०ग्राह्ये० F. 27. ०वायित्व C. 28. ०षणान्वये C. 29. द्दोष C. 30. नानुमिति C, नार्षेति F. 31. ०वृत्तिध्वंसेतरध्वंसा० C, F. 32. ०कालपञ्च C. 33. ०साध्यानित्यत्वम् A.

उत्तरम्—

तदन्तरालानुपलब्धेरहेतुः ॥ २६ ॥

तस्य योग्यशब्दस्यान्तराले मध्यसमयेऽनुपलब्धेरयमहेतुः, बाधितो प्रतिपक्षितो वेत्यर्थः। उत्तरसूत्रे च प्रतिषेधपदं न प्रागुक्तदूषणपरमिति न तदनुपपत्तिः आचार्योक्तपदमादधाति, स्थैर्यसाधकस्य भूयस्त्वेनाधिकबलवत्त्वमित्यभिप्रायेणोत्तर[34]सूत्रम् ॥ २६ ॥

आक्षिपति—

अध्यापनादप्रतिषेधः ॥ २७ ॥

स्थैर्यस्य प्रतिषेधो न, अध्यापनात्, अव्यवधानेन गुरूच्चारितोच्चारणं तद्विशेषो वाऽध्यापनम्, न चास्थैर्ये इदं घटते इति भावः ॥ २७ ॥

उत्तरम्—

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥ २८ ॥

उभयोः स्थैर्या[35]स्थैर्ययोः पक्षयोरध्यापनसम्भवादन्यतरस्य अस्थैर्यस्य प्रतिषेधो नेत्यर्थः। उक्तमध्यापन[36]मसिद्धम्, गुरूच्चरितसजातीयोच्चारणादिकन्तु न स्थैर्यसाधकम्, कथमन्यथा ध्वनी[37]नामध्यापनमिति भावः।

भाष्यादौ तु तदन्तराल इत्यादिसूत्राणामेवमुपवर्णनम्—तयोर्दातृप्रतिगृहीत्रो[38]र्मध्ये कस्यापि शब्दे मानाभावेन स्वत्वानुपलब्धेरयमहेतुः[39] स्वरूपासिद्ध इत्यर्थः।[40] स्वस्वत्वध्वंसपूर्वकपरस्वत्वापादनं हि दानमिति भावः। तत्र शङ्कते[41]—अध्यापनादिति। गुरुणा शिष्यायोपदिश्यमानत्वादित्यर्थः। एवञ्च शब्दो दीयमानः, गुरुणा शिष्यायोप-

34. ०प्रायेण वोत्तर० C, F. 35. स्थैर्या० om. C. 36. ०पन्न० C.
37. धूली० C. 38. ०गृहीतयो० C, F. 39. स्वस्वानुपपत्तेरवयवहेतुः C.
40. ०सिद्धिरित्यर्थः F. 41. मानमाशङ्कते C, F.

दिश्यमानत्वात्, धनुर्वेदाचार्येणादिश्यमानेष्वादि[42]वदिति। निरा-करोति—उभयेति। स्वत्वे तदभावे च नृत्यादा[43]वध्यापनसम्भवात् प्रतिषेध[44]प्रतिषेधो नेत्यर्थः।

आचार्यास्तु—'अहेतोस्तदन्तरालानुपलब्धि'रिति[45] विभक्तिव्यत्या-सेन स्वत्वहेत्वभावात्तत्साधकमानाभावाद्वा[46] [47]तस्य हेतोरन्तरालानु-पलब्धिरवकाशाभाव[48] इत्यर्थः। सम्प्रदानमित्यध्यापनं ब्रूमो न तु स्वत्वत्यागादिक[49]मित्यभिप्रायेणाशङ्कते—अध्यापनादिति। गुरुणोप[50]दिश्यमानत्वादित्यर्थः। उभयोरिति। व्याहर्तव्यत्वेनोपदेशोऽसिद्धो-ऽनुकर्तव्यत्वेन च नृत्यादौ[51] व्यभिचारीत्यर्थमाहुः॥ २८॥

आक्षिपति—

अभ्यासात्॥ २९॥

वर्णः स्थिर इत्यादि। अभ्यासः प्रत्यभिज्ञा पुनःपुनरुच्चारणम्वा, स च स्थैर्य एवोपपद्यत इति भावः अस्ति च 'स एवायं गकारो मयोच्चार्यते यः पूर्वमुच्चारित' इत्याद्यध्यक्षम्॥ २९॥

उत्तरम्—

नान्यत्वेऽप्यभ्यासस्योपचारात्॥ ३०॥

उपचारात् उपलब्धेः, 'तदेव मयेदानीं नृत्यते यत् पूर्वं नर्तितम्' इत्यादि-दर्शनादित्यर्थः। [52]क्वचिदभ्यासोपपत्तेरिति भावः [? पाठः][53]। [54]उच्चारितोच्चारणमभ्यासो न शब्दे किन्तूच्चरितजातीयोच्चारणम्[55],

---

42. ०मानस्वादि० A. 43. इत्यादा० C. 44. प्रतिषेध० om. C. 45. अहेतेस्तेवं तदावरणानुपलब्धे० C, अहृतेस्तदंतरावरलानुपलब्धि० F. 46. वा om. A. 47-48. तभाववकाशाभाव C, तस्य भावहेतोरवकाशाभाव F. 49. स्वत्वत्यादिक० C. 50. गुरुपाप० C. 51. सदृत्यादौ C. 52-53. om. in A. 54. उच्चारित० A. 55. ०च्चरणम् A.

प्रत्यभिज्ञा च[56] गत्वाद्यवच्छिन्नप्रतियोगिताकभेदाभावमालम्बते, न तद्गत्वावच्छिन्नप्रतियोगिताकभेदाभावमिति भावः ॥ ३० ॥

जात्युत्तरेणान्यत्वमाक्षिपति[57]—

अन्यदन्यस्मादनन्यत्वादन्यदित्यन्यताभावः ॥ ३१ ॥

स्वान्यस्मादन्यत्वेनाभिमतं वस्तु स्वतो[58]ऽनन्यत्वेन प्रतीयमानत्वादनन्यदित्यन्यत्वविरुद्धस्यानन्यत्वसत्त्वात् अन्यत्वात्यन्ताभाव इत्यर्थः ॥ ३१ ॥

समाधिसूत्रम्—

तदभावे नास्त्यनन्यताऽपि तयोरितरेतरापेक्षसिद्धेः ॥ ३२ ॥

तस्य अन्यत्वस्याभावे तयोर्मध्ये इतरस्यानन्यत्वस्य इतरापेक्षसिद्धेः अन्यत्वज्ञानाधीनसिद्धिकत्वात्, स्वानन्यत्वस्वभिन्नान्यत्वयोश्च न विरोध इति तु वस्तुगतिः ॥३२ ॥

आक्षिपति—

विनाशकारणानुपलब्धेः ॥ ३३ ॥

शब्दो नित्य इति प्रकृतम् ॥ ३३ ॥

उपलब्धिपदं प्रत्यक्षपरं बुद्धिमात्रपरम्वा, आद्ये व्यभिचार इत्यभिप्रायेण प्रतिबन्दिमाह—

श्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ ३४ ॥

उच्चारणानन्तरं प्रहरात् परमपि श्रवणकारणाभावानुपलब्धेरसत्त्वाद् विनाशकारणानुपलब्धेः श्रवणयावत्कारणसत्त्वात्तदाऽपि श्रवणप्रसङ्ग इति भावः ॥ ३४ ॥

---

56. च om. C. 57. जात्युत्तरेणाक्षिपति in all Mss except A.
58. वस्तुदंतो C.

द्वितीयेऽसिद्धिरभिप्रेत्याह—

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥ ३५ ॥

विनाशित्वेनैव[59] सहेतुकत्वानुमानाद्विनाशकारण उपलभ्यमाने विनाशकारणानुपलब्धेरसत्त्वाद्विनाशकारणानुपलब्धेरित्यनपदेशो हेतुर्न, स्वरूपासिद्धत्वादिति भावः ॥ ३५ ॥

विशिष्यापि[60] शब्दनाशकारणोपलम्भमाह—

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥ ३६ ॥

पाणिप्रभृतिनिमित्तानां प्रकृष्टः श्लेषः सम्बन्धः स्वकार्यशब्दकार्यत्वरूपो[61] यत्र तस्मादुत्तरशब्दत इति यावत्, ततः शब्दनाशे उपलभ्यमाने [62]नानुपलब्धिरितिभावः[63]। यद्वा—शब्दस्याभावो यस्मात् तस्मिन् पाणिप्रभृतिनिमित्तानां यः प्रकृष्टः श्लेषः संयोगः पूर्वशब्दोत्पादकविलक्षणसंयोगस्तस्मादुत्पद्यमाने शब्द इति यावत्, [64]तस्मिन्नुपलभ्यमान इत्यर्थः।[65] प्रतियोगिनि विनाशकारणे उपलभ्यमाने नानुपलब्धिरिति भावः। यद्वा—पूर्वानुमाने भागासिद्धिमाह—पाणीति[66]। पाणिना सह निमित्तानां घण्टादीनां यः प्रकृष्टः संयोगस्तस्मात् यः शब्दो ध्वनिरूपस्तस्य ध्वंसे सहेतुकतया[67] उभयवादिसिद्धे तत्र न विनाशकारणानुपलब्धिरिति ॥ ३६ ॥

शब्दानित्यत्वे प्राचामनुमानमाह—

अस्पर्शत्वादप्रतिषेधः ॥ ३७ ॥

अनित्यत्वप्रतिषेधो न, अनित्य एव अस्पर्शत्वात् स्पर्शविरोधित्वात्, निर्विषयकविशेष[68]गुणत्वे सती[69]त्यादि ॥ ३७ ॥

59. विना सत्त्वेनैव C. 60. विशिष्टोऽपि A. 61. कार्यशब्दत्वरूपो C, F. 62-63. om. C. इति भावः om. A. 64-65. om. C, F. 66. पाणीति om. C. 67. सहेतुकतया om. C, F. 68. विषय० C. 69. सत्त्वे० F.

तारमन्दादिरूपाणां[70] गकारादीनामैक्ये बाधकमाह—

विभक्त्यन्तरोपपत्तेश्च समासे ॥ ३८ ॥

तारत्वमन्दत्वादेः [71]समासे समावेशे[72] एकविभक्तिसाक्षात्कारसमये विभक्त्यन्तरसाक्षात्कारस्य प्रसङ्गाच्च, विभक्तिविभागस्तारत्वमन्दत्वादिरूपः ।

पाणो[73]त्यादित्रिसूत्री भाष्यादिकृतामाशयानुसारेण पुनरन्यथैव[74] व्याख्यायते[75] । ननु शब्दानित्यत्वेऽनुभवसिद्धस्तारमन्दादिभेदो नोपपद्येत, शब्दसमवायिकारण[76]गगनादीनामवैचित्र्यात्, कार्यवैचित्र्यस्य कारणवैचित्र्याधीनत्वात्, तस्मान्नित्या एव तारमन्दादिरूपा नाना गकाराः, एकगकारग्रहेऽपरा[77]ग्रहश्च व्यञ्जकवायुसंयोगविरहात् । समानदेशत्वे सति समानेन्द्रियग्राह्यत्वञ्च न प्रतिनियतव्यञ्जकव्यङ्ग्यत्वाभावनियतम्, मानाभावात् । उत्पादविनाशादिप्रत्ययः पुनरौपाधिकोऽनन्यगतिकत्वात्, परम्परासम्बन्धावलम्बित्वादनौपाधिको वेति चेत्; न, घण्टाकण्ठादिगतसंस्कारतारतम्यस्यैव शाब्दतारतम्यप्रयोजकत्वात्[78] । अथ भवेदेवेदं [79]यदि संस्कारो नाम कश्चित्

---

70. om. C, F. 71-72. समाससमावेशे C, F. 73. पपाली० C. 74. ०रन्यपथेव C, ०रन्यपथैव F. 75. व्याख्यायता C. व्याख्यायतो F. 76. शब्दकारणं A, शब्दाधिकरण० F. 77. ०ग्रहेऽपरा० om. C. 78. शब्दहरेतस्यप्रयो० C. After this, there is the following additional text in C and F, variants being put in brackets : तथाहि पाणिकर्मणा विभागोत्पत्तिसमये पाणौ (र रे F) वेगो (खे गौ C) जन्यते, ततः पूर्वसंयोगनाशः । अथ घण्टादण्डपाणिसंश्लेषः, अथ स्पर्शवद्वेगवत्पाणिसंश्लेषात् घण्टादण्डे कर्म, अथ घण्टादण्डविभागो वेगश्च, ततः पूर्वसंयोगनाशः । अथ घण्टादण्डस्थलोह (°दण्डतत्स्थानो° C) संयोगः । अथ लोहे वेगो (वोगा C) विभागश्च, ततः लोहवाय्योः पूर्व-(ततः पूर्व° C) संयोगनाशस्ततो लोहघण्टयोर्लोहगगनयोः संयोगास्ततः शब्दजन्म वायौ योग (वेग° F)-विभागश्चेत्येकः कालस्ततो वायौ पूर्वसंयोगनाशस्ततो विप्रवाद्यभिघातो(?) घण्टालोहे

तस्मात्, स एत्र नास्त्यनुपलब्धेरित्यत्र सौत्रमुत्तरम्—पाणिनिमित्त-प्रश्लेषाच्छब्दाभावे नानुपलब्धिः। पाणिघण्टाद्योः[80] प्रश्लेषाद्वेग-प्रतिबन्धकसंयोगविशेषादनन्तरं शब्दाभावेऽनुमानविधयोपलम्भके सति न वेगानुपलब्धिः। कार्याभावात् कारणाभावोऽनुमीयमानः पारिशे-ष्याद् वेग एव कारणत्वं विश्राम्यतीति[81] भावः।

सांख्याः पुनरेवमाहुः—शब्दो घण्टादीनामेव गुणो न त्वतिरिक्तस्य नभसः, सामानाधिकरण्यप्रत्यासत्त्यैव वेगस्य[82] शब्दहेतुत्वादन्यथाऽति-प्रसङ्गादिति। तन्मतमपाकरोति सूत्रकारः—अस्पर्शत्वादप्रतिषेधः। शब्दाश्रयस्यास्पर्शत्वनियमात् शब्दस्य नभोगुणत्वप्रतिषेधो नेत्यर्थः। घण्टादीनां[83] स्पर्शवत्त्वेन शब्दाश्रयत्वाभावात् शब्दस्य च[84] गुणत्वेन द्रव्यसमवेतत्वं सिध्यदतिरिक्तं गगनं सिध्यतीति भावः। शब्दस्या-वच्छेदकतासम्बन्धेन संस्कारसामानाधिकरण्याच्च[85] वैयधिकरण्यमिति हृदयम्। शब्दस्य घण्टादि[86]गुणत्वाभावे मानान्तरमप्याह—विभक्त्य-न्तरोपपत्तेश्च समासे। समासः सामानाधिकरण्यम्, विभक्तिर्विभाग-स्तारमन्दादिरूपः, उपपत्तिः सम्बन्धः; एवञ्च शब्दनिष्ठसामानाधिकरण्ये शब्दान्तरसम्बन्धादित्यर्थः, स्वेतरस्वसमान[87]जातीयसमानाधिकरण-प्रत्यक्ष[88]विशेषगुणत्वादिति तु पर्यवसितार्थः, 'न स्पर्शवत्समवेत' इति साध्यम्, ज्ञानादिकं दृष्टान्त इति तु हृदयम्। यद्वा—समासे स्पर्शादि-

---

ततस्तत्र कर्म ततो वेगो (वोगा C) विभागश्च ततः पूर्वसंयोगनाशस्ततो लोह-घण्टादिसंयोगस्ततः शब्दान्तरजन्म एवं पुनः पुनरपि वायुवेगादि बोध्यम्। तत्र वेगमान्द्यात् (तत्रानुगमान्त्यात् C) मन्दः शब्दस्तत्प्राबल्यात्तारः (°प्राबल्यात्तारः om. C) प्राबल्यातिशयात्तारतर (°शयातरेतर C) इति। 79. भवोदये C. 80. ०घण्टाभ्यो C. 81. विश्राम्यतीति C. 82. संस्कारस्य in A, corrected as संयोगस्य. 83. घटादीनां A. 84. च om. A. 85. ०करण्यार्थं C; ०करण्तात् F. (०करण्यार्थं) (०करण्यात्) 86. घण्टाघटादि A. 87. स्वेतरसमान० C. 88. ०करणपक्षीय० A.

समुदाये स्पर्शसमानाधिकरणप्रत्यक्ष[89]विशेषगुणविभक्त्यन्तरस्यैव स्वविजातीयस्यैवोपपत्तेः सामानाधिकरण्यात्, स्वसमानजातीयस्यासामानाधिकरण्यादिति यावत्, न हि प्रत्यक्ष[90]गन्धादिकं गन्धाद्यन्तर[91]-समानाधिकरणम्, एवञ्च[92] व्यतिरेकव्याप्तिः प्रदर्शिता भवतीति भावः ।। ३८ ।।

।। समाप्तं शब्दानित्यत्वप्रकरणम् ।।

प्रसङ्गात् परिणामवादं शब्दानां दूषयितुं विप्रतिपत्तिमाह—

विकारादेशोपदेशात् संशयः ।। ३९ ।।

विकारोपदेशात् 'कपालं घटो भवती'तिवत् 'इवर्णो यकारो भवती'त्युपदेशात्, आदेशस्य 'इकारे प्रयोक्तव्ये यकारः प्रयोक्तव्य' इत्यस्य यकारादाविकारादिस्मारकतोपयोगियथाकथञ्चित्सम्बन्धस्योपदेशादित्यर्थः। 'इको यणची'त्यादे[1]रुभयथा व्याख्यानात् संशय इति भावः। संशयश्च 'इकारो यकारोपादानं न वा,' 'वर्णो वर्णोपादानं न वे'त्याकारः, 'इकारो यकारो न वे'त्याकारोऽपि सः ।। ३९ ।।

तत्र विकारपक्षनिराकरणाय सूत्रम्—

प्रकृतिविवृद्धौ विकारविवृद्धेः ।। ४० ।।

प्रकृतिविवृद्धौ सत्यामवश्यं विकृतिविवृद्धिर्भवति, विकाराणां प्रकृत्यनुविधाननियमात्, महदल्पतूलपिण्डारब्धे महत्त्वाल्पत्वदर्शनात्, वर्णे च प्रकृते दीर्घादित्वेऽपि न यकारादेर्दीर्घादित्वमतो नात्र प्रकृतिविकारभाव इति भावः ।। ४० ।।

---

89. ०करणपक्षीय० A. 90. अपक्षीय० A. 91. गन्धान्तर० A.

92. After this, A has the additional reading : पक्षीयविशेषगुणः शब्दो न स्पर्शसमानाधिकरणापक्षीयविशेषगुणः स्वसमानजातीयसामानाधिकरण्यादित्यत्र, which does not seem to be a part of the text.

1. Pāṇini 6. 1. 77.

आक्षिपति—

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ ४१ ॥

उक्तो न हेतुः,[2] विकाराणां प्रकृतितो न्यूनत्वाद्युपलब्धे[3]र्दृश्यते च न्यग्रोधबीजादुत्[4]कृष्टतो नारिकेलबीजादुत्पद्यते न्यग्रोधादल्पो नारिकेलतरुः, विषमाभ्यां नारिकेलबीजाभ्यां समौ वृक्षौ, स्वल्पाद् बीजाद् वृहत्तरास्तरव इति ॥ ४१ ॥

अनेन किं न्यूनत्वादिसाधकमधिकप्रकृतिकत्वादिकमित्युक्तम्, किम्वा 'प्रकृतिविवृद्धा'वित्यत्र व्यभिचार उद्भावितः ? आद्ये समाधानसूत्रम्—

द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः ॥ ४२ ॥

उक्तो दृष्टान्तो न साधकोऽन्वयिनो व्यतिरेकिणश्च हेतोरभावात्, बहुषु व्यभिचारादिति भावः ॥ ४२ ॥

द्वितीये समाधत्ते—

नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४३ ॥

उक्तदोषो न, 'प्रकृतिविवृद्धा'वित्यनेन[5] सूत्रेण [6]अतुल्यप्रकृतीनां विजातीयप्रकृतीनां विकारेषु विकल्पस्य वैजात्यस्य स्वीकारादित्यर्थः। प्रकृतिवैजात्ये विकारवैजात्यमावश्यकमित्युक्तम्[7], न तु[8] प्रकृतिह्रासवृद्ध्योः[9] विकारह्रासवृद्धी इति[10], न हि जात्वपि[11] न्यग्रोधबीजान्नारिकेलतरुरुत्पद्यते ; किन्तु न्यग्रोधतरुरेव, तथा च दीर्घेकारविकारस्य ह्रस्वेकारविकाराद्भवितव्यम्, विशेषेण[12] च नास्ति विशेषः, तस्माश्च[13] प्रकृतिविकार इति भावः।

---

2. नतुः C. 3. ०त्वाभ्युपलब्धे० C. 4. ०बीजवतोदुत्० C. 5. ०रित्यनेन C, विद्धावित्यनेन F. 6. स्वतुल्य० A. 7. ०जात्यकमाण्येकं C, ०इत्युक्तम् om. F. 8. ननु C. 9. प्रकृतिह्रासवृद्धौ C, प्रकृतिक्रमवृद्धौ F. 10. विकारह्रासे बुद्धिरावश्यकीति C, विकारक्रमे वृद्धिरावश्यकीति F. 11. न्यग्रोधे C, 12. विशेषण F. 13. तस्यार्थं C.

केचित्तु—ननु माऽस्तु हेतुः साधकस्तथापि दृष्टान्त एव साधको भविष्यतीत्यत आह आक्षेपसूत्रान्तरं द्विविधेति; नातुल्येत्येव समाधानसूत्रमित्याहुः ॥ ४३ ॥

शङ्कते—

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः ॥ ४४ ॥

यथा द्रव्यविकारवैषम्यं न प्रकृतिभेदानुयायि, द्रव्यत्वेन प्रकृतेरभेदेऽपि विकृतिवैलक्षण्यात्, [14]प्रकृतिगतावान्तरवैजात्यस्य च विकारवैजात्यनियामकत्वे मानाभावात्, एवं वर्णविकारवैषम्यमपि न प्रकृतिभेदानुयायीति प्रकृतीनामवैजात्येऽपि विकारवैजात्यं नानुपपन्नमिति भावः ॥ ४४ ॥

दृष्टान्तं दार्ष्टान्तिकञ्च निराकुरुते—

न विकारधर्मानुपपत्तेः ॥ ४५ ॥

प्रकृतिवैजात्यस्यानियामकत्वे[15] विकारवैजात्यानामनुपपत्तेराकस्मिकत्वप्रसङ्गादित्यर्थः ॥ ४५ ॥

[16]अथास्त्येव तत्र यकारे[17] ह्रस्वदीर्घप्रकृतिकत्वमेव वैलक्षण्यम्, 'दधि अत्रे'त्याद्युच्चारणानन्तरं यत्र 'दध्यत्रे'त्युच्चार्यते तत्रेकारस्य यकारप्रकृतित्वमिव 'दध्यत्रे'त्याद्युच्चारणान्तरं यत्र 'दधि अत्रे'त्युच्चार्यते तत्र यकारस्यापि इकारप्रकृतित्वादित्यत आह—

विकारप्राप्तानामपुनरापत्तेः ॥ ४६ ॥

विकारप्राप्तानां पुनरापत्तेरसम्भवात्, न[17A] खलु क्षीरविकारो दधि पुनः क्षीरं दृष्टमित्यर्थः ॥ ४६ ॥

---

14. प्रकृतिगर्भा० C. 15. ०त्यस्य निया० C. 16. तथा० F.
17. वाऽकारयोः A. 17A. ले C, नो F.

आक्षिपति[18] —

सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४७ ॥

सुवर्णकुण्डलादिविकारभूतो रुचकादिः पुनः कुण्डलादिभावमापद्यतेऽतो व्यभिचारान्नोक्तो हेतुरित्यर्थः ॥ ४७ ॥

निराकरोति—

तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ ४८ ॥

भावः प्रकृतिः । तद्विकाराणां कुण्डलरुचकादीनां सुवर्णप्रकृत्यव्यतिरेकादित्यर्थः । अयम्भावः—प्रकृतिविकारभाव उपादानोपादेयभावः प्रकृते विचारणीयः । न च कुण्डलं रुचकस्य रुचकम्वा[19] कुण्डलस्योपादानम्, किन्तु सुवर्णजातीया एवावयवा उभयारम्भकाः, कुण्डलरुचकादौ प्रकृतिविकृतिव्यवहारश्च [20]पौर्वापर्यसहितैकोपादानत्वनिबन्धनः । न च ह्रस्वेकारविकारात्मकयकारो[? °रे°]ऽपि ह्रस्वेकारपूर्ववर्तित्वसहिततदुपादानोपादेयत्वमेव ह्रस्वेकारप्रकृतित्वं वैलक्षण्यं वाच्यम्, उभयोपादानस्यैकस्य वर्णस्यानुपलब्धेरिति ॥ ४८ ॥

स्यादेतत्, माऽस्तु वर्णः कश्चिदुभयोपादानं तथापि वर्णत्वमेवोभयोपादानं भविष्यति, न च वर्णत्वं साधारणम्, [21]वर्णत्वशब्देनेत्वविशिष्टवर्णत्वस्येत्वस्य[22] वोक्तत्वात्[23], न चैवं वर्णोपादानकत्वव्याघातः, उभयोपादानकत्वेऽप्यक्षतेरित्यभिप्रायवान् शङ्कते—

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः ॥ ४९ ॥

वर्णत्वस्योभयसमवायिकारणत्वाव्यतिरेकान्न वर्ण[24]विकारप्रतिषेध इत्यर्थः ॥ ४९ ॥

---

18. आक्षिपति om. F. 19. रुचकस्वा C, F. 20. °सहितको° F.
21-22. वर्णत्वशब्दो नत्वविशिष्टवस्तुत्व° C. 23. एवोक्त° C, F.
24. °रेकातुर्ण° C.

निराकरोति—

सामान्यवतो धर्मयोगो न सामान्यस्य ॥ ५० ॥

सामान्यवत एव सामान्यसमवायित्वं न तु सामान्यस्य सामान्यवत्-समवायित्वम्, वर्णत्वे वर्ण इत्याद्यप्रतीतेरिति भावः।

वस्तुतस्तु—वर्णत्वाव्यतिरेकादित्यादिद्वयं न सूत्रम्, [25]भास्करादावभावात्, किन्तु भाष्यमिति मन्तव्यम्।

यद्वा—नन्वस्त्येव ह्रस्वदीर्घविकृतिभूतयोर्यकारयोर्वैलक्षण्यम्, न चोपलम्भप्रसङ्गस्तेषामतीन्द्रियत्वात्, योग्यव्यक्तिगतजातेर्योग्यत्वनियमे मानाभावात्, व्याकरणसंस्कृतश्रोत्रवेद्यत्वाभ्युपगमाद्वा न च तत्र वैजात्ये मानाभावः, कार्यतावच्छेदकतया तत्सिद्धेरित्यत आह—विकारप्राप्तानामपुनरापत्तेरिति। पुनरापत्त्योर्मध्ये[26] विच्छेदो लक्षितः, तथा च विकारप्राप्तानां समवेतकार्याणां प्रकृत्या समवायिकारणेन अन्तत उत्पत्तिक्षणेऽप्यविच्छेदनियमाद् यकारोत्पत्तिकाले इकारसत्त्वे यकाराध्यक्षसमये इकाराध्यक्षप्रसङ्गात्, यकारोत्पत्तिसमये इकाराभावेन न तयोरुपादानोपादेयभाव इति भावः। अत्राशङ्कते—सुवर्णेति। कुण्डलविकारस्य रुचकस्य[27] समये कुण्डलाभावादुक्तो नियमो नास्तीति भावः। उत्तरम्—तद्विकारेति। तेषां रुचकादीनां सुवर्णरूपप्रकृत्याऽविच्छेदात्, कुण्डलादिकन्तु न तत्प्रकृतिरिति भावः। अथ प्रकृतितावच्छेदकावच्छिन्नस्यैव प्रकृतित्वेन वर्णत्वस्य यकारप्रकृतितावच्छेदकत्वात् तदवच्छिन्नस्य च स्वस्यैव[28] सहभावात् प्रकृतिविच्छेदोऽसिद्ध एवेत्याशङ्कते—वर्णत्वेति। वर्णत्वावच्छिन्नाव्यतिरेकादित्यर्थः। उत्तरम्—सामान्यवत इति। सामान्यवतः कस्यापि प्रकृतित्वयोगो न तु

---

25. भक्षेवादा० E. 26. ०पत्त्या साध्य० C. 27. रुचकस्य om. F. 28. त्वस्यैव C.

सामान्यस्य, सामान्यवतः सर्वस्य वर्णत्वावच्छिन्नस्य समवायिन एव प्रकृतित्वं, न तु स्वस्येत्यर्थः[29]।

अथवा वर्णत्वेत्यादिकमित्थं व्याख्येयम्। ननु वर्णस्य श्रूयमाणप्रकृतित्वमङ्गीकुर्महे, तत्र वर्णस्याप्रकृतित्वेऽपि वर्णत्वस्यैव प्रकृतित्वेन निर्वहति, न हि तदा वर्णत्वस्य विच्छेदोऽस्ति येन तदपि न प्रकृतिः स्यादित्याशङ्कते—वर्णत्वेति। वर्णविकाराणां [30]श्रूयमाणविकाराणाम्। उत्तरम्—सामान्येति। व्याख्यातमेतत् ॥ ५० ॥

युक्त्यन्तरमाह—

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात् ॥ ५१ ॥

यद्वा—नन्वस्त्येव [31]तदेकारादि, दोषाच्च न तद्ग्रह इत्यत आह—नित्यत्व इति। वर्णानामित्यादिः। अविकारादिति। नित्यभावस्याविकारित्वनियमादिति भावः। अथानित्या वर्णास्तर्हि इकारादीनां द्वितीयक्षण एव नाशेन यकारकालपर्यन्तमनवस्थानमिति भावः ॥ ५१ ॥

अत्र जातिवादी नित्यत्वमतमालम्ब्याक्षिपति—

नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ५२ ॥

यथा [32]नित्यानां केषाञ्चिदतीन्द्रियत्वं केषाञ्चिच्चातीन्द्रियत्वरूपधर्मस्य विकल्पो विगम ऐन्द्रियकत्वम्, तथा [33]नित्यानामवर्णानामविकारित्वेऽपि वर्णानां विकारित्वं भविष्यतीति भावः ॥ ५२ ॥

अनित्यत्वमतमालम्ब्य [34]स त्वाक्षिपति—

अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥ ५३ ॥

उपलब्धिकालेऽनवस्थायित्वेऽपि यथा वर्णानामुपलब्धिरेवं विकारसमयानवस्थायित्वेऽपि प्रकृतेर्विकारो भविष्यतीति भावः ॥ ५३ ॥

---

29. सर्वस्येत्यर्थः C, F. 30. भूय० A. 31. तदिका० A. तइका० F. 32. दित्यानां C. 33. ०नामसवर्णा० A. 34. स तु om. A, मत्वाक्षि० F.

उभयत्राप्युत्तरसूत्रम्—

विकारधर्मित्वे[35] नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५४ ॥

विकारधर्मित्वे नित्यत्वाभावादिति। न हि जन्यभावस्याविनाशित्वं सम्भवतीति भावः। कालान्तर इति। कालान्तरे विकारकाले स्थायिन एव [36]विकारोपपत्तेर्नाशुविनाशिन इत्यर्थः। बुद्धिं प्रति विषयस्य न कार्यसहभावेन हेतुत्वं, विकारं प्रति च[37] तथा हेतुत्वमिति भावः।

कश्चित्तु—कालान्तरे इकारे चिर[38]निवृत्तेऽपि विकारोपपत्ते[39]र्यकारोपपत्तेः[40], दृश्यते च[41] विग्रहे[42] 'दधि अत्रे'ति प्रयुज्य चिरं स्थित्वा संहितायां 'दध्यत्रे'ति प्रयुक्त इति, तथा च पूर्ववर्तित्वाभावान्न हेतुत्वमिति भाव इत्याह ॥ ५४ ॥

इतश्च न वर्णविकार इत्याह—

प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५५ ॥

विकाराणां हि प्रकृतिनियमोऽस्ति, यथा दुग्धादेव दधि, न जातु दध्नो दुग्धम्; इह तु न तथा, [43]'दध्यत्रे'त्यत्रेकारजातीयविकारस्य यकारस्यैव[44] 'विध्यती'त्यत्र सम्प्रसारणे यकारजातीयविकारस्यापीकारस्योपलम्भादतो[45] न प्रकृतिविकार इति भावः। प्रकृतिनियमस्तु तद्धर्मावच्छिन्नप्रकृतितावच्छेदकस्य[46] तद्धर्मावच्छिन्नविकार्यतानवच्छेदकनियम इत्यवधेयम् ॥ ५५ ॥

अत्र च्छलवादिन आक्षेपः—

अनियमे नियमान्नानियमः ॥ ५६ ॥

अनियम एव नियमस्य सत्त्वादनियमो नास्तीत्यर्थः ॥ ५६ ॥

35. ०धर्मत्वे A. 36. ०रोत्पत्ति० A. 37. च om. C. After च, A reads प्रकृतेर्न in excess. 38. इकारेति न A. 39, 40. ०पत्ति० A. 41-42. विग्रहे च C. 43. दध्यत्रे यत्रे० C. 44. ०विकारस्येव C. 45. ०विकारे स्योपलम्भा० C. 46. ०वच्छिन्नस्वप्रकृति० C.

निराकुरुते—

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥ ५७ ॥

अनियततायां प्रकृतावनियमस्य प्रतिषेधो न, [47]नियमानियमयोर्विरोधात्। भिन्नविषये न विरोध इत्याह—अनियम इति।

नव्यास्तु [48]प्रकृतिविवृद्धावित्यादि सूत्राण्येवं व्याचक्षते। प्रकृतेर्वैलक्षण्ये विकृतेरपि वैलक्षण्यादित्यर्थः, तत्प्रकृतिविलक्षणप्रकृतिकत्वस्य तदवृत्तिविकृतितावच्छेदकधर्मवत्त्वनियमात्, ह्रस्वदीर्घविकारत्वेनाभिमतयोर्ह्रस्वदीर्घप्रकृतिकत्वे तयोः [49]परस्परावृत्तिविकृतितावच्छेदकधर्मवत्त्वप्रसङ्गः, न चैवम्, तस्मान्न विलक्षणप्रकृतिकत्वमिति भावः। व्यभिचारादुक्तनियमो नास्तीत्यभिप्रायेणाशङ्कते—न्यूनेति। विकाराणामेकविकृतितावच्छेदकवतां विकाराणां घटादीनां प्रकृतिषु कपालादिषु न्यूनत्वाद्युपलब्धेर्नायं हेतुरिति भावः। अथ माऽस्तु हेतुः, तथापि दृष्टान्त एव साधको भविष्यतीत्यत्राह[50]—द्विविधेति। समाधत्ते—नातुल्येति। अहेतुरिति यदुक्तं तन्न, अतुल्यप्रकृतीनां विभिन्नधर्मावच्छिन्नजनकतावत् प्रकृतीनां विकारेषु विकल्पात् अभिहितविरुद्धधर्मवान् तत्प्रकृतितावच्छेदकभिन्नधर्मावच्छिन्नप्रकृतिताकत्वमेव हेतूकृतम्[51], तत्र च न व्यभिचारः, घटं प्रति न्यूनसमानाधिकरणानामेकरूपेणैव प्रकृतित्वादिति भावः। अप्रयोजकत्वान्नैवमपि नियम इत्यभिप्रायेणाशङ्कते—द्रव्येति। द्रव्यत्वेन प्रकृतिभूतस्य द्रव्यस्य विकाराणां संयोगविभागादीनां विभिन्नविकृतितावच्छेदकत्ववदयं[52] वर्णविकारविकल्प इत्यर्थः। यथा विकृतितावच्छेदकभेदेऽपि न प्रकृतितावच्छेदकभेदस्तथा प्रकृतितावच्छेदकभेदेऽपि न विकृतितावच्छेदकभेद इति भावः। निराकुरुते—न विकारेति।[53] परस्परवि-

47. नियमा० om. C. 48. प्रकृतिविरुद्धा० C. 49. परस्पर वृत्ते C. 50. ०तीत्यर्थंताह C. 51. हतुताकृत: C. 52. ०दक वत्त्ववदये C, ०दक हृतिभावयं F. 53. परस्परप्रकृति० C.

कृतिव्यावृत्तधर्मावच्छिन्नप्रकृतिताकयोः परस्परव्यावृत्तविकृतितावच्छेदक-रहितत्वे तयोर्विकार्यत्वानुपपत्तेर्विकार्यतावच्छेदकाभावादिति भावः। अथ यत्वमेव तत्र विकार्यतावच्छेदकमस्तीति न तदनुपपत्तिरित्यत आह—विकारप्राप्तेति। विकार्यतावच्छेदकावच्छिन्नानां पुनरापत्तेः प्रकृतितावच्छेदकावच्छिन्नमन्तरेण जायमानत्वस्वाभाव्यादित्यर्थः, [54]यद्वाऽवच्छिन्नश्च [55]प्रकृतित्वावच्छिन्नमन्तरेणापि जायमानमिति न तथेति भावः [?]। अत्र व्यभिचारं शङ्कते—सुवर्णेति। सुवर्णरजता-दिकपालत्वाद्यवच्छिन्नानां विकार्यतावच्छेदकघटत्वाद्यवच्छिन्नस्य पुनरापत्तेः, सुवर्णकपालत्वाद्यवच्छिन्नमन्तरेणापि इतरकपालादितो जायमानत्वान्नायं[56] हेतुरिति भावः। निराकुरुते—तद्विकाराणा-मिति। सुवर्णकपालत्वाद्यवच्छिन्नविकार्यतावच्छेदकघटत्वादीनां सुव-र्णत्वव्याप्यत्वादितरथा साङ्कर्यापत्तेरिति भावः। शङ्कते—वर्णत्वेति। [57] ह्रस्वदीर्घयोर्वर्णत्वाव्यतिरेकाद्विकाराप्रतिषेध इत्यर्थः। तथा च यकारं प्रति तयोर्वर्णत्वेनैव हेतुतेति प्रकृतितावच्छेदकभेदोऽसिद्ध इति भावः। निराकुरुते—सामान्यवत इति। कस्यचिदित्यादि। यत्-किञ्चित्सामान्यवन्मात्रवृत्तिकारणतायोगो[58]ऽवच्छेदकत्वलक्षणो न सामान्यस्येत्यर्थः। अतिप्रसङ्गान्नेदं हेतुरिति भावः। अथास्त्येवात्रापि परस्परव्यावृत्तविकृतितावच्छेदकत्वम्, इत्यादि [? इत्वादि] विशिष्य-त्वादेरेव तथात्वात्, 'इह यकारे प्रागिकार आसीदि'त्यादिप्रतीतेरित्वा-देरपि यकारादौ सत्त्वादित्यत्राह समाधानम्—नित्यत्व इति। अयम्भावः —यकारादिवृत्तित्वेनाभिमतं इत्वादि[59] नित्यमनित्यम्वा, नित्यत्वे विकारावृत्तित्वमेव तस्य, इतरथा [60]यत्वोपलम्भदशायामपि इत्वोप-

54. यत्रा॰ C. 55. ह्रस्वेत्वाव॰ F. 56. ॰त्वाम्नयं A, त्वान्वये C; त्वावच्छिन्नयो F. 57. ॰वर्गत्वाद्व्यति॰ C. 58. ॰णतात्यागो॰ F. 59. इत्यादि C. 60. सत्वो॰ C.

लम्भापत्तेः, अथानित्यमेव तत्, यकारोत्पत्तिसमये च नश्यतीति न तदुपलम्भ इति चेत्, एवं हि[61] यकारे इत्वस्यानवस्थानं प्राप्तं गुणस्य जन्यधर्मानाश्रयत्वादित्युभयथाऽपि [62]यकारे नेत्वमिति भावः। इत्वादेर्नित्यस्यापि विकारवृत्तित्वे न दोषः इत्यभिप्रायवानाक्षिपति—नित्यानामिति। नित्यानां कदाचिदतीन्द्रियत्वात् कदाचिदध्यक्षत्वाच्च विकारप्रतिषेधो नोक्तन्यायेनेत्यर्थः। कालविशेषस्य सहकारित्वान्नित्यस्यापीत्वादेस्तदा[63] नोपलम्भ इति भावः। अनित्यत्वे ऽपि न दोष इत्यभिप्रायवानाशङ्कते—अनवस्थायित्व इति। इत्वादेरनित्यत्वेऽपि तत्र विकारभूतस्य वर्णस्य सम्बन्धः, [64]वर्णेऽनित्य[त]योपलब्धेः सम्बन्धवदित्यर्थः। उपलब्धिरूपजन्यधर्माश्रयत्वेन गुणे तदा नाश्रयत्वमसिद्धमिति भावः। उभयत्राप्युत्तरसूत्रम्—विकारधर्मत्व इति। इत्वादेर्यकारादिधर्मत्वे यत्वादिना साङ्कर्येण नित्यात्वभावात् नित्यत्वमवलम्ब्य यः[65] प्रतिषेधः कृतः स नेत्यर्थः। [66]अनित्यत्वपक्षमवलम्ब्यापि यः प्रतिषेधः कृतः सोऽपि न, कालान्तरे [67]इत्वनाशकाल एव विकारोपपत्तेः, उत्पत्तिदशायां कार्यावृत्तेर्न कार्यतावच्छेदकत्वमिति भावः। नन्विकारादिजन्यतावच्छेदकतया यकारादौ यत्वादिव्याप्यजातिविशेषकल्पनान्नैते[68] दोषा इत्यत आह—प्रकृत्यनियमेति। विकारभूतानां समवेतकार्याणामपि वर्णानां वर्णप्रकृतिकत्वे नियामकाभावात् मानाभावात्, न हि 'इकारे यकार' इति कश्चित् प्रत्येतीति[69] भावः। शङ्कते—अनियम इति। इतरनियामकाभावेऽप्यनुशासनव्याख्यानस्यैव[70] नियामकत्वान्नानियम इति भावः। निराकुरुते—नियमेति। अनियमे नियमादित्यनेन यः प्रतिषेधः स न, [71]नियमानामुक्तनिया-

61. हि om. C, F. 62. यकारो नत्व॰ A, C. 63. ॰पीत्यादे॰ A. 64. वर्णे नित्य॰ C. 65. नित्यत्वमवन ब्यय: A, नित्यत्वमरणमब्यय C. 66. ॰पक्षमरण॰ C. 67. इह॰ C. 68. ॰नार्यैते C. 69. प्रतीति A. 70. ॰ब्यापकस्यैव C. 71. न not in A. च, C, F.

मकानामनुशासनव्याख्यानानामनियमेन मानाभावेन विरोधाद् यथार्थत्वविरोधादिति भावः ।। ५७ ।।

कथं तर्हि 'एतस्यायं विकार' इति व्यवहार इत्यत आह—

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु वर्णविकारोपपत्तेर्वर्णविकाराः ।।५८।।

गुणान्तरापत्तिरुदात्तादेरनुदात्तादिः; एकरूपनिवृत्तौ रूपान्तरजननमुपमर्दो 'ब्रू' प्रभृति स्थाने 'वचि' प्रभृतिः; ह्रासवृद्धी दीर्घह्रस्वयोर्ह्रस्वदीर्घौ; लेशोऽल्पीभावः, 'स्तः सन्ती'त्यादौ सकारः; श्लेषः आगमः, 'गच्छती'त्यादौ छकारादिः। एतेभ्य एव वर्णविशेषेभ्यो वर्णविकारव्यवहाराः 'उदात्तस्यायं विकार' इत्यादिव्यवहाराः, कुतः[72], विकारेष्वेतेषु तेषामुपपत्तेः, स्मारकोपयुक्तयथायथसम्बन्धात् [73]तत्तद्वर्णे तत्तद्वर्णस्मारकतानिबन्धनस्तत्र तत्र तत्तद्विकारप्रयोग इति भावः ।। ५८ ।।

।। समाप्तं परिणामप्रकरणम् ।।

पदज्ञानस्य शाब्दबोधोपयोगात् प्रसङ्गेन पदं निरूपयति—

ते विभक्त्यन्ताः पदम् ।। ५९ ।।

ते वर्णाः, बहुत्वमविवक्षितम्। विभक्तिः सुप्तिङ्रूपा, [1]पदं नाम, एतदेव पदमाकाङ्क्षापरनाम[2], विभक्तिर्वृत्तिरन्तः सम्बन्ध[3] इति वाऽर्थः। यद्वा पदं स्थानं निदानं शाब्दस्येत्यर्थः ।। ५९ ।।

प्रसङ्गाद् गवादिपदार्थं निरूपयति—

व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ।। ६० ।।

---

72. कृत A. 73. तद्वर्णे C.

1. पदं पादानाम C, पदं पदनाम F. 2. ०परिणाम C. 3. ०विभक्तिरन्तः सम्बन्ध C.

संशय इति। तदर्थे इत्यादिरिति भाष्यम्[4]। तदा गोशब्दादिपरामर्शोः व्यक्तिर्गवादिः[5], आकृतिरवयवसंयोगविशेषः संयोगविशेषवानवयवो वा, जातिर्गोत्वादिः; एतेषां सन्निधौ समुदिते। सन्निधिः सम्बन्धी, एवञ्च व्यक्त्यादिष्वित्यर्थ इति परे। उपचाराद्गवादिपदप्रयोगात् गवादि-पदार्थत्वसंशयः, प्रयोगो हि शक्येऽशक्येऽपीति साधारणो धर्मः ॥ ६० ॥

तत्र व्यक्तावेव शक्तिरिति कश्चिदाह। तन्मतमुपन्यस्यति—

याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचारात् व्यक्तिः ॥ ६१ ॥

व्यक्तिर्गवादिरूपा गवादिपदशक्या, व्यक्तौ गवादिशब्दस्योपचारात् प्रयोगात्, 'या गौर्गच्छति, या गौस्तिष्ठति', 'गवां समूहः', 'गां ददाति', 'चैत्रस्य गौः', 'गवां शतम्', 'गौर्वर्धते', 'गौः क्षीणा', 'शुक्ला गौः'; समासानुबन्धौ हितप्रजनने, 'गोहितं', 'गौर्गां जनयती'त्यादयः प्रयोगाः; न ह्येते जातौ सम्भवन्ति किन्तु व्यक्तावेवेति भावः ॥ ६१ ॥

तद्दूषयति—

तदनवस्थानात् ॥ ६२ ॥

तस्या व्यक्तेर्जात्याकृती विनाऽभानादित्यर्थः[6]। यद् वा—तत्पदं प्रक्रम्यमानजात्याकृतिपरम्, तथा च व्यक्तिमात्रशक्यत्वे [7]तयोरभान-प्रसङ्गादित्यर्थः। अशक्यस्य[8] भानेऽतिप्रसङ्गादिति भावः ॥ ६२ ॥

ननु यथा यष्टिकादिपदादशक्यस्यापि ब्राह्मणादेर्भानं[9] तथाऽत्रापि स्यादित्यत आह—

सहचरण[10]स्थानतादर्थ्य[11]वृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मण-मञ्चकटराजसक्तुचन्दनगङ्गाशकटान्न[12]पुरुषेष्वतद्भावेऽपि तदुपचारः ॥ ६३ ।

---

4. इति भाष्यम् om. A. 5. ०गवादिश्च A. 6. ०अभावादित्यर्थः F. 7. तयोरभाव० C. 8. अशक्तस्य C. 9. After °भानं, C adds न in excess. 10. सहचार C. 11. ०तादार्थ्य० A. 12. ०शकटार्थ० C.

अतद्भावेऽपि तत्तत्पदाशक्यत्वेऽपि तत्तत्पदादुपचारः शाब्दधीः सहचारादिशक्यसम्बन्धेभ्यः, शक्तेरिव तस्यापि लक्षणात्मकवृत्तेः[13] शाब्दधीप्रयोजकत्वात्। न चेह लक्षणया गोत्वान्वयधीः[14] सम्भवति, युगपद्वृत्तिद्वयविरोधात्, एकपदार्थयोः परस्परमनन्वयात्, पदार्थांशे निष्प्रकारकशाब्दबोधस्याव्युत्पन्नत्वाच्चेति भावः। 'यष्टिकां भोजयेदि'-त्यादितो यष्टिकादिसाहचर्याद् ब्राह्मणादेः, 'पुरुषा मटमटायन्त' इत्यत्र पुरुषपदात् पुरुषावस्थानान्मञ्चस्य[15], 'उपवेशं करोती'त्यत्रोपवेश-पदात्तादर्थ्यात् कटस्य, 'यमो राजे'त्यत्र यमपदात् यमवृत्तसजातीयवृत्तात् तद्वत्तया राज्ञः वृत्तं चरितम्, 'आढकं सक्तव'[16] इत्यत्र आढकपदान्मान-सम्बन्धादाढकमितत्वेन सक्तूनाम्, 'तुलाचन्दनमि'त्यत्र तुलापदाद् धारणसम्बन्धेन तुलाधृतत्वेन चन्दनस्य, 'तीरे जलमित्य'त्र तीरपदात् सामीप्यसम्बन्धेन गङ्गायाः, 'कृष्णः शकट' इत्यत्र समवायात् कृष्ण-रूपवत्तया शकटस्य, 'अन्नं प्राणा' इत्यत्र प्राणपदात् साधनतासम्बन्धेन प्राणसाधनतयाऽन्नस्य, 'राजैवास्य कुलमि'त्यत्र कुलपदादाधिपत्यसम्बन्धेन कुलाधिपतया पुरुषस्य प्रतीतिः।

प्राञ्चस्तु—सूत्रे मञ्चकटगङ्गापदानि मञ्चस्थवीरणादितीरपराणीति मत्वा 'मञ्चाः क्रोशन्ति', 'कटं करोति', 'गङ्गायां घोष' इति वाक्यान्य-भिहितवन्तः। शक्तिग्रहशाब्दबोधयोः समानप्रकारकत्वेन हेतुहेतुमद्-भावादशक्यस्यापि गोत्वादेः शाब्दबोधप्रकारता नानुपपन्नेत्यपि वदन्ति।

प्राञ्चस्तु—तदनवस्थानादित्यस्य तस्या व्यक्तेः साधारण्यादित्यर्थः, ᴹव्यक्तेः शक्यत्वे व्यक्तित्वस्याविशेषाद्गोपदादश्वबोधापत्तेः, व्यक्ति-विशेषास्त्वननुगता इति भावः। अथ व्यक्तेरशक्यत्वे व्यक्तिबोधः

13. लक्षणात्मकवृत्तेः om. A. 14. ०गोत्वान्वय० C. 15. ०पञ्चस्य C. 16. शक्तवत् A. M—M. om. F.

कुत इति चेल्लक्षणयेत्यवेहि[17], दृश्यते हि लक्षणयाप्यन्वयधी[M]रित्यभिप्रायेणाह सहचरेति। वस्तुतस्तु—अथ व्यक्तिमात्रमेव शक्यम्, इतरथा जातिविशेषाविशिष्टव्यक्तिशक्यत्वे यष्टिकादिपदाद्ब्राह्मणादेरन्वयबोधो न स्यादित्यत आह—सहचरेति; शक्यसम्बन्धादेव चान्वयबोधो न तु शक्तेरिति भाव इत्याहुः ॥ ६३ ॥

आकृतिमात्रं शक्यमित्यपर आह। तन्मतमुपन्यस्यति—

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥ ६४ ॥

आकृतिः शक्या, सत्त्वस्य प्राणिनो गवादेस्तत्र व्यवस्थानस्य व्यावर्त्तकस्य गोत्वादेः[18] सिद्धेस्तदपेक्षत्वादाकृतिज्ञानाधीनत्वात्, प्रथमोपस्थितत्वादिति भावः। इदन्तु "तदनवस्थानादि"त्यनेनैव निराकृतप्रायमिति[19] न निराकरणाय पृथगसूत्रयदिति मन्तव्यम् ॥ ६४ ॥

अन्यो वदति—

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ॥ ६५ ॥

जातिः शक्या, न व्यक्तिर्नाप्याकृतिः[20], कुतः, तद्युक्तेऽपि [21]मृद्गवके 'गां प्रोक्षय' इत्यादि वाक्यतः प्रोक्षणादीनामप्रसङ्गादप्रतीतेः ॥ ६५ ॥

निराकरोति—

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६६ ॥

जातेरभिव्यक्तेः गवादिपदाधीनजात्यन्वयबोधस्याकृतिव्यक्तिविषयत्वादशक्ये चान्वयबोधेऽतिप्रसङ्गात् तयोरपि शक्यत्वेन न जातिमात्रं शक्यमिति भावः। गोत्वशक्तपदज्ञानत्वगोत्वविशिष्टशब्दत्वाभ्यां हेतु

---

17. येत्यवाह A, ०येत्येव हि C, F. 18. गन्धादेः A. 19. ०कृतश्रूयमिति A, ०कृतमिति C, F. 20. ०र्नाकृति C, F. 21. मृद्गव० om. C.

हेतुमद्भावादशक्यस्यापि गवादेरन्वयबोधो नानुपपन्न इति। जाति-मात्रमेव शक्यं लाघवादित्यपि वदन्ति ॥ ६६ ॥

किं तर्हि तत्त्वम् ?

व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६७ ॥

त्वन्तः सम्बन्धः[22]। व्यक्त्यादावेकैव शक्तिरिति प्रतिपादयितुं पदार्थ इत्येकवचनम्। एकत्रैव[23] शक्तावपराभानप्रसङ्गात्[24], तच्छाब्दं प्रति तद्वृत्तपदज्ञानस्य हेतुत्वात्; विभिन्नशक्तौ विशकलितबोधापत्तेः, 'गौर्नित्ये'त्यादौ लक्षणानापत्तेश्चेति भावः। इदन्तु गवादिपदाभिप्रायेण, तत्रैव विप्रतिपत्तेः; आत्मादिपदस्य तु जातिव्यक्ती[24], पश्वादिपदस्य तु व्यक्त्युपाधी अर्थ इति मन्तव्यम् ॥ ६७ ॥

व्यक्त्यादिषु लक्षणीयेषु व्यक्तिं लक्षयति—

व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः ॥ ६८ ॥

गुणविशेषोऽणुसमवायिकारणान्यत्वविशिष्टो विशेषगुणः, मूर्त्तिः मूर्त्तम्, तेन पार्थिवादिपरमाणुगगनादिमनोवारणं भवति; न च तेषामपि व्यक्तित्वेन लक्ष्यत्वादव्याप्तिरव्याप्तिश्च गुणादाविति वाच्यम्, न हि व्यक्तिमात्रमिह लक्ष्यमपि तु साकृतिव्यक्तिरिति न क्वाप्यव्याप्ति-रिति[25] भाष्यानुयायिनः। वार्त्तिकानुयायिनश्च—गुणविशेषो धर्म-विशेषो जात्यन्यत्वम्, तदाश्रयः, मूर्तिः मूर्त्तमात्रवृत्तिधर्मवानिति यावदिति न कस्यापि व्यक्तेरसंग्रह इत्याहुः ॥ ६८ ॥

आकृतिं लक्षयति—

आकृतिर्जातिलिङ्गाख्या ॥ ६९ ॥

जातिर्गोत्वादिः, तदनुमापिकेत्यर्थः; अनुमीयते च परम्परासम्बन्धेन

---

22. दुःखसम्बन्धः C. 23. एकतैव C. 24. ०व्यक्तां A.
25. न क्वाप्यव्याप्तिरिति om. A. लक्षणव्याप्तिरिति F.

संस्थानविशेषाद्गोत्वादिकम्। द्रव्यासमवायिकारणसंयोग आकृति-रिति पर्यवसितार्थः। यद्वा—जातिर्द्रव्यासमवायिकारणतावच्छेदिका, जातिर्लिङ्गं धर्मो यस्याः सेत्यर्थः, तस्याश्च व्यक्तौ परम्परासम्बन्धः संसर्गविधया शक्तिविषय इति मन्तव्यम्॥ ६९॥

जातिं लक्षयति—

समानप्रसवात्मिका जातिः॥ ७०॥

अत्र समानपदं समानबुद्धिपरम्, समानबुद्धिरनुगतबुद्धिः, सामान्यवत्ता-बुद्धिरिति यावत्, सा प्रसवः कार्यो यस्यास्तदात्मिकेत्यर्थः। सामान्य-वत्ताबुद्धिप्रकारत्वं सामान्यत्वं वा लक्षणमिति भावः। सामान्यत्वञ्च नित्यानेकसमवेतत्वमिति दिक्।

नव्यास्तु—ननु व्यक्त्यादिकं पुष्पवन्तादिपदवदेकशक्तेर्विषयोऽन्यथा वा, तत्रान्यथेत्याह—व्यक्तिर्गुणेति। गुणविशेषो शक्तिः[26], तद्-विषयतया[27] मूर्त्तिः प्रधानम्; तथा च व्यक्तिः शक्तेः प्रधानाश्रय[28] इत्यर्थः, विशेष्यताश्रय इति तु पर्यवसितार्थ[29]। आकृतिरिति।[29] [30]जातिलिङ्गभूता जातिसमाना सती शक्तेराश्रयः, [31]जातिर्यथा शक्तेराश्रय[32]स्तथाऽकृतिरपीत्यर्थः, व्यक्त्यंशे शक्तौ विशेषणमिति भावः। समानेति। समानप्रसवोऽनुगतबुद्धिजनकः, विशेषणमिति यावत्, तथा च विशेषणतया शक्तेर्विषय इत्याहुः।

---

26. ०विशेष्यशक्तेः C. 27. तद्विषयतया om. C, F. तयो विषयतया A. 28. ०प्रधानानाश्रय A, प्रधानमाश्रय C, F. 29. After this, C has the extra reading आकृतिरिति लिङ्गभूतजातिसमाना सती शक्तेराश्रय जाति यथा शक्तेर्मूर्त्तिः प्रधानं तथा च व्याक्तिकं शक्तेः प्रधानमाश्रय इत्यर्थः विशेष्यतया इति तु पर्यवसितार्थः. A case of partial dittography. 31-32. om. F.

इदं पुनरिहावधेयम्—जात्याकृतिविशिष्टव्यक्तेः[33] शक्यत्वे केवलगोत्वविशिष्टव्यक्तिबोधः, कुतः; लक्षणयेति चेत्तर्हि लाघवाद्गोत्वविशिष्ट एव शक्तिः[34], गोत्वाकृविशिष्टबोधश्च लक्षणयेत्येवास्तु। न च विनिगमकाभावादाकृतिविशिष्टेऽपि शक्तिरस्त्विति वाच्यम्, केवलाकृतिविशिष्टव्यक्तेः स्वरसतोऽप्रतीतेः, आकृतिवैशिष्ट्यस्य[35] परम्परासम्बन्धेन गुरुत्वाच्च। तस्मादाकृतिपदं सम्बन्धपरम्, तुशब्दस्तु पुनरर्थः, जातिपदं पुनरसाधारणधर्मपरम्, तेन भूतपदशक्यतावच्छेदकस्य भूतत्वादेरपि संग्रहः। आकृतिर्जातिलिङ्गाख्येत्यस्य तु जातिसम्बन्धाख्येत्यर्थः।

यद्वा—जातिसम्बन्धात्मिका सती शक्तेर्विषय इति युक्तः पन्थाः। आकृतिपदं संस्थानात्मकमेव, तथा च जातिः संस्थानं व्यक्तिः शक्यमिति सूत्रार्थः। भिन्नपदार्थयोरिव व्यक्तौ जात्याकृत्योः संसर्गोऽपि व्युत्पत्तिबललभ्य एव, पदार्थांशे निष्प्रकारकत्वञ्च सर्वत्रैवास्माभिरिष्यत इति पुनराकरानुयायी मादृशः पन्थाः ॥ ७० ॥

॥ समाप्तं शब्दशक्तिपरीक्षाप्रकरणम् ॥ ४ ॥

॥ विभागपरीक्षाद्वारकसाङ्गप्रमाणपरीक्षणं नाम द्वितीयाह्निकञ्च ॥

॥ इति सार्वभौमभट्टाचार्यविरचिते न्यायरहस्ये द्वितीयोऽध्यायः ॥

---

33. ०व्यक्तेश्च A. 34 शक्तिरस्तु C, F. 35. ०विशिष्टस्य A.

॥ तृतीयाध्यायस्य प्रथमाह्निकम् ॥

अथावसरतः प्रमेयेषु परीक्षणीयेषु प्रथमोद्देशादात्मादिप्रमेयषट्कं परीक्षणीयम्, तदेवाध्यायार्थः। तत्र नवभिः प्रकरणैरात्मादिचतुष्टयपरीक्षणं[1] प्रथमाह्निकार्थः। तत्र प्रथमत आत्मा परीक्ष्यते। तत्र विप्रतिपत्तिः—आत्मा इन्द्रियातिरिक्तो न वा देहान्यो न वेत्यादि वा। आत्मत्वं 'श्चाहं जानामी'त्यनुभवसिद्धो ज्ञानादिसमानाधिकरणो जातिविशेषः। ज्ञानादीनामेकैकसमवायित्वमात्मत्वमित्यपि केचित्। ज्ञानहेतुत्वञ्च साधारणो धर्म इति वदन्ति।

अथेन्द्रियमेवात्मा, घ्राणादीनां पृथिव्यादित्वे मानाभावान्न जातिसाङ्कर्यम्, चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुष्ट्वादिनैव समवायिकारणत्वात्, अन्यथा समवायिकारणान्तरकल्पने गौरवात्, ज्ञानत्वेन जन्यज्ञानत्वेन वाऽवच्छिन्नं प्रति समवायिकारणत्वविरहेऽपि[2] न क्षतिः, अस्तु वा तदवच्छिन्नं प्रति चक्षुरादीनामेवात्मत्वेन समवायिकारणताविशेषावच्छिन्नं प्रति कारणतया क्लृप्तत्वात्, [3]द्रव्यान्तरकल्पने गौरवाच्च एतेन मनोदेहात्मवादोऽपि व्याख्यातः। अत्रेन्द्रियात्मवादनिराकरणाय समाधिसूत्रम्—

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥

दर्शनादिपदं भावल्युटा [?भावल्युटा] दार्शनादिपरम्[4], दार्शनस्पार्शनोभयप्रकारेणैकार्थस्य अनुभवात्, [M]योऽहं घटमस्प्राक्षं[5] स एव हि[6] घटं पश्यामीत्याद्याकारः सः। तथा च चाक्षुषत्वाचयोरेकत्र समवायेन चक्षुष्ट्वादिना चाक्षुषादिसमवायिकारणतयाति[7]रिक्तात्मसिद्धिः[M]। प्रयोगश्च—चाक्षुषसमवायि न चक्षुः, स्पार्शनसमवायित्यात्, यन्नैवं तन्नैवं यथा चक्षुः; चक्षुर्नात्मा स्पार्शनरहितत्वादित्यादिः ॥ १ ॥

1. ०परीक्षाप्रकरणम् C. 2. ०कारणत्वेविरहो C. 3. एकान्तर० C, F. 4. ०दार्शनादि लक्षयति C. M—M omitted in F. 5. घटसंप्राक्षं C. 6. एवाह C. 7. ०समवायिभेदेति० C.

आक्षिपति—

न विषयव्यवस्थानात् ॥ २ ॥

विषयः कार्यं चक्षुरादीनां तद्व्यवस्थानात्तन्नियमात्। सति चक्षुषि चाक्षुषं नान्यथेत्याद्याकारो[8] नियमः, स च समवायिकारणत्वे पर्यवस्यतीत्यभिमानः। तथा च चक्षुरात्मा चाक्षुषसमवायित्वादित्यादिना [9]प्रतिरोधान्नातिरिक्तात्मसिद्धिरिति भावः ॥ २ ॥

उक्तनियमात् कारणत्वं सिद्ध्यतु, न तु तद्विशेष इत्यभिप्रायेण समाधत्ते[10]—

तद्व्यवस्थानादेवात्मसद्भावान्नात्मप्रतिषेधः[11] ॥ ३ ॥

तेषां चक्षुरादीनां चाक्षुषादिहेतुत्वव्यवस्थानादात्मनि[12] चक्षुरादिभिन्नत्वस्य यः प्रतिषेधोऽभिहितः स न[13], उक्तानुकूलतर्काच्चक्षुरादिभिन्नस्यात्मनः[14] चाक्षुषादिसमवायिनश्च सद्भावात् सिद्धेः।

कश्चित्तु—दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्यर्थाभिमानेनाशङ्कते—नेति। एतावता एकविषयस्य व्यवस्थानात् न त्वेकसमवायिन इत्यर्थः। समाधत्ते—तद्व्यवस्थेति। तस्य एकसमवायिन उक्तरीत्या उक्तसूत्रेण व्यवस्थानादित्यर्थ इत्याह।

परे तु—एकस्मिन् दर्शनजन्यार्थग्रहणात् स्पर्शजन्यार्थग्रहणात्, उपलक्षणमेतत्, घ्राणादिजन्यार्थग्रहणादित्यादिकमपि बोध्यम्। आत्मा न चक्षुरादि, चाक्षुषादिसमवायित्वात्, चक्षुरादिवदिति[15] तु प्रयोगः। अत्र हेत्वप्रसिद्धिमाह—नेति। विषयस्य कार्यस्य चाक्षुषादेर्नियमात्,

---

8. थेत्याकारो C, F. 9. प्रतिरोधा आति० C, प्रतिरोधार्थाति० F. 10. ०प्रायेणाहसमाधिः C, F. 11. ०स्थानात्वात्मनि C, ०स्थानाद्वात्मनि F. 13. न om C. 14. ०स्यात्मनि C. 15. ०वदिति om. C.

उक्तयुक्त्या चक्षुष्येव[16] चाक्षुषमिति नियमात्। निराकरोति—तद्व्यवस्थेति। तेषाञ्चाक्षुषादीनां व्यवस्थानात् सामानाधिकरण्यानुभवादेवात्मन[17] एकसमवायिनः सद्भावात् सिद्धेर्न आत्मनः तदेकसमवायिनः प्रतिषेध इत्यर्थमाहुः।

ननु [18]चक्षुष्ट्वादिना चाक्षुषादिनिमित्तकारणतैवास्तु[19], समवायिकारणता च चक्षुरादीनां[20] जन्यज्ञानत्वावच्छिन्नं प्रति आत्मत्वेन, एवञ्च[21] एकत्र[22] दर्शनस्पर्शनोभयसत्त्वेऽपि न क्षतिः। तदिदमुक्तम्—न विषयव्यवस्थानादिति। चक्षुरादीनां विषयस्य कार्यस्य चाक्षुषादेर्व्यवस्थानात् अवस्थाननियमविगमात्। मैवम्, विनिगमकाभावाच्चाक्षुषादेः सकलस्य सकलेन्द्रियवृत्तित्वे गौरवादेक आत्मा सिध्यति। तदिदमुक्तम्—तद्व्यवस्थेति। तेषु सकलेन्द्रियेषु व्यवस्थानापत्तेः, एवं [23]चाक्षुषादिसकलापत्तेरिति तदर्थात्[24]। किञ्च 'चक्षुरहमि'त्यादिप्रतीतिप्रसङ्गः, न भवतु च 'मम चक्षु'रित्यादि धीः। चक्षुष्ट्वाद्यंशे आत्मत्वाद्यवच्छिन्नभेदस्य चक्षुरादिषु सत्त्वाच्चक्षुष्ट्वादेरतीन्द्रियत्वाच्च नैवमिति [25]चेदंशांशिभावविलक्षणप्रतीतिस्तथापि दुर्वारेति दिक्॥ ३॥

॥ समाप्तमिन्द्रियभेदप्रकरणम्॥

अथ शरीर एवोक्तप्रत्यभिज्ञानोपपत्तेरस्तु तर्हि[1] शरीरमेवात्मा, एवञ्च 'गौरोऽहं जानामी'त्यादिधीरप्युपपद्यत इति। अत्र समाधानसूत्रं—

शरीरदाहे पातकाभावात्॥ ४॥

शरीरस्यात्मत्वे शरीरस्य दाहे भस्मीभावे पातकादेरभावप्रसङ्गात्, न हि

---

16. चक्षुष्टयेव A. 17. ०देरात्मन C, F. 18-19. चक्षुष्ट्वादिनिमित्तकारण० C. 20. चक्षुरादीनां om. C. 21. दर्शने स्पर्शने वा add. C, F. 23-24. om. C, F. 25. चेदं शालिभाव० A.

1. तादृश० A.

गुणिनाशे गुणस्तिष्ठति चिरम्। यद्वा—निषिद्धक्रियायाऽव्यवधाने[2] [3]देहावयवनाशात् शरीरनाशे पातकानुपपत्तिप्रसङ्गात्[4], शरीरान्तरस्याहिंसकत्वादित्यर्थः। अथवा—पातकपदं तज्जन्यनरकादिपरम्, तदनुत्पत्तिप्रसङ्गादित्यर्थः, पापस्य सामानाधिकरण्यप्रत्यासत्त्या नरकहेतुत्वात्, अन्यथाऽतिप्रसङ्गादिति भावः। प्रयोगश्च—आत्मा नैतच्छरीरम्, सामानाधिकरण्यप्रत्यासत्त्यै[5] तच्छरीरनाशोत्तरोत्पत्तिककारणीभूतगुणवत्वादित्यादिः ॥ ४ ॥

आक्षिपति—

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥ ५ ॥

सात्मकशरीरप्रदाहेऽपि तस्य पातकस्याभावः, तस्य विशिष्टनाशे विशेषणनाशस्य नित्यत्वात् नियतत्वात् ॥ ५ ॥

विशिष्टनाशो[6] न स्वीक्रियते किन्तु केवलशरीरस्येत्याह—

न कार्याश्रयकर्तृबधात् ॥ ६ ॥

कार्यस्य भावत्वाश्रयस्य कृत्यवच्छेदकस्य शरीरस्यैव नाशात्। कार्याश्रयेति हेतुगर्भविशेषणम्, [A]आत्मनस्तु भावकार्यत्वाभावान्न विनाश इति भावः[A] ॥ ६ ॥

॥ समाप्तं शरीरभेदप्रकरणम् ॥

प्रसङ्गाच्चक्षुरद्वैतं व्यवस्थापनीयम्, विप्रतिपत्तिश्च—एतद्गोलकावच्छिन्नं [1]चक्षुस्तद्गोलकावच्छिन्नं न वेत्यादिः। तत्राक्षेपसूत्रम्—

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥

---

2. ०क्रियाया व्यवधाने C, ०क्रियाया द्रव्यवधाने F. 3. देह० om. C, F. 4. ०नुपपत्तिः C, F. 5. तच्छरेरे नाशो० C. 6. विशिष्टस्य नाशो A. A—A in A only.

1. चस्तद C.

सव्येन दृष्टं तदितरेण चक्षुषा पश्यामीति बुद्धेर्द्वैतमिति भावः। वक्ष्यमाणरीत्यात्मनि चक्षुर्भेदसाधनाय एकदेशिसमाधानं वा[2] निराकर्त्तुमनेन सूत्रेणोपन्यस्तम् ॥ ७ ॥

निराकरोति—

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥

एकस्मिन्नेव चक्षुषि [3]मध्यसेतुकैकतड़ाग इव व्यवधानदोषेण द्वित्वभ्रमादिति भावः। [4]सव्यगोलकावच्छिन्नचक्षुषो भेदस्य दक्षिणगोलकावच्छेदेन स्वस्मिन् सत्त्वेन[5] प्रतीतेरुपपत्तेर्न द्वैतमिति[6] तु वस्तुगतिः ॥ ८ ॥

पुनराक्षिपति—

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥

अत्रैकदेशिनः समाधानम्—

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥

शाखादिनाशेऽपि वृक्षादेरवयवनाशो नावयविनाशे [7]हेतुर्द्वैतसाधकहेतुर्वा, सव्याद्यवच्छिन्नावयवनाशेऽपि चक्षुषोऽवस्थानसम्भवादिति भावः ॥ १० ॥

एकदेशिमतस्य द्वैतस्य च निरासाय सूत्रम्—

दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥

दृष्टान्तस्य शाखानाशे[8] [9]तदवयविवृक्षसत्त्वस्य विरोधात् [10]अवयवावयविनाशयोः कार्यकारणभावग्राहकमानेन विरोधात्, उपलब्धिश्च तदोत्पन्नवृक्षान्तरस्येति द्वैतप्रतिषेधो नेत्यर्थः। दृष्टस्य गोलकस्य योऽन्तोऽवयवस्तस्यैव विरोधान्नाशात्, न तु चक्षुषोऽवयवस्य।

---

2. वा om. F. 3. साध्यासंतुकेक० C. 4. काव्य० C.
5. सा add. A. 6. ०र्नाद्वैतमिति A. 7. हेतुत्वेत० A. 8. शाघने: F.
9. तदवयवं C. 10. अवयवाद्यमवि० F.

यद्वा—अन्ते विनाशे दृष्टत्वस्य[11] विरोधप्रसङ्गात्, सव्यचक्षुर्नष्ट-मित्यादिप्रात्यक्षिकी प्रतीतिर्गोलकनाशमेवावगाहते[12] यतोऽतश्चक्षुर-द्वैतप्रतिषेधो न। द्वितीयोऽर्थ एव सूत्रस्य, एकदेशिमतन्त्वसम्भव-दुक्तिकत्वान्न निरसितमित्यपि[13] वदन्ति। तदेवं टीकाकृतां मते लाघवसहकृतप्रमाणसिद्धे चक्षुरद्वैत एव सूत्रकारतात्पर्यमुपवर्णितम्। कुञ्चिताकुञ्चितनयनस्येव निमीलितानिमीलितैकद्विनयनस्यापि[14] प्रत्य-क्षतारतम्यं तत्तत्कृतमेव।

परे तु द्वैत एव तात्पर्यमुपवर्णयन्ति मुनेः। तथा हि—आत्मनि चक्षुषो भेदसाधनाय युक्त्यन्तरमाह—सव्येति। सव्येन चक्षुषा विषय-मनसोः सन्निकर्षे समुत्पद्यमानं दण्डादिमत्तया पुरुषादेर्ज्ञानं सव्य एव समुत्पद्यते, तत्रैवासमवायिकारणसम्पत्तेः; तथा च दक्षिणेन चक्षुषा पुरुषग्रहणान्न[15] दण्डादेः स्मरणं स्यात्; संस्कारसम्बन्धदर्शनयोः सामानाधिकरण्यप्रत्यासत्त्या स्मृतिहेतुत्वात्, एवञ्च दक्षिणेन 'सोऽयं दण्डी'त्यादि Mप्रत्यभिज्ञानं न स्यादिति प्रत्यभिज्ञानपूर्वानुभवयोरेक आश्रय आत्मा सिद्ध्यतीति भावः। ननु सव्यासव्यचक्षुषोरैक्यमेव[16], द्वित्वधीस्तु नासास्थिव्यवधानदोषादिति नM प्रत्यभिज्ञानानुपपत्तिरित्या-क्षिपति—नैकेति। अत्र सिद्धान्तमाह—एकेति। आक्षिपति—अवयवेति। निराकरोति—दृष्टान्तेतीति वदन्ति ॥ ११ ॥

[17]अथानुमानेनेन्द्रियभेदं साधयति—

इन्द्रियान्तरविकारात् ॥ १२ ॥

11. दृष्टस्य C. 12. ०र्गोलनाशोमेवा० C. 13. निरासनमि० C, निराशतमि० F. 14. निमीलितनयनस्यापि F. 15. ०ग्रहणाय C, ०ग्रहणाव F. M–M. om. F. A case of haplography. 16. ०रैकामेव C. 17. अर्थानु० F.

[18]अम्लादिरससमानाधिकरणतया गृहीतस्य चिरविल्वादीनां रूपस्य गन्धस्य वा चक्षुषा घ्राणेन वा [19]रसानुस्मरणाद्रसगर्द्धितो[20] दन्तोदकसम्प्लवरूप इन्द्रियान्तरस्य रसनस्य विकारो भवति, न चैतादृशं रसस्मरणं रसरूपाद्यनुभवयोरेकाश्रयेन विना भवतीति भावः। चक्षुषि रसनेऽन्यत्र[21] वेन्द्रिये[22] रससंस्कारतादृशसम्बन्धिधीविरहेण तादृशास्मृत्यनाश्रयत्वे साधिते मनसा तादृशस्मृतौ चक्षुराद्यनाश्रितत्त्वज्ञानादनन्तरं तादृश[23]स्मृतौ चक्षुराद्यनाश्रितत्वे [24]सत्याश्रितत्वेन [25]चक्षुराद्यतिरिक्ताश्रितत्वानुमानादतिरिक्तात्मसिद्धिरिति[26] वदन्ति। आत्मनि तत्स्मृतिसत्त्वेन व्यतिरेकिणा चक्षुराद्यन्यत्वं साधनीयमिति तु परमार्थः ॥ १२ ॥

आक्षिपति—

न स्मृतेः स्मर्त्तव्यविषयत्वात् ॥ १३ ॥

विषयत्वं समवेतत्वम्, तथा चात्मनि तत्स्मृतिमत्त्वं स्वरूपासिद्धमिति[28] भावः। एतावता स्मृतेश्च संस्कारस्य च स्मर्त्तव्यसमवेतत्वप्रसङ्गादित्यर्थान्तरशङ्केयमित्यपि केचित्। स्मर्त्तव्यं संस्करणीयम्, तथा च समानविषयतयैव हेतुहेतुमद्भावो न सामानाधिकरण्येनापीत्यर्थ इत्यप्याहुः ॥ १३ ॥

सिद्धान्तसूत्रम्—

तदात्मत्वगुणत्वसद्भावादप्रतिषेधः ॥ १४ ॥

तस्याः स्मृतेः 'अहं स्मरामी'ति प्रतीत्येत्यादिः[29], प्रतिषेधः स्वरूपासिद्धत्वमर्थान्तरं वा न।[30] तत्र स्मृतेः तदात्मन एव गुणत्वसद्भावात्, सामानाधिकरण्येन कार्यकारणभावस्य प्रतिषेधो नेत्यर्थ इत्यप्याहुः।

---

18. अदनादि॰ C. 19. रसार्थं॰ C. 20. ॰गर्द्धित C. 21. रसन्देऽन्यत्व A. 22. चेन्द्रिये C, F. 23. तादृश्य॰ C. 24. नत्या॰ C. 25-26. चक्षुराद्यतिरिक्ताश्रितत्व॰ C, F. 27. तु om. C, F. 28. ॰सिद्धमिति C. 29. प्रतीतेरित्यादि A. 30. न om. C, F.

नानाविषयकप्रत्ययेन सह तत्स्मृतेः सामानाधिकरण्यप्रतीत्या तस्याः [31]विषयासमवेतत्वमित्यपि वदन्ति ॥ १४ ॥

॥ इति चक्षुरद्वैतप्रकरणम् ॥

मन एवात्मेत्याक्षिपति—

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १५ ॥

य एते आत्मप्रतिपादका हेतव[1] उपदिष्टाः सर्वं एते मनसि सम्भवन्ति, एवञ्च न[2] मनोऽव्यतिरिक्त आत्मा, द्रव्यान्तरकल्पने गौरवादिति भावः ॥ १५ ॥

सिद्धान्तमाह—

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ १६ ॥

सुखादिज्ञानाय साधनस्य ज्ञातृभिन्नकरणस्य उपपत्तेरावश्यकत्वात्, मनसः केवलमात्मसंज्ञा कृतेति[3] संज्ञाभेदमात्रम्, नार्थभेदो नात्माऽस्वीकारः[4] ॥ १६ ॥

[5]अथ जन्यज्ञानत्वेन न सकरणतानियमः[6] किन्तु बहिर्विषयकत्वविशेषितेन तेनेत्यत्राह—

नियमश्च निरनुमानः ॥ १७ ॥

उक्तनियमोऽनुमानानुपयोगी, गौरवपराहत इति यावत्। 'महानहमि'तिं प्रतीतेर्न मन आत्मेत्यपि वदन्ति। तत्त्वमन्यत्राभिहितम्[7] ॥ १७ ॥

॥ समाप्तं मनोभेदप्रकरणम् ॥

आत्मनोऽनादित्वेन शरीरभेदसाधनायानादित्वं साधयति—

---

31. विषयसम० A.

1. हि तव A. 2. न om. A. 3. °संज्ञेति A. 4. नात्मस्वीकारः C, F. 5. अजन्यज्ञान० C, अत्र जन्यज्ञान० F. 6. °नियमः om. C, F. 7. अन्यत्र=बुद्ध्यात्मगुणप्रकरणे.

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षशोकभयसंप्रतिपत्तेः ।। १८ ।।

जातमात्रस्य [1]एतज्जन्माननुभूतहर्षादिहेतुकस्य पूर्वजन्मपुनःपुनर्ज्ञातेष्टादिविषयकपुनःपुनः स्मृतेर्हर्षादीनां संप्रतिपत्तेः सम्बन्धात् ।

यद्वा—तादृशस्य तेषां निश्चयात् पूर्वाभ्यस्ततद्विषयकस्मृतेरनुमानात् निश्चयादिति, जन्यत्वं पञ्चम्यर्थः, न स्मृतिः समानाधिकरणानुभवं विनेति तत्स्मृतितदनुभवयोरेक आश्रयः सिध्यति, एवं तत्पूर्वमपीत्यनादिरात्मेति[2] भावः ।। १८ ।।

अथ बालस्य हर्षादौ मानाभावः, स्मितरोदनादि[3] मानमिति चेन्न, तेषां हर्षाद्यहेतुकत्वात्[4], पद्मादिविकाशवत्[5] [6]सामान्यसामग्रीत एव मुखविकाशाद्युपपत्तेः, न वा हर्षादाविष्टादिधीः कारणम्, तद्वदेव तथोत्पत्तेरित्याशङ्कते—

पद्मादिषु प्रबोधसंमीलनवत्तद्विकारः ।। १९ ।।

तद्विकारः मुखविकाशादिरूपो हर्षादिरूपो वा[7] विकारः ।। १९ ।।

समाधिसूत्रम्—

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ।। २० ।।

उक्तदृष्टान्तेन हर्षादावसाधारणहेतुप्रतिक्षेपो न युज्यते, तेषामपि उष्णकालादिरूपासाधारणहेतुकत्वात्, अन्यथा तत्रापि तेषामहेतुत्वं स्यात् । अन्वयव्यतिरेकाभ्यां[8] हेतुत्वं तेषामिति चेत्तुल्यं प्रकृतेऽपीति भावः । पञ्चात्मकविकाराः पञ्चभूतानुग्रहनिर्वृत्तानां पद्मादीनां प्रबोधादिविकाराः ।। २० ।।

अनादित्वस्य साधकान्तरमाह—

---

1. यत॰ A. 2. °स्यादिरात्मेति A. 3. °आदि om. C. 4. हर्षादि-हेतुकत्वात् C. 5. °विकारात् A. 6. सामान्य॰ om. A. 7. हर्षादिरूपो वा om. A. 8. ॰व्यतिरेकाभ्यां

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २१ ॥

प्रेत्य मरणानन्तरमिह जन्मनि प्राथमिकस्तन्यानुभवप्रागभावसमये आहारे स्तन्ये यो जन्मान्तरीयोऽभ्यास इष्टसाधनतासंस्कारस्तत्कृतात् स्मरणात् स्तन्येच्छायाः, अनादिरात्मेति शेषः। एतत्स्मृत्याश्रय आत्मा एतच्छरीरप्राक्कालीनः, [9]तथाविधसंस्कारजन्यस्मृत्याश्रयत्वादिति प्रयोक्तव्यम् ॥ २१ ॥

अथ तस्य[10] स्तन्याभिलाषे किं मानम्, स्तन्यप्रवृत्तिरिति चेत्तस्यामपि मानाभावः, [11]स्तन्यवदनसंयोगचेष्टैव तत्र मानमिति चेन्न, [12]अचेतनक्रियाया इव तदुपपत्तेस्तत्र प्रवृत्तेरहेतुत्वात्[13]; तद्वदेव[14] विनापीष्टसाधनताज्ञानं जायतां तथाविधाभिलाषस्तं विना वा तादृशी प्रवृत्तिरित्याशङ्कते—

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥ २२ ॥

[15]तत्र स्तन्ये उपसर्पणं[16] प्रवृत्तिरभिलाषश्चेष्टा वा ॥ २२ ॥

उत्तरमाह—

नान्यत्र प्रवृत्त्यभावात् ॥ २३ ॥

[17]अन्यत्रानभिलषिते इष्टसाधनतयाऽज्ञाते [18]प्रवृत्तविषये वा, प्रवृत्तिरूपसर्पणम्। तथा चान्वयव्यतिरेकाभ्यां तत्र[19*] तत्र[20] तस्य तस्य हेतुत्वात् कथं तेन विना तदुत्पत्तिरिति[21] भावः ॥ २३ ॥

---

9. ०संस्कारस्य जन्य० A. 10. अतस्तस्य A. 11. तस्य वदन० A, स्तन्यवदसंयोग० C. 12. अचेष्टन० C. 13. इति तु add. F. 14. तदेव F. 15-16. om. A. 17. अन्यत्राभि० C. 18. प्रवृत्ति० C. 19*. ०व्यतिरेकाभ्यां न तु A, ०व्यतिरेकत्वे तु C, ०व्यतिरेकात्तत्र F 20. तत्र cm. C. 21. कथं तेन पत्ति० C.

साधकान्तरमाह—

वीतरागजन्मादर्शनात् ॥ २४ ॥

जन्म प्राणिनो गर्भनिःसरणम्, तदिच्छाभाववतस्तदनुपपत्तेः[22] [23]जन्मानुमितरागेण प्रागुक्तरीत्यात्मा[24]सिध्यतीति भावः ॥ २४ ॥

समानाधिकरणज्ञानं विना गुणान्तरस्य रूपादेरिव रागस्यापि जन्म भविष्यतीत्याक्षिपति—

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥ २५ ॥

द्रव्यं घटादिः, तस्य सरागस्य[25] घटादौ गुणोत्पत्तिवत् रागोत्पत्तिरपि विना ज्ञानं भविष्यतीति भावः ॥ २५ ॥

सिद्धान्तमाह—

न[26] सङ्कल्पनिमित्तत्वाद् रागादीनाम् ॥ २६ ॥

सङ्कल्प इष्टादिज्ञानम्। अन्वयव्यतिरेकेणेत्यादिः।

यद्वा—[27]स्तन्याभिलाषादित्यत्राभिलाषश्चेष्टा, कार्ये कारणोपचारात्। स्तन्ये[28] प्रवृत्तेस्तत्र चेष्टाया इति वा शेषः। उपसर्पणं चेष्टा, विनापि प्रवृत्तिमिति; तदादिः। अन्यत्र प्रवृत्तिविषयात्, प्रवृत्तिश्चेष्टा। तथापि रागं विना प्रवृत्तिर्भविष्यतीति न तत्रेष्टज्ञानापेक्षेत्यत्राह—वीतेति। जन्म प्रवृत्तिजन्म।

अथवा—उपसर्पणं प्रवृत्तिः। प्रवृत्तेरयस्कान्ताभिगमनसादृश्यम्[29] अहेतुकत्वेन[30] रागाहेतुकत्वेन वा; आद्ये दृष्टान्तासिद्धिमाह—नेति। प्रवृत्तिरभिगमनम्। द्वितीये वीतेति, जन्म प्रवृत्तिजन्म।

---

22. ०भाववत्त० C. 23. जन्मानमिति C. 24. प्रागुक्तरात्मा C. 25. रागस्य A. 26. न om. C. F. 27. तुल्याभि० C. 28. तुल्ये C. 29. प्रवृत्तेवयक्षाताभिगमन० F. 30. आहेतुकत्वं न C.

वस्तुतो लाघवात्तदुत्पत्तौ मानाभावाच्चानादित्वमात्मन इत्यवधेयम्, एवमनादिभावे[31]सिद्धे भावत्वविशेषितेन तेनानादिनिधनत्वमपि[32] लाघवसहकृतेन साधनीयम्, तेनापि च देहभेदसिद्धिः ॥ २६ ॥

॥ समाप्तमनादिनिधनत्वसिद्धिप्रकरणम् ॥

अथ शरीरपरीक्षणाय सूत्रम्—

पार्थिवं गुणान्तरोपलब्धेः ॥ २७ ॥

मानुषादिशरीरं पृथिवी, तत्समवेतस्य[1] गुणान्तरस्य गन्धादिरिक्तपाकजरूपकाठिन्यादेरप्युपलब्धेः[2]। गन्धादिना[3] प्रत्येकेन पृथिवीत्यादि साधनीयमिति भावः ॥ २७ ॥

केषाञ्चिन्मतमाह—

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥ २८ ॥

पार्थिवमाप्यं तैजसञ्च, गन्धस्नेहोष्णस्पर्शास्तद्गुणाः ॥ २८ ॥

अपरमतमाह—

[M]निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥ २९ ॥

पार्थिवमाप्यं तैजसं वायवीयञ्च, पृथिव्यादि वा। निःश्वासेति। गन्धादिसहितेत्यादिः[M]। निःश्वासो वायुविशेषः, स च समवायेन हेतुः, एवमुच्छ्वासोऽपि ॥ २९ ॥

अन्य आह—

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥ ३० ॥

---

31. सिद्धभावत्व C.   32. ॰विशेषितेऽनादिनिधन॰ C.

1. ॰वेतञ्च A. 2. गन्धादीनामसमवेतत्वे सति add. A. 3. वा add. A. M—M om. C. 4. ॰काशादीनां C. 5. व्रित्ता A. 6. तासाञ्च॰ C, F. 7—8. उपकण्ठतो निराकृतानि C, न कथितानि F.

क्लेदो जलविशेषसम्बन्धः स्नेहो वा, पाक उष्णस्पर्शः तेजःसम्बन्धो वा व्यूहो निःश्वासादिः, अवकाशो वाष्पादीनां दीयतेऽनेनेति अवकाशदानं[4] छिद्रम्[5], [6]पाञ्चभौतिकत्वमुक्तप्रायम् । एतानि मतानि सूत्रकृता तुच्छत्वात् [7]कण्ठतो न निराकृतानि[8] । न हि पृथिवीत्वादीनामेकत्र समवायः सम्भवति, विरोधात् , न वा जलादिना पृथिव्याद्यारभ्यते[9], पृथिवीत्वादिना पृथिव्यादिसमवायिकारणत्वात् ।

यत्तु—पृथिव्यादीनां पञ्चानामारम्भकत्वे [10]शरीरमगन्धमरसमरूपमस्पर्शं स्यात् , एकस्य गन्धादेरनारम्भकत्वादिति वार्त्तिककृदाह । तन्न, गन्धत्वादिनारम्भकेन तथारम्भे विरोधाभावात् , बहुभिः[11] पृथिव्यादिभिः[12] शरीरारम्भाच्च[13] । गन्धादीनांस्वाश्रयावच्छेदेन[14] गन्धादिजननियमादितरावच्छेदेन गन्धादिरहितं शरीरं स्यात् , न चेष्टापत्तिः, तेषां व्याप्यवृत्तित्वनियमादिति भाष्यकृतः । तदपि न, तथा नियमे मानाभावात् । जलविशेषः क्लेदः, तेज आत्मकः पाकः, श्वासादिकञ्च समवायेन शरीरे न वर्त्तत[15] एव, मानाभावात्[16] ; छिद्रता च न, तत्र सच्छिद्रं शरीरमित्येव प्रतीतेः, स्नेहाद्युपलब्धिश्च शरीरे संयुक्तजलादीनां परम्परया । तदुक्तं वार्त्तिककृता—

"सन्निहितानान्तद्गुणोपलब्धिरि"ति,

भाष्यकृताऽपि—

"संयोगस्याप्रतिषेधात् सन्निहितानां यथा स्थाल्यामुदकतेजवाय्वाकाशानामि"ति । एतेन घटादीनामपि पाञ्चभौतिकत्वं निराकृतं वेदितव्यम् ।

अथ जलं तेजो वायुर्वेदं शरीरम्, पार्थिवाद्युपष्टम्भाच्च गन्धाद्यु-

---

9. ०व्याद्यवेद्यते A. 10. ०गन्ध्रनवस० A. 11. om. C. 12. om. A, C. 13. om. C. 14. श्रयाविच्छेदेन C. 15. वर्त्तन्ते A. 16. मानाभावात् om. A.

पलब्धिरित्येव किं न स्यादिति चेत्, अत्राचार्याः — गन्धादीनामनाशमनपायित्वेन-पायित्वेन तस्य पृथिवीत्वमेव, [१७]शैत्यादीनान्तु नानाशमनपायित्वम्, शेषदशायामननुवृत्तेरिति[१८]। वस्तुतः पटादाविव पृथिवीत्वमेवानुभवसिद्धं शरीरे, न [१९]जलादित्वमिति नेयं शङ्काऽपि। पार्थिवाप्यत्यादीनित्यादीनि त्रीणि न सूत्राणि किन्तु भाष्यमिति तु वस्तुगतिः॥ ३०॥

पार्थिवत्वसाधकान्तरमाह—

श्रुतिप्रामाण्याच्च ॥ ३१ ॥

शरीरस्य पार्थिवत्वे श्रुतेः प्रमाणत्वाच्चेत्यर्थः श्रुयते हि प्रकतौ विकारस्य लयाभिधानपरे "सूर्यं ते चक्षुर्गच्छतादित्यत्र[20] मन्त्रे "पृथिव्यां ते शरीरमि" ति ; प्रकृतौ विकारस्योत्पादपरे "सूर्यं ते चक्षुः स्पृणोमी"ति मन्त्रान्तरे "पृथिव्यां ते शरीरं स्पृणोमी"त्यपि[21]। [22]स्पृतिरुत्पत्तिः। [23]"आप्यतैजसवायव्यानि लोकान्तरशरीराणि तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र" इति भाष्यम्। लोकान्तरे वरुणसूर्यपवनलोके। भूतेति पृथिव्युपष्टभ्यो भोगप्रयोजक इत्यर्थः, आगमाज्जलत्वादिशरीरवृत्तिसमवेतवृत्ति, द्रव्यत्वसाक्षाद्व्याप्यजातित्वात्, पृथिवीत्ववदित्याद्यनुमानाच्चायमर्थोऽध्यवसेयः॥ ३१ ॥

॥ समाप्तं शरीरपरीक्षाप्रकरणम् ॥

अथेन्द्रियपरीक्षा। तत्र (संशय) सूत्रम्—

कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात् संशयः ॥ ३२ ॥

सति सत्येव[1]व्यतिरिच्याप्रात्य, कृष्णसारेणेति शेषः। तथा ग्राहकत्वादप्राप्य

---

17. श्चैत्यादी A. 18. 'मनुवृत्तेरिति C. 19. जलत्वमिति C. 20. 'गच्छतीदित्यत्र C. 21. स्पृणोरोत्यपि C, F. 22. स्मृति' A. 23. प्राप्य' C.

1. सच्येव A.

ग्राहकत्वाच्च साधारणधर्माद् गोलक इन्द्रियत्वसंशयः तत्र लाघवाद् [2]गोलकमेवेन्द्रियमिति वौद्धाः, अतिरिक्तेन्द्रियस्य प्रमाणसिद्धत्वाल्लाघवम-प्रयोजकमित्यन्ये[3]। व्यतिरिच्य गोलकतो विभज्य विषयं प्राप्येति यावत्, तथा च प्राप्यग्राहित्वसाधारणधर्मादिन्द्रियाणि भौतिकानि न वा भूतानि न वेति (वा) संशयः । तत्र अभूतानीति सांख्याः, भूतानीति परे ॥ ३२ ॥

तत्र नैयायिकमतनिरासाय बौद्धाना सांख्यानाञ्चाभिधानम्—

महदणुग्रहणात् ॥ ३३ ॥

अणूनामिव महतां पर्वतादीनामपि ग्रहणात्, न च नैयायिकसिद्धचक्षुषा तेषां प्राप्तिरस्ति, न्यूनपरिमाणेनाधिकपरिमाणाव्यापनात् । महतैवाधिक-परिमाणेनैवाणूनां[4] न्यूनपरिमाणानां गहणात व्यापनादिति वाऽर्थः। तथा [5]चासम्वद्धग्रहेऽतिप्रसङ्गस्य तवापि समानत्वात् किमितिरिक्तेनेन्द्रियेणेति बौद्धाः। अत एवेन्द्रियाणां विभुत्वस्वीकार इति नासम्बद्धग्रह इत्यभौतिका-नीन्द्रियाणीति सांख्याः ॥ ३३ ॥

सिद्धान्तसूत्रम्—

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥ ३४ ॥

रश्मिना गोलकस्थेन तादृगर्थस्यापि[6] सन्निकर्षात् तयोर्महदण्वोर्ग्रहणं[7] नानुपपन्नमित्यर्थः । महदर्थग्राहकत्वञ्च प्रदीपादौ व्यभिचारीति हृदयम् ॥ ३८ ॥

द्रव्यत्वेनोभयसिद्धभिन्नं न द्रव्यं तत्त्वेनानुपलभ्यमानत्वादित्यभिप्रेत्य वौद्ध आक्षिपति—

---

2. गोलोकं' C. 3. 'मित्यन्यो C.4. 'वान्यूनां C. 'बालुनां F. 5. च सम्बन्ध'C.
6. गन्धस्यापि F. 7. 'दर्योग्रिहणं C, F.

तदनुपलब्धेरहेतुः ॥ ३५ ॥

तेषामिन्द्रियाणामुपलम्भो न ज्ञानं स्वरूपासिद्धेः, किन्तु प्रत्यक्षम्, न च तदभावे व्याप्तिरस्ति, अतीन्द्रियद्रव्ये व्यभिचारादप्रयोजकत्वाच्चेत्यभिप्रेत्य सिद्धान्तमाह—

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥ ३६

प्रत्यक्षतोऽनुपलब्धिरनुमीयमानस्य [8]नाभावसाधिकेत्यर्थः ॥ ३६ ॥

ननु महत्त्वरूपवत्त्वाविशेषे सूर्यालोकवत् कथं नेन्द्रियाण्युपलभ्यन्त इत्यत आह—

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३७ ॥

द्रव्यगुणस्य इन्द्रियस्य रूपादेर्धर्मभेदात [9]वैलक्षण्यादनुद्भूतत्वान्नियमतोऽनुपलब्धिरित्यर्थः । अनुद्भूतरूपवत्त्वान्नेन्द्रियप्रत्यक्षतेति भावः । ॥३७॥

पृथिवीत्वतेजस्त्वाद्यविशेषादुद्भूतरूपा एव कथं न घ्राणादि, इत्यत आह—

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३८ ॥

व्यूहोऽनुद्भूतरूपादिवदवयवकत्वं कर्मविशेषेण कारितः पुरूषार्थभोगमूले प्रत्यक्षे प्रयोजकः[10], प्रत्यक्षाभावो वा पुरूषार्थः ॥ ३८ ॥

[11]नन्वेवमन्वयव्यभिचारान्महत्त्वं न प्रत्यक्षकारणं स्यादित्यत आह-

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥ ३९ ॥

मध्यन्दिन उल्काप्रकाशस्य सौरकिरणाभिभवात्[12] अनुपलब्धिवत्तस्य[13] [14]चक्षुषोऽप्यनुपलब्धिर्महत्त्वकारणत्वाविघटिका, सामग्र्या एव व्यभिचारो

---

8. लाभाव' F. 9. द्रव्यगुणरूपधर्मस्य रूपादेर्भेदाद् C, F .10. अन्यथादुद्भूतस्पर्शेन चक्षुषा सन्निकर्षमात्रेण ग्रह्यदाहू किं गृह्यतेति add. C. 11. नन्वेवं व्यभि' C, F. 12. 'किरणानुभवात् C. 13. 'वत्तदस्य C. 14. चाक्षुषो' F.

दूषणं न कारणस्येति भावः ॥ ३९ ॥

नन्वेवं लोष्टेऽपि[15] रश्मिः स्यात्, सौरतेजोऽभिभवान्नोपलभ्यत इति चेत् ?

न रात्रावप्यनुपलब्धेः ॥ ४० ॥

अन्यथा सौरतेजोऽभिभवस्य तस्य [16]लोष्टसत्त्वे रात्रावप्युपलम्भः स्यात्, तदाऽनुपलब्धेश्च तन्नास्तीति भावः ॥ ४० ॥

अभिभवादेव चक्षुषोऽनुपलब्धिर्नत्वनुद्भुतरूपादिति तटस्थाशङ्का निरस्यति-

वाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४१ ॥

अनभिव्यक्तितः अनुद्भूतरूपत एव[17] चक्षुषोऽनुपलब्धिर्नत्वभिभवाद् [18]वाह्यप्रकाशसाहित्याद्विषयोपलब्धेश्च[19] चक्षुषा जननात्, न ह्यभिभूतं कार्यक्षममिति भावः ॥ ४१ ॥

अथ चक्षुर्ग्रह एवाभिभवो विरोधी[20] न तत्कार्य इत्यत आह-

अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥

अभिव्यक्तौ उद्भूतरूपे प्रमाणसिद्धे एवाभिभवादग्रहः, न च चक्षुषि तत् प्रमाणसिद्धम्, [21]प्रतिहतश्चाभिभवाभावकारणान्तरकल्पनागौरवेणेति[22] भावः ।

नव्यास्तु—सूर्यतेजोऽभिभवादेव चक्षुषोऽनुपलब्धिर्न त्वनुद्भूतरूपादित्याशङ्कते—मध्यन्दिनेति । समाधिमाह—न रात्राविति । तदापि[23] चन्द्रादिकिरणैवाभिभवः, चक्षुषः उद्भूतरूपवत्तायाः प्रमाणसिद्धत्वादित्यभिप्रायेणरेशङते—बाह्येति । [M]उद्भूतरूपवद्बाह्यतेजसो विषयोपलब्धेर्दर्शनेन अनभिव्यक्तित-

---

15. नोष्णोऽपि A. 16. नोष्ण' A. 17. रूप एव C. 18. 'प्रकाशमाच्छित्या' A. 19. 'लब्धोः C, F. 20. 'भावा विरोधी C. F. 21. 'श्चाभिभवेकारण' F. 22. कल्पनेगौरव' C. 23. तवापि A. M—M. om C, F. A case of haplography.

श्चक्षुषोऽनुद्भूतरूपवत्त्वे ततो विषयोपलब्धिर्न स्यादित्यर्थः । तथा च चक्षुरुद्भूतरूपवत्, व्यञ्जकतेजस्त्वाद् बाह्यालोकवदित्यनुमानाच्चक्षुष उद्भूतरूपसिद्धिसिद्धि [? °सिद्धिरिति] भावः । समाधत्ते—अभिव्यक्ताविति। यद्वा—स्वीयस्पर्शाभिव्यञ्जके ज्ञानेऽभिभवादनुद्भूतरूपात्, तथा च व्यभिचारान्नोक्तानुमानरूपादिव्यञ्जकोक्ता [?] चाप्रयोजकत्वमिति भाव इत्यत आह-बाह्येति[M] । प्राचीननयोक्तास्वरसादाह—अभिव्यक्ताविति प्राहुः ॥ ४२ ॥

क्वचिन्नयनतेजसि प्रत्यक्षमपि मानमित्याह—

नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥

[24]नक्तञ्चराणां वृषदंशादीनाम् । नयनरश्मिरिति[25] । [26]यत्सहकारादन्धकारेऽपि तेषां दर्शनमिति भावः ॥ ४३ ॥

व्यभिचारात् सन्निकर्षो न हेतुरित्याशङ्कते[27]—

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकाद्यन्तरितोपलब्धेः ॥ ४४ ॥

[28]तथा [29]च किमतिरिक्तेन्द्रियस्वीकारेणेति बौद्धाशयः ॥ ४४ ॥

सिद्धान्तसूत्रम्—

कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥

सन्निकर्षाहेतुत्वे तदन्तरितमप्युपलभ्येत[30] अत एवेन्द्रियसिद्धिः सांख्यमतनिरासश्चेति भावः ॥ ४५ ॥

उक्तं व्यभिचारमुद्धरति—

अप्रतिघातात् सन्निकर्षोपपत्तिः ॥ ४६ ॥

अप्रतिघातात् काचादिनाऽप्रतिबन्धात् ॥ ४६ ॥

---

24. उक्तचराणां C. 25. 'रश्मिती C, F. 26. वत्सह' C. 27. हेतुरीत्या' A. 28. Before तथा, C and F read त्वयापि वाच्यं. 29. चाथमति' A, च किमिति' C. 30. 'पलब्धेः C. 'पलभेत F.

न चैतददृष्टचरमित्याह—

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽभिधातात् ॥ ४७ ॥

[31]आदित्यादिरश्मेः कुम्भादिनाऽप्रतिघातात्, कुम्भाद्यन्तर्गतजलादावौष्ण्योपलब्धेः, स्फटिकाद्यन्तरिते प्रकाश्ये प्रदीपादिरश्मेरप्रतिघातात्, भर्जनादिकपालेन[32] तत्स्थे दाह्ये वह्नेरप्रतिघातात[33] ॥ ४७ ॥

शङ्कते—

नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥

अप्रतिघातो न[34], अन्यथा इतरस्य[35] कुड्यादेरितरस्य स्फटिकादेर्यो धर्मोऽप्रतिघातकत्वं तत् प्रसज्येत[36]ऽ ॥ ४८ ॥

सिद्धान्तमाह—

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥ ४९ ॥

[M]आदर्शादावेव[37] प्रसादो रूपविशेषः स्वच्छता, तया[38] [39*]मुखादिषु रूपोपलब्धिवत[40*] तेषां स्फटिकाद्यन्तरितानाञ्चक्षुरादिभिः प्राप्तिः, किञ्चिद्धि प्रतिबन्धक[M] किञ्चिच्च न तथेति भावः ॥ ४९ ॥

विपर्यय[42] एव[43] किं न स्यादित्यत आह—

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥

---

31. Before this, C and F read आदित्यदीत्यर्थः । स्फटिकादीत्यर्थः in excess. 32. 'कपादेन A. 33. 'रप्रिति' C. 34. न om. A. 35. ईतरस्य A. 36. प्रज्ञेत C. M—M. om. C. 37. 'दाविव F. 38. स्वच्छतया A. 39*-40*. अथादिष रूपोपलब्धिवत् A. मुखादिस्वरूपोपलब्धिवत् F. Ms. F ends here. 42. विपर्यया: A. 43. एव om. A.

[44]दृष्टेनानुमितानां दृष्टानामानुमितानाम्वा[45] एवं भवत्विति नियोगः, एवं न भवत्विति प्रतिषेधा (वा) नोपपद्यते, तथैव प्रमाणतः[46] सिद्धेः ॥५०॥

॥ समाप्तमिन्द्रियपरीक्षाप्रकरणम् ॥

इन्द्रियनानात्व एव "दर्शनस्पर्शनाभ्यामि"[1] त्यादि निर्वहतीत्युपोद्घातेनेन्द्रियनानात्वं[2] परीक्षणीयम्, तत्र संशयप्रतिपादकसूत्रम्—

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥

विभिन्नस्थानत्वं घटपटादीनां नानात्वदर्शनात्, अवयविन एकस्य विभिन्नस्थानत्वदर्शनाच्च, विभिन्नस्थानत्वात् साधारणधर्मात् । [3]एतत्कालीनमेतच्छरीरावच्छिन्नमिन्द्रियं[4] मनः श्रोत्रं त्वग् वा[5] एकमनेकम्वा, द्वित्वपर्याप्ताधिकरणं न वेति संशयः । द्वित्वं तादृशेन्द्रियान्यवृत्ति न वेति वा संशयः । पक्षतावच्छेदकावच्छेदेन विधेः[6] पक्षातावच्छेदकसामानाधिकरण्येन निषेधस्य सिद्धेः, उद्देश्यत्वं [?], [7]नानास्थानत्वं तदवृत्तिवृत्तितद्भिन्नवृत्तिधर्मवत्त्वम्[8], तादृगिन्द्रियं[9] न वेति[10] संशयः । नानात्वं त्वगन्यत्वम्, अवयवी त्वक्, [11]नानास्थानत्वं यथाश्रुमेवेति[12] तु वस्तुगतिः ॥ ५१ ॥

आक्षिपति—

त्वगव्यतिरेकात् ॥ ५२ ॥

तादृगिन्द्रियं त्वक्, तादृगिन्द्रियनिखिलप्रदेशेऽव्यतिरेकात्, सम्वन्धविशेषाद्वा तादृगिन्द्रियत्वाद्वा[13], यन्नैवं तन्नैवम् ॥ ५२ ॥

---

44. दृष्टादिना' A. 45. मितानाद्या A. 46. प्रमाण ततः C. 1. न्या 'सू ३।१।१. C 2. उपदेनानेन्द्रय' C. 3. 'लीनमेतच्छरीरा' C. 4. न add. C. 5. तद्वा C. 6. विरोधः C 7-8. om. A. 9. तादृशा इन्द्रियत्वं A. 11-12. om. A. 13. 'यत्वात्वा C.

सिद्धान्तसूत्रम्—

न युगपदर्थानुपलब्धेः ॥ ५३ ॥

त्वङ्मनःसंयोगादिसकलकारणसमवधाने स्पर्शग्रहसमये त्वचा रूपाद्यग्रहात् त्वचो रूपादिग्राहकमनोवृत्तिसंयोगा[14*]श्रयत्वाभावस्य, तेन रूपादिग्राहकेन्द्रियत्वाभावस्य सिद्धौ व्यभिचाराभावात्ताभ्यामन्वयेन[15] व्यतिरेकेण वा त्वगन्यत्वं साधनीयमिति । तादृगिन्द्रियं न त्वक्, [16]युगपत्तदीयगन्धादिग्रहसमयेऽर्थस्य तदीयस्पर्शस्यानुपलब्धः, इदानीं मनःसंयोगत्वे [17]उद्भूतस्पर्शाश्रयमहत्संयुक्तत्वे च सतीदानीं स्पर्शसाक्षात्कारानुपधायकत्वादिति तु नव्याः ।

भाष्यम्—"नेन्द्रियार्थान्तरानुपलब्धः । रूपादिग्राहकमिन्द्रियं[18] न त्वक्, त्वचः कराद्यवच्छेदेन[19] रूपाद्याश्रयसंयोगदशायामिन्द्रियार्थान्तरस्य रूपादेरनुपलब्धः[20] । अत्राक्षेपभेपष्यम्—"त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः[21] । [22]चक्षुरवच्छिन्नत्वचा धूमग्रहवत्तद्गोलकावच्छिन्नत्वगवयवैदेव रूपादिग्रहान्तोक्तदोष इति भावः । उत्तरभाष्यम्— "[23]व्याहतत्वादहेतुः" । इन्द्रियैकत्वं व्याहतमेव, अवयवावयविनोर्भेदादित्येकत्वसाधकतयोपन्यस्तो न हेतुः । अथ तत्तदवयवावच्छिन्नत्वक्संयोगो हेतुरिति नोक्तदोषः, अतः परोक्तहेतुदूषणाय भाष्यम्— "सन्दिग्धश्चाव्यतिरेकः" । उक्तोऽव्यतिरेको व्याप्यतया सन्दिग्धोऽनकूलतर्काभावादिति भावः । न चेदमपि युक्तम्, लाघवस्यैव तस्य सत्त्वात्, न वा सौत्रमुत्तरम्, तत्तद्गोलकस्थावयवावच्छिन्नमनःसंयोगस्य हेतुत्वात् । अस्तु वा चाक्षुषादिप्रयोजकं मनःसंयोगवैलक्षण्यम्, अनन्तचक्षुरादिकल्पनातो लघुत्वात्, अस्तु वा त्वक्संयोग एव तथा

14*. 'मानवृतिः संयोया' A. मनः संयोगा' C. 15. 'भावास्ताभ्याम' C. 16. 'पन्नदीय' C. 17. च तदेस्पर्शा' C. 18. 'मितन्द्रियं C. 19. 'देनेन्त C. 20. 'लब्धिः C. 21. धूमोपलब्धिः C. 22. चक्षुराद्यव' A. 23. व्याहृत' C.

वैलक्षण्यम्, माऽस्तु च मन आत्मा च, त्वच एव नित्यत्वाभ्युपगमात् । [24]चक्षुर्वच्चक्षुर्गोलक[25]- विशेषावच्छिन्नत्वचो[26] दूरगमनं नानुपपन्नम्, परिच्छिन्नपरिमाणस्य च जन्यत्वे मानाभावः, श्रुता[27] भेदेनोपन्यासश्चो-पाधिभेदादिति वदन्ति ॥ ५३ ॥

नानात्वस्थापनाय सूत्रम्—

इन्द्रियार्थपञ्चत्वात् ॥ ५४ ॥

इन्द्रियार्थवहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयाश्चाक्षुपस्पार्शनोभयविषय-गुणत्वसत्तान्यजातिरहितगुणाः, तेषां पञ्चत्वात्, पञ्चेन्द्रियाणीति शेषः । ग्राह्यभेदेन ग्राहकभेदस्यावश्यकत्वादिति भावः ॥ ५४ ॥

आक्षिपति—

[28]न तदर्थबहुत्वात् ॥ ५५ ॥

तथा चैकदा एकपुरुषस्य[29] रूपादिप्रत्येकग्राहकेन्द्रियानन्त्यापत्तिः[30] ॥ ५५ ॥

उत्तरम्—

गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः ॥ ५६ ॥

अयं प्रतिषेधो न, न हि वयं तादृशतत्तदन्यव्यक्तिषु[31] [31]तत्तद्ग्राहक-वहिरिन्द्रियाग्राह्यत्वं चाक्षुषेत्याद्यभिहितविशेषितेन तदन्यत्वेन साधयामः, किन्तु रूपं [33]गन्धग्राहकवहिरिन्द्रियाग्राह्यं [34]गन्धान्यतादृशगुणत्वादि-त्यादिक्रमेण, इन्द्रियान्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिभेद एवेन्द्रियभेदप्रयोजक इति भावः ॥ ५६ ॥

24-25. चक्षुर्षगोलक' A. 26. 'च्छिन्नत्वाच्च C. 27. cf. वृहदारण्यक' ४।४।२. 28. तदर्थावहत्वात् A. 29. 'प्रत्येकयाहिके' C. 31. 'तत्तदव्यक्तिषु C. 32. तदग्राहक' C. 33. गन्धाग्राहक' C. 34. रूपान्य' A. 22. चक्षुराद्यव' A.

अप्रयोजकत्वं प्रतिषेधमाशङ्कते-

विषयत्वाव्यतिरेकादेकत्वम् ॥ ५७ ॥

रूपं [35]गन्धग्राहकबहिरिन्द्रियग्राह्यं ग्राह्यबहिर्विषयत्वादिति प्रतिषेधः[36], एतदप्रयोजकत्वे उक्तमप्रयोजकमिति भावः ॥ ५७ ॥

उत्तरम्-

न, बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ ५८ ॥

रूपादिग्राहकेन्द्रियाणां परस्परं भेद इति शेषः। [37]पञ्चतेति लक्षणपदात परं योजनीयम्[38] बुद्धिरूपं लक्षणं तेषां[39] पञ्चत्वेभ्यः, तेभ्यः[40] पञ्चभ्य इति यावत। एवञ्च श्रोत्रे गत्यादीनामभावेऽपि[41] न क्षतिः। बुद्धिश्चाक्षुषादि, ज्ञानवैजात्ये करणवैजात्यमित्यभिमानः। इत्थं सिद्धेषु विभिन्नेन्द्रियेष्वधिष्ठानाद्यपि[42] भेदकम्। अधिष्ठानं गोलकादि सम्बन्धविशेषेण, गतिर्दूरादिगतिः[43] आकृतिर्निविडविशरारूसंयोगादिरसमवायिकारणरूपः, जातिः [44]चक्षुष्ट्वादिरिन्द्रियत्वविशेषितपृथिवीत्वादिर्वा। यद्वा— बुदध्यादीनां पञ्चप्रकारेभ्यः, अधिष्ठानं विषयो रूपादिर्गतिगणो गन्धस्नेहादिः आकृतिर्गोलकविशेषः, जातिर्धर्मः पृथिवीत्वादि,तत्पञ्चत्वेभ्यः। एवञ्च चाक्षुषजनकेन्द्रियत्वादिरूप[45] ग्राहकेन्द्रियत्वादिगन्धस्नेहोष्ण[46]स्पर्शवदिन्द्रियत्वादि तत्तद्गोलकावच्छिन्नेन्द्रियत्वादि पार्थिवेन्द्रियत्वादि भेदकमिति भावः ॥ ५८ ॥

ननु तत्र पृथिवीत्वादिसत्त्वे तद्विशेषितमिन्द्रियत्वं भेदकं भवेत्तदेव[47] तु न, तत्र मानाभावादिति तत्र मानमाह—

---

35. गन्धाग्राहक' C. 36. प्रतिबोधः C. 37-38. om. C. 39. एतेषां C. 40. एतेभ्यः C. 41. 'मभेदकत्वेऽपि C. 42. 'ष्ठानेत्यपि C. 43. दुर्वारादिगतिः C. 44. चक्षुस्त्वादि' C. 45. 'रूप' om. C. 46. 'स्नेहस्टे' A. 47. भावकत्तदेव C.

भूतविशेषगुणोपलब्धेस्तादात्म्यम् ॥ ५९ ॥

गन्धादिव्यञ्जकत्वेन पृथिव्यादित्वं घ्राणादीनामिति भावः ॥ ५९ ॥

॥ समाप्तमिन्द्रियनानात्वप्रकरणम् ॥

अथार्थपरीक्षणाय सूत्रे[1]—

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥ ६० ॥

अप्तेजोवायूनां पूर्वपूर्वमपोह्याकाशस्योत्तरः ॥ ६१ ॥

पूर्वं पूर्वं गन्धं गन्धरसौ गन्धरसरूपाणि अपोह्य परित्यज्य स्पर्शपर्यन्ताः, उत्तरः शब्दः ॥ ६० ॥ ६१ ॥

आक्षिपति—

न सर्वगुणानुपलब्धेः ॥ ६२ ॥

नैवं गुणनियमः, पृथिव्यादियत्वेनाभिहितानां सर्वेषां पार्थिवादीन्द्रियेणानुपलब्धेः। अयम्भावः-पृथिवीविशेषगुणस्य पार्थिवेन्द्रियाग्राह्यत्वविशिष्टग्राह्यत्वस्याभाववत्तानियमात् रसादीनां तथा ग्राह्यत्वेन पृथिवीविशेषगुणत्वाभावः, [2]स्नेहसांसिद्धिकत्रवत्वान्यत्वे जलीये । ग्राह्यत्वे च सति[3] ग्राह्यत्वस्याभावो जलविशेषगुणत्वव्यापक इति, तथा ग्राह्यत्वेन रूपस्पर्शयोर्जलविशेषगुणत्वाभावोऽपि[4] साध्यः, एवं स्पर्शेऽपि तैजसेन्द्रियाग्राह्यत्वे[5] सति ग्राह्यत्वेन तेजोविशेषगुणत्वाभावोऽपि साध्यः, न चाप्रयोजकत्वम्, तत्समवेतग्राह्येन्द्रियार्थस्य[6] तद्वृत्तिद्रव्यविभाजकोपाधिमदिन्द्रियग्राह्यत्वनियमात् ॥ ६२ ॥

---

1. सूत्र C. 2-3. स्नेहसांसिद्धिकद्रव्यतवान्यत्वविशिष्टजलेन्द्रियग्राह्यत्वे सति C. 4. 'विशेषरूपत्वाभावः C. 5. 'ग्राहत्त्वेन A. 5. 'ग्राहत्वसमवेतेन्द्रियार्थस्य C. 7. स्ववृत्ति' C.

पूर्वपक्षी स्वमते गुणनियममाह—

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदुपलब्धिः ॥ ६३ ॥

जलादीनामेव एकैकेन रसादिसद्भावाद् घ्रणादिना रसादेरनुपलब्धिः ॥ ६३ ॥

तर्हि कथं पृथिव्यादिरसनादिसंयोगदशायां रसाद्युपलब्धिरित्यत आह—

विष्टं ह्यपरं परेण ॥ ३४ ॥

अपरं पृथिव्यादि परेण जलादिना समाविष्टम्, तथा च तदा जलादिनाऽपि रसनादिसंयोगाद्रसादिग्रह इति भाव : ॥ ३४ ॥

सिद्धान्तसूत्रम्—

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ३५ ॥

चाक्षुषत्वात[8,9] त्वाचत्वाच्च न पृथिवीजलयो रूपरहितत्वम्, तयोस्तेजसश्च[10] न[11] स्पर्शराहित्वम्, तयोस्तत्र हेतुत्वादिति भावः । न च रूपादिविशेषव (द्) द्रव्य सम्वन्धविशेष एव हेतुर्गौरवात् ।

यद्वा—पृथिव्यामाप्ये च रूपरसस्पर्शानां प्रत्यक्षत्वात् । उपलक्षणमेतत्, तेजस्यति[12] स्पर्शस्य तथात्वादित्यपि मन्तव्यम् ॥ ६५ ॥

नन्विन्द्रियेण स्वविजातीयद्रव्यविशेषगुणग्रहे[13] घ्राणादिनाऽपि रूपादिग्रहप्रसङ्ग इत्युक्तवाधकाद्गुरुरपि रूपादिमत्संयोगविशेष एव प्रयोजकोऽभ्युपेयते इत्यत आह—

पूर्वं पूर्वं गुणोत्कर्षात् तत्प्रधानम् ॥ ६६ ॥

पूर्वं पूर्वं गन्धादि, तेषां घ्राणादीनामेव[14] प्रधानं ग्राह्यम् । कुतः ? घ्राणादौ गुणस्य गन्धादवोधात्कर्षात्, तथा च स्वसमानजातीयोत्कृष्टगुण-

---

8. सत्वाच्च A. 9. त्वचेत्वाच्च C. 10. 'स्तेतश्च C. 11. न om. C. 12. 'तगअंयू om. C. A. 13. 'गुणग्राह C. 14. एव om. C.

वदिन्द्रियमात्रग्राह्यत्वनियमादेव रूपादीनां घ्राणादिनाऽग्रहो न तु त्वदुक्तनियमादिति भावः । उत्कर्षश्च जातिविशेष इति कुमतयः, कारणत्वमिति विमतयः, स्वसमानजातीयगुणग्रहव्यवस्था-प्यवृत्तित्वमिति तु सुमतयः[15] ॥ ६६ ॥

नन्विन्द्रियाणां रूपादिमत्त्व मानाभावादयुक्तमिदमित्यत आह—

तद्व्यवस्थानन्तु भूयस्त्वात् ॥ ३७ ॥

घ्राणादौ गन्धादिव्यवस्थानन्तु पृथिवीत्वादौ[16] गन्धादिसाहचर्यस्य भूयस्त्वात्, गन्धादिव्याप्तेरिति यावत् ।

यद्वा—ननु घ्राणादोनां गन्धादावेवोत्कर्षो[17] न रूपादावित्यत्र किं मानमत आह— तद्व्यवस्थेति । उत्कर्षव्यवस्थापनन्तु भूयस्त्वात्[18] स्ववृत्तिगुणत्व-साक्षाद्व्याप्यजात्यवच्छिन्नव्यापकतावच्छेदकस्वसमानाधिकरणवृत्तियावद्रू -पत्वाद्यन्यतमकत्वादित्यर्थः ॥ ६७ ॥

नन्विन्द्रियगुणसत्त्वे तदुपलम्भापत्तिरत आह—

सगुणानामिन्द्रियभावात् ॥ ६८ ॥

इन्द्रियभावात इन्द्रियत्वात्, तच्च शरीरसंयुक्तसाक्षात्प्रतीतिसाधनत्वे सत्यतीन्द्रियत्वमिहातीन्द्रियत्वपर्यवसितम्, तथा च सगुणानां घ्राणादीनामतीन्द्रियत्वान्न तद्गुणोपलब्धिरिति पर्यवसितार्थः ॥ ३८ ॥

नियममभिप्रेत्य शङ्कते—

न शब्दगुणोपलब्धेः ॥ ३९ ॥

सगुणानां तेषामतीन्द्रियत्वमिति नियमो न, श्रोत्रगुणस्य शब्दस्योपलब्धेरित्यर्थः ॥ ३९ ॥

---

15. स्वमतयः C. 16. गन्धादिव्यवस्थापनन्तु पृतिवीत्वादौ add. C. A. case of dittography. 17. 'दारेवोत्' C. 18. भूयस्वा

न वयं नियमं वदामः, किन्तु सामग्रीविरहान्न चक्षुरादिगुणग्रह इति, शब्दग्रहस्तु सामग्रीसत्त्वान्नानुपपन्न[19] इत्यभिप्रायवानुत्तरमाह—

तदनुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७० ॥

अन्योऽन्यद्रव्यगुणयोश्चक्षुरादिगुणशब्दयोः सामग्रीविरहतत्सत्त्वाभ्यां वैधर्म्यात् शब्दस्योपलब्धिर्न चक्षुरादिगुणस्येति भावः ।

स्वतन्त्रास्तु—शरीरमेवात्मा, स्मृतिसंस्कारयोरदृष्टभोगयोश्च न सामानाधिकरण्यन हतत्वम्, उद्वोधकस्य[20] चन्दनसंयोगादीनाञ्च विशिष्यैव हेतुहेतुमद्भावाच्च नातिप्रसङ्गः । अस्तु वा इष्टसाधनतादिज्ञानं विना काचित् प्रवृत्तिः, न हि तयोः सामान्यतो [21]हेतुहेतुमद्भावो व्रह्मणाऽपि शक्यते वक्तुम्[22] ; स्वीक्रियताम्वा प्रवृत्तिजनकतावच्छेदको यथा ज्ञानवृत्तिरूपाधिविशेषः, अनन्तात्मकल्पनातो लघुत्वात् । भवतु वा चेष्टाविशेषो विनापि प्रवृत्तिम्, कर्मत्वस्येव[23] चेष्टात्वस्यापि प्रवृत्तिजन्यतावच्छेदकत्वात । अन्यशरीरीयदुःखविशेषध्वंसायैव च मुमुक्षवः[24] प्रवर्त्तन्ते, तत्तच्छरीरस्यैव [25]तत्रात्मतुल्यत्वम् ; 'अहं शरीरमि'त्यपि धीरेवं स्यादिति चेत्, न स्यात्, [26]आत्मन्यपि शरीरे शरीरत्वांशे आत्मत्वावच्छिन्नभेदस्यैव सत्त्वात्, अत एव 'मम शरीरम् गौरोऽहमि'त्यादि धीरूपपद्यते । अस्तु वा श्रुतिसिद्ध एक ०[27] एवात्मा, स च दुःखविशेषध्वंसवत्तया मुक्तो[28] बद्धश्च, अतिप्रसङ्गस्तु विशिष्य कार्यकारणभावेनावश्यकेन निरसनीयः । न चेन्द्रियेष्वपि मानमस्ति, गोलकक्रियाया[29] एवातिरिक्तसम्बन्धस्वीकारात्, स च समवाय इव कुत्रचिदेव

---

19. 'प्रायवानाह C. 20. तद्वोधकस्य A. 21. हेतु' om. C. 22. वक्तुः C. 23. 'तस्यैव A. 24. समुक्षरः A. स्वस्वक्षरः C. 25. वत्रात्मतुल्य' A. च स्वतो तुल्य' C. 26. आत्मान्यपि A. 27. एक om. A. 28. नक्तो C. 29. 'क्रियादे A.

[30] कस्यचित्, न वा लौकिकत्वघटितमिन्द्रियसंयोगादिकार्यतावच्छेदकमनुगतानतिप्रसक्तं वक्तुं शक्यते, एवञ्च विशिष्य कार्यकारणभावान्नातिप्रसङ्गशङ्काऽपि, तस्माच्छ्रुतय एव प्रमाणतयाऽनुसरणीया इति वदन्ति ॥ ७० ॥

॥ समाप्तमर्थपरीक्षाप्रकरणम् ॥

॥ इति वुद्धिमनोभिन्नकारणरूपप्रमेयपरीक्षणं नाम[31] तृतीयस्याद्यमाह्निकम ॥

30. 'चिदिव C. 31. नये C.

तृतीयाध्यायस्य द्वितीयमाह्निकम्

तदेवं नवभिः प्रकरणैस्तृतीयस्य प्रथमाह्निकं समाप्य सम्मति सप्तभिः प्रकरणैः शरीरान्तर्वर्तिप्रमेयपरीक्षणं विद्यास्यते, सैव च द्वितीयाह्निकार्थः। तादृशप्रमेयत्वञ्च बुद्धिमनोऽन्यतरत्वमिति वदन्ति। तत्र बुद्धौ परीक्षणीयायां संशयप्रतिपादकं सूत्रम्—

कर्माकाशसाधर्म्यात् संशयः ॥ १ ॥

प्रमेयत्वादितः वुद्धिर्नित्या न वेति संशयः। बुद्धिश्चात्मान्यो वृत्तिमान्, वृत्तित्वं[1] सविषयकत्वम्, तद्वत्ता च कालिकादिसम्बन्धव्यावृत्तसम्बन्धेन, सा च शरीर एव प्रसिद्धा, एतेन वुद्धितत्त्व[2] एव सांख्यानां विवादः पर्यवसितः। बुद्धिपदवाच्यं तथा न वेति संशयः इत्यपि कश्चित्।ज्ञानमेव बुद्धिरिति तु नव्याः ॥ १ ॥

सांख्यो नित्यत्वं साधयति—

विषयप्रत्यभिज्ञानात् ॥ २ ॥

वुद्धिर्नित्येत्यादिः। विषयप्रत्यभिज्ञानं वृत्तिः, सा च समवायेन शरीरादिव्यावृत्तसम्वन्धेन वा हेतुः, व्याप्तिश्च व्यतिरेकतोप्युभयसिद्धेति भावः ॥ २ ॥

[A]दूषयति सूत्रकारः[A]—

साध्यसमत्वादहेतुः ॥ ३ ॥

अयं न हेतुः, साध्येन समत्वात् असिद्धत्वात्। आत्मन्येव तथा वृत्तिर्नान्यत्र, मानाभावात्, 'अहं घटादि जानामी'त्येव प्रतीतेः, कूटस्थत्वञ्चत्मनि सार्वकालिकत्वम्, नैतद्विरोधि[3] अन्यादृशश्च नाङ्गीक्रियत एवेति भावः ॥ ३ ॥

---

1. बृत्तिमान् वृत्तित्वं C. 2. बुद्धित्व A. A-A. in A only. 3. 'विरोधे A.

अथ वृत्तिवृत्तिमतोरभेदाद् वृत्तौ एव तत्प्रसिद्धेर्नासिद्धिरित्यत आह—

न युगपदग्रहणात् ॥ ४ ॥

वृत्तिवृत्तिमतोरभेदे वृत्तिमतो नित्यत्वे वृत्तीनामपि नित्यत्वाद्गन्धादिग्रहकाले रसादिनिखिलग्रहप्रसङ्गः, न चैवमिति भावः ॥ ४ ॥

अथ वृत्तीनां विनाशान्नैकदा[4] सत्त्वमित्यत आह—

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ५ ॥

प्रत्यभिज्ञानानां वृत्तीनामभावे विनाशे[5] च तदभिन्नत्वाद्वृत्तिमतो विनाशप्रसङ्गः, तथा च वृत्तीनामनित्यत्वाद्वृत्तिमतश्च नित्यत्वान्न[6] तयोरभेद इत्यसिद्धिस्तदवस्थैवेति[7] भावः ॥ ५ ॥

स्वमते युगपद्ग्रहणानामसत्त्वं व्यवस्थापयति—

क्रमवृत्तित्वादयुगपद्ग्रहणम् ॥ ६ ॥

वृत्तीनां बुद्धीनां क्रमिकत्वादनित्यत्वात् ॥ ६ ॥

कासामपि वृत्तीनां प्रकारान्तरेणापि युगपदसत्त्वं व्युत्पादयति—

[8]अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ॥ ७ ॥

एकदा गन्धरसादीनामप्रत्यक्षञ्च विषयान्तरग्राहकेन्द्रियेणैव व्यासङ्गात् मनःसंयोगात्[9] ॥ ७ ॥

न च त्वयैवं[10] वक्तुं शक्यत इत्याह[11]—

न गत्यभावात् ॥ ८ ॥

न त्वन्मते केनचिदेव मनःसंयोगस्त्वन्मते तस्य गत्यभावात् विभुत्वात् ॥ ८ ॥

वृत्तिवृत्तिमतोर्भेदभानान्चेति तु हृदिस्थदूषणं वक्तुं शङ्कते[12]—

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥ ९ ॥

---

4. ०शार्थैकदा C. 5. विनाश्ये C. 6. तरोर० C. 7. ०स्थोवेति० C. 8. प्रत्यभिज्ञा० C. 9. मनःसंयोगात् om. C. 10. द्वयैवं C. 11. इत्यत आह A. 12. ०दूषणं । तद्दूषयति C.

जवाकुसुमसन्निहितात्[13] स्फटिकात्तस्मिन्नेव [14]नीलमणिसन्निहिते[15] भेदभ्रम इव घटादिचक्षुः-सन्निकर्षदशायां वृत्तिवृत्तिमतोर्भेदभ्रम इत्यर्थः ॥ ९ ॥

उत्तरम्—

न हेत्वभावात् ॥ १० ॥

न तत्प्रतीतेर्भ्रमत्वं[16] हेतोः प्रमात्वबाधकहेतोरभावात्। "न हेत्वभावादिति भाष्य"मिति टीकादृष्टेर्नेदं[17] सूत्रं किन्तु सौत्रसिद्धान्ताभावेन न्यूनतापरिहाराय भाष्यमिदमित्येके। "इति भाष्य"मिति टीकाया "इत्यस्य भाष्यमि"त्यर्थ इति सूत्रमेवेदमिति परे। "नानेकान्ता"दिति वार्त्तिककृल्लिखितमेव सूत्रम्, सर्वस्य सूत्रस्य भाष्यकृदनुवादानियमात्[18], नानात्वाभिमानस्य एकत्वे व्यभिचारित्वादिति तस्यार्थ इत्येके।

नव्यास्तु युगपदादिसूत्रमेवं वर्णयन्ति—ननु माऽस्तु बुद्धितत्त्वं माऽस्तु च ज्ञाननित्यत्वे साध्ये समवायादिना प्रत्यभिज्ञानं हेतुस्तादात्म्येन तु स्यात्; न च ज्ञानं वृत्तिरूपं तन्नित्यत्वमपसिद्धान्तस्तेषामिति वाच्यम्, तैर्वृत्तिमता निखिलवृत्तीनामभेदस्वीकारात्, तत्र च भेदो नित्यत्वावच्छिन्नप्रतियोगिताक इत्यत आह—[A]न युगपदिति। एकदा घटपटादिनिखिलज्ञानानामभावान्न तन्नित्यत्वमिति भावः। प्रयोगश्च—इदं ज्ञानं न नित्यम्, तद्धीपूर्ववर्त्तित्वे सति तदसमानकालीनत्वादित्यादिः। अथ सन्त्येव तदापि तानि ज्ञानानि, परन्तु नोपलभ्यन्त इत्यत आह[A]— अप्रत्यभिज्ञान इति। [19]अप्रत्यक्षत्वे चेत्यर्थः। तदितरसकलतत्प्रत्यक्षहेतुसत्त्वे तदधिकरणसमयोत्तरं[20] तदनुपलम्भे तद्विनाशस्यैव

13. ०हितत्वात् C. 14. नीलमपि० A. 15. ०हितो C.
16. ०तेर्धर्मत्वं C. 17. दृष्टेर्भेदं C. 18. ०कृदत्वानियमात् C.
A-A. om. C, a case of haplography. 19. प्रत्यक्षत्वे C.
20. तदधिकरणसमयोत्तरं om. C.

प्रयोजकत्वमिति भावः। ननूक्तं युगपदग्रहणमसिद्धं किन्तु एकत्र एकदा तावज्ज्ञानानामभावः, स च नित्यत्वेऽपि नानुपपन्नः, कदाचिदेव तत्र तस्य [21]वृत्तिस्वीकारादित्याक्षिपति—क्रमेति। कदाचिदेव वृत्तिमत्त्वात्, एकत्रेति शेषः। अपि च सर्वदा तत्र वृत्तिमत्त्वेऽपि न क्षतिः, न चैक-प्रत्यक्षकाले सर्वप्रत्यक्षतापत्तिः, तत्प्रत्यक्षसामग्र्या एव प्रतिबन्धकत्वा-दित्याह—अप्रत्यभिज्ञानञ्चेति। वाऽर्थे चः। उत्तरमाह—नेति। गति-र्गमनं ज्ञापकञ्च। तथा च विद्यमानस्यापि घटादेः स्वाधिकरणे कदाचिद-सत्त्वं युक्तमन्यत्र गमनात्, न तु बुद्धेः, तत्र[22] गत्यभावात्, न [23]वा प्रतिबन्धकत्वम्, तत्र तस्य प्रमाणाभावात्, घटादेरत्यन्ताभावस्येव[24] तेषामपि सामयिकत्वमित्युक्तौ नैष दोष इति तु ध्येयम्। अथ बुद्धिः प्रतिपुरुषमेकैव नित्या, सैव च बुद्धितत्त्वं, तस्याश्चात्मनि सम्बन्धात् 'अहं जानामी'ति धीरुपपन्ना; तत्र च घटादिविषयकत्वमनित्यम्, तदेव च वृत्तिः, सैव चक्षुःसंयोगादिकार्यमिति मतम्; न चैवं घटपटादिविषयकधियां भेदबुद्धेर्नैवमिति वाच्यम्, तस्या धर्मभेदनिबन्धनत्वेन[25] भ्रमत्वादित्याह[26]—स्फटिकेति। [27]अन्यत्वेति। 'अज्ञासि' 'ज्ञास्यामी'त्यादिप्रतीति-सिद्धस्य[28] विनाशित्वादेरप्युपलक्षकम्। वस्तुतो घटविषयत्वांशे तत्रैव पटविषयकत्वेन तद्भेदसत्त्वात्तत्प्रतीतेः प्रमात्वमप्युपपद्यत इति ध्येयम्। दूषयति—नेति। बाधहेतोर्बाधकस्याभावान्न[29] विनाशादिप्रतीतेर्भ्रमत्व-मिति भावः। नव्यास्तु विनाशादेरव्याप्यवृत्तित्वं स्वीकुर्वन्ति, [30]दग्ध-पटादौ 'पटो नष्टः स एवायं पट' इति प्रतीतेः; एवञ्च बुद्धौ लाघवसह-कृतानुमानसिद्धसार्वकालिकत्वरूपनित्यत्वस्य घटविषयकत्वाद्यवच्छेदेन विनाशित्वादेः सत्त्वमस्तु को दोषः; अतएव 'यदेव ज्ञानं घट आसीत्त-

21. वृत्तित्वस्वीकारा॰ C. 22. तस्य add. C. 23. चाप्रति॰ C. 24. ॰भावस्यैव A. 25. ॰निबन्धनसत्वेन C. 26. ॰दित्याशङ्कते A. 27. अन्ये त्विति C. 28. ॰प्रतीतेः सिद्धस्य A. 29. ॰बाधकाभावान्न A. 30. दग्ध॰ C.

देवेदानीं पट' इत्यादिप्रत्यभिज्ञानमुपपद्यत इति वदन्ति। अन्ये तु घटविषयकत्वादीनामतिरिक्तत्वे तदेव ज्ञानमस्तु, किन्तदाश्रयेणैकेन बुद्धिघटादिस्वरूपत्वे च यावत्तत्सत्त्वं घटज्ञानसत्त्वप्रसङ्गः, [31]प्रायश इच्छादिकार्यप्रसङ्गश्च, [32]प्रत्यभिज्ञानञ्चासिद्धमेवेति वदन्ति। घटेन्द्रियसंयोगादिकमेव तद्विषयकत्वम्, तेनैव सम्बन्धेन घटादेर्ज्ञाने सत्त्वम्, स एव सम्बन्धः इच्छादिकार्यप्रयोजक इति तु परो ब्रूते ॥ १० ॥

॥ समाप्तं बुद्धिविनाशित्वप्रकरणम् ॥

सांख्यमतनिराचिकीर्षुणां[1] क्षणिकत्ववादिनां मतं दूषयितुमुपन्यस्यति—

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥ ११ ॥

स्फटिकान्यत्वाभिमानवदित्यनेनाभिहितो न हेतुः, पूर्वपूर्वस्फटिकेऽपि निवृत्तेऽपरापरस्फटिकस्याप्युत्पत्तेः, व्यक्तिमात्रस्यैव क्षणिकत्वात्, व्यक्तित्वेन शरीरवत्तत्र क्षणिकत्वं साधनीयम्, तथा च तत्रापि भेदधीर्न भ्रमः किन्तु प्रमैवेति भावः[2]। दृष्टान्तसाधकं भाष्यम्—"उपचयापचयप्रबन्धदर्शनाच्छरीरेषु"। प्रतिक्षणमित्यभिमानः, उपचयापचयौ पूर्वोत्तरवर्त्तिशरीरपरिमाणयोरधिकाल्पत्वे, प्रबन्धः प्रवाहः। न चैकत्र परिमाणे तयोः सम्भवः, जातिसङ्करापत्तेः, यावत्परिमाणसत्त्वमुभयोपलम्भापत्तेश्च। न चैकत्र परिमाणद्वयम्, यावदाश्रयमुभयोपलम्भापत्तेः; न च तत्रैव पूर्वपरिमाणनाशानन्तरं[3] परिमाणान्तरोत्पत्तिः परिमाणस्याश्रयनाशनाश्यत्वादिति[4] पूर्वपूर्वशरीरनाश उत्तरोत्तरशरीरोत्पाद अवश्याभ्युपेय इति भावः। न च स्फटिकादौ प्रत्यभिज्ञानबाधितं क्षणिकत्वम्, 'तदेवेदं शरीर'मिति प्रत्यभिज्ञानवदुपपत्तेः ॥ ११ ॥

---

31. प्रयोग॰ C. 32. प्रयंत्यभि॰ C.

1. ॰चिकीर्षो A, ॰चिकीर्षोण C. 2. भावः om. A. 3. ॰नाशान्तरं A. 4. ॰श्रयणाशनाष्य॰ A.

दूषयति—

नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ।। १२ ।।

व्यक्तित्वे क्षणिकत्वनियमसाधकप्रमाणाभावात् [5]अभ्यनुज्ञा [6]वक्त्रभेद-प्रत्यभिज्ञा यथादर्शनं यथार्था, शरीरादौ[7] तु बाधकाद्भ्रमत्वम्[8], न चेह बाधकमस्तीति भावः। यद्वा दृष्टान्तमपि दूषयति—नियमेति। शरीरा-दावपि क्षणिकत्वनियामकमानाभावात् पूर्वपरक्षणवर्त्तिनोः प्रत्यभिज्ञा[9] यथार्थेत्यर्थः, शरीरे च प्रतिक्षणमुपचयापचयदर्शनं नास्त्येवेति भावः ।। १२ ।।

दूषणान्तरमाह—

नोत्पत्तिविनाशकारणोपलब्धेः ।। १३ ।।

न स्फटिकादावपरापरोत्पत्तिः, उत्पत्तिविनाशयोः कारणस्य अवयव-तत्संयोगनाशादेरुपलब्धेः प्रसङ्गात्; विनाशकारणानुपलम्भेन तद-भावान्न[10] तदा तन्नाशः, तदभावाच्च न द्रव्यान्तरोत्पत्तिरिति भावः। उत्पत्तिविनाशकारणोपलब्धेरभावादिति सूत्रार्थः। [11]न क्षणभङ्ग इति प्रक्रान्तमेवेति तु परमार्थः ।। १३ ।।

आक्षिपति—

क्षीरविनाशे[12]कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः[13] ।। १४ ।।

अनुपलब्धिर्नाभावसाधिका, अत्रैव तद्व्यभिचारादिति भावः ।। १४ ।।

उत्तरम्—

लिङ्गतो ग्रहणान्नानुपलब्धिः ।। १५ ।।

तत्र क्षीरविनाशादेः प्रमाणसिद्धत्वाद् विनाशित्वादितश्च[14] सकारणकत्व-

---

5. प्रत्यनुज्ञा A. 6. व्यक्त्रभेदे प्रत्य० C. 7. यथार्थशरीरादौ C. 8. ०काद्भ्रमत्वं C. 9. ०भिज्ञाय A. 10. ०भावत्वे C. 11. लक्षणभङ्ग C. 12. ०विनाश A. 13. तदुत्पत्ति C. 14. ०शत्वादेः A.

व्याप्यात्तत्कारणानुमानान्न तदनुपलब्धिः, प्रकृते च विनाशत्वादि न[15] मानसिद्धमिति भावः ॥ १५ ॥

अन्येषां परीहारं दूषयितुमुपन्यस्यति—

न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १६ ॥

न क्षीरस्य नाशो दध्नश्चोत्पत्तिः किन्तु क्षीर एव [16]परिणामनाम-गुणान्तरस्य विशेषादेः प्रादुर्भावादुत्पादात् ॥ १६ ॥

दूषयति—

व्यूहान्तरद्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १७ ॥

व्यूहान्तरात् रसविशेषवत्परमाण्वारब्धद्व्यणुकादितो[17]या द्रव्यान्तरोत्-पत्तिस्तद्दर्शनं[18] 'दधि समुत्पन्न'मिति प्रत्यक्षं पूर्वद्रव्यनाशानुमितेः[19] कारणम्, द्रव्यवति द्रव्यानुत्पत्तेरिति भावः ॥ १७ ॥

अथ कारणे सति कार्यमिति नियमात् प्रतियोगिनश्च [20]विनाशकारण-त्वात् क्षणभङ्गः सिद्ध्यतीत्यत आह—

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ १८ ॥

विनाशकारणे प्रतियोगिनि सत्यपि क्वचिद्विनाशस्यानुपलब्धेस्तस्मिन् सति तस्य क्वचिच्चोपलब्धेरनेकान्तः साध्यतदभाववद्वृत्तित्वम्[21], तथा चोक्तनियमो[22] नास्तीति भावः। भाष्याद्यनुयायिनस्तु—पूर्वापरक्षण-वृत्तिद्रव्ययोर्विनाशित्वोत्पत्तिमत्त्वाभ्याम्[23] [24]अनुपलब्धविताशोत्-पत्तिहेतुमत्त्वं सिषाधयिषुराशङ्कते—क्षीरेति। तत्र दृष्टान्तासिद्धिर-

---

15. ॰शादिना A, ॰शादि न C. 16. परिणामनाय C. 17-18. योद्रव्या॰ A, जातं यद्रव्यान्तरं तदुत्पतिदर्शनं C. 19. ॰मितः C. 20. विनाश॰ om. C. 21. ॰वृत्तिः A, 22. चोक्तो नियमो A. 23. ॰द्रव्ययोरिव विनाशि॰ A. ॰द्रव्ययोर्विना विनाशोतपत्ति॰ C. 24. अनुपलब्धि॰ C.

भिहिता—लिङ्गत इति । अभ्युपेत्य दृष्टान्ते साध्यव्यभिचारमाह[25]—क्वचिदितीति प्राहुः ।

अत्र वदन्ति—कारणसत्त्वस्यैव लाघवेन कार्योत्पत्तिप्रयोजकत्वम्, न तु यावत्कारणरूपसामग्रीसत्त्वस्य, गौरवात्, एवञ्चोत्पत्तिक्षणे ^A^प्रतियोगिरूपकारणसत्त्वाद् द्वितीय एव क्षणे^A^ कार्यं नश्यतीति सिद्धम् ; जगत एव सतः क्षणिकत्वेन प्रतियोगीतरस्य विनाशाहेतुत्वादेव च[26] सर्वदा तन्नाशोत्पत्तिः । न च नित्यस्य क्षणिकत्वाभावान्न जगतः क्षणिकत्वम्, अतीन्द्रिये गगनादौ अनुगते च जात्यादौ मानाभावात्, अनुगतप्रत्ययस्य च गगनारविन्दकुक्षिनिःक्षिप्तत्वात्, पुरुषः पुनरालय-विज्ञानसन्तान एवेति न तस्यापि नित्यस्यावसरः ।

अत्रोच्यते—कार्योत्पत्तिप्रयोजकत्वं कार्योत्पत्तिव्याप्यत्वम्, तच्च सामग्र्या उभयसिद्धमेव, किं तत्र गौरवेण[27] ; सामग्रीत्वं न व्याप्यताव-च्छेदकं गौरवादिति चेत्, किमेतावता, तत्त्वस्यानवच्छेदकत्वेऽपि तत्र व्याप्यतासत्त्वात्, यद्धर्मविशिष्टव्यापकत्वं साध्यस्य तत्त्वस्यानवच्छेद-कत्वेऽपि तत्र व्याप्यतासत्त्वात्, प्रत्युत कारणसत्त्वस्यैव[28] व्याप्यतायां मानाभावः । अथ [29]सामग्रीव्याप्यत्वमेव कारणमात्रस्य व्याप्यत्वे पर्यव-स्यति, तथा हि विनाशं प्रति प्रतियोगिनः कारणत्वं तावदुभयसिद्धम्, तथा च तदितरस्य[30] कारणत्वं न कल्प्यते, मानाभावाद् गौरवाच्चेति चेन्न, विनिगमकाभावेन प्रतियोगिसमानकालीनयावत्क्षणानामेव हेतुता-पत्तेर्महागौरवग्राहग्रस्तत्वात्, अस्त्येव सर्वेषां हेतुत्वं किन्तु तत्क्षणवृत्तित्वेन, तथाप्येकस्यैव कारणतावच्छेदकत्वाल्लाघवमिति चेन्न, विनिगमका-भावेन [31]प्रतियोगिसमानकालीनसर्वक्षणानामेवावच्छेदकतापत्तेः ।

---

25. दृष्टान्ते साध्यं प्रतियोगिवत्पकारणोपलम्भादेव व्यभिचार० A. A—A. om. C. A case of haplography. 26. Both A and C read न after this, which does not fit the context. 27. गौर्वेण A. 28. कारणत्वस्यैव C. 29. सामग्र्या० C. 30. भ्रमितरस्य C. 31. प्रतियोगिसमानकालीन० om. C.

अथ प्रतियोग्यनुयोगिभावसम्बन्धेन सत्त्वेन नाशत्वेन हेतुहेतुमद्भावाद्विश्वस्यैव क्षणिकत्वम्, अतएव नित्यमात्रस्यैव निरासः, अतएव क्षणिकानन्तपदार्थकल्पने गौरवमपि न दोषाय फलमुखत्वात्; अतएव च प्रत्यभिज्ञाया भ्रमत्वं[32] तज्जातीयतावलम्बनत्वं वाऽभ्युपेयते; नाशश्चातिरिक्तोऽवान्तर उत्तरक्षणो[33] वेत्यन्यदेतत्, अतएव बीजादिकं विनाऽपि [34]क्षणिकाङ्कुरपरम्परानिष्पत्तेरङ्कुरत्वाद्यवच्छिन्नं प्रति बीजत्वादिना न हेतुत्वं किन्तु अङ्कुरादिकुर्वद्रूपेणेति कुर्वद्रूपसिद्धिरपि। तदयं प्रयोगः[35]—यद्यतत्क्षणपूर्ववर्त्ति [36]तत्तत्क्षणवृत्तिध्वंसप्रतियोगिमद्वत्, [37]यदेतत्क्षणपूर्ववर्त्ति तदेतत्क्षणवृत्तिध्वंसप्रतियोगिमद्वदिति वा, एतत्क्षणपूर्ववर्त्तिनश्च एतदव्यवहितपूर्वक्षणवर्त्तिन इति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नांशतः सिद्धसाधनं दोषायेति चेत्।

अत्र ब्रूमः[38]—प्रतियोग्यनुयोगिभावस्य[39] तत्तत्स्वरूपत्वेनाननुगमात्[40] तत्तद्व्यक्तिमात्रविश्रान्तः कार्यकारणभावः, तथा च गतं गगनादीनां बिनाशित्वप्रत्याशया, आपतितश्च विनिगमकाभावेन सर्वक्षणानां हेतुत्वं तदवच्छेदकत्वश्चेति महीयसा गौरवेण, तथा च तत्तद्व्यक्तिनाशं प्रति मुद्गरपाताद्यनन्तरवर्त्तिसमवायिनाशादेव [41]तत्तद्व्यक्तित्वेन हेतुता प्रत्यभिज्ञाद्यविरोधसम्पादिनी विरोधिनी[42] च कुतर्कपरिकल्पिताप्रामाणिकानन्तसन्तानानामुचितेति [43]गतं क्षणभङ्गेन। अथैवं खण्डपटादिकमुच्छिद्यतामिति चेदुच्छिद्यत[44] एव यदि तत्र न बलवत् प्रमाणं स्यादिति संक्षेपः ॥ १८ ॥

॥ समाप्तं क्षणभङ्गभञ्जनप्रकरणम् ॥

---

32. सत्यं C. 33. ०रिक्तो वा यावन्त उत्तरक्षणा C. 34. ०परम्परा० om. C. 35. यद्यतत्क्षण० C. 36. तत्तत्क्षण० om. C. 37. यदेतदत्० C. 38. वदन्ति A. 39. ०योग्यनुयोग्यनुयोगि० C. 40. ०त्वेननुगमोत् C. 41. तत्० om. A. 42. ह्लादिनी C. 43. ०गतिक्षाभङ्गेन A. 44. चेन्न छिद्यत C.

इदानीं विशेषतो बुद्धेरात्मगुणत्वं व्यवस्थापनीयम् । तत्र बुद्धिरिन्द्रियगुणस्तत्सन्निकर्षजत्वात्तद्विभागवदित्येके । [1]बुद्धिरर्थगुणस्तत्सन्निधिजत्वात्तद्विभागवदित्याहुरपरे । तत्प्रतिषेधकं सूत्रम्—

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ॥ १६ ॥

बुद्धिर्नेन्द्रियगुणः नाप्यर्थगुणस्तन्नाशोत्तरवर्त्तित्वादित्यर्थः । यद् वा—तद्विनाशेऽपि तत्समानाधिकरणसंस्कारस्मृत्यवस्थानात्, तन्नाशोत्तरवर्त्तिगुणसमानाधिकरणैकमात्रसमवेतत्वन्तु हेतुरिति ; समवायिनाशे [2]समवेतनाशस्यावश्यकत्वादिति भावः । उक्तश्चाप्रयोजकमिति हृदयम् ॥ १६ ॥

तर्हि मनसो गुणो भवत्वित्यत आह—

युगपज्ज्ञेयानुपलब्धेश्च न मनसः ॥ २० ॥

[3]सुखाद्युपलब्धिकरणत्वेनाभिमतस्य मनसो बुद्ध्यादिगुणत्वे तस्य चैकदा शिरश्चरणाद्यवच्छेदेन सुखदुःखाश्रयतया नानाशरीरावच्छेदेन योगिज्ञानाश्रयतया वाऽनणुत्वाद् युगपद्गन्धरसादिसाक्षात्कारः स्यात्, न चैवमित्यर्थत्वान्मनो न बुद्धिगुणमिति भावः । चेति । [4]अणुतया सिद्धस्येति शेषः ॥ २० ॥

आक्षिपति—

तदात्मगुणत्वेऽपि तुल्यम् ॥ २१ ॥

तस्या बुद्धेः तुल्यं युगपज्ज्ञानापादनमिति ॥ २१ ॥

उत्तरम्—

सन्निकर्षाभावात्तदनुत्पत्तिः ॥ २२ ॥

[5]इन्द्रिये मनस इत्यादिः । तस्य नानाज्ञानस्य युगपत् अनुत्पत्तिः ॥ २२ ॥

---

1. ०स्तत्सन्निकर्षज० C. 2. समवेतसन्नाश० C. 3. अर्थाद्युप० A.
4. अनुभयासिद्ध० A. 5. इन्द्रियमनस C.

नन्वेकधीसामग्र्या अपरप्रतिबन्धाच्च[6] युगपदुत्पत्तिरित्यत्राह—

नोत्पत्तिकारणानपदेशात्[7] ॥ २३ ॥

ततस्तदनुत्पत्तिरिति न, एकोत्पत्तिकारणसमूहस्यापरं प्रति गौरवेणानपदेशात् अप्रतिबन्धकत्वात्। यद्वा—नन्विन्द्रियमनःसंयोगविरहे एकविधमपि [8]घ्राणजादिज्ञानं नोत्पद्येत इत्यत आह—नेति। [9]तन्नोत्पद्येत इति न, यदुत्पद्यते तदुत्पत्तिकारणस्य इन्द्रियस्य [10]मनसाऽपरित्यागादित्यर्थः। आत्मेन्द्रियसन्निकर्षः मनोऽवच्छिन्नात्मेन्द्रियसन्निकर्षो वा हेतुरिति कश्चिदाह; तन्मतं दूषयति—नेति; स न हेतुः [11]कारणताग्राहकमानाभावादिति तु भाष्यानुयायिनी[12] व्याख्या ॥ २३ ॥

आक्षिपति—

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २४ ॥

आत्मनि ज्ञानावस्थाने च विनाशकारणस्याश्रयनाशादेरनुपलब्धेस्तन्नित्यत्वप्रसङ्ग इत्यर्थः ॥ २४ ॥

उत्तरम्—

अनित्यत्वग्रहणाद्बुद्धेः बुद्ध्यन्तराद्विनाशः शब्दवत् ॥ २५ ॥

बुद्धेरनित्यत्वेनैव ध्वंसेनैव तत्कारणस्य ग्रहणादनुमानाच्च तदनुपलब्धिरिति शेषः। विशिष्य तदाह—बुद्धेरिति। बुद्धीति [C]स्वोत्तरोत्पन्नोपलक्षकम्, अतएव चरमबुद्धिः कालात् संस्काराद्वा नश्यतीति वार्त्तिककृतः। विशेषगुणस्य[C] स्वोत्तरोत्पत्तिकसमानाधिकरणविशेषगुणनाश्यत्वे दृष्टान्तमाह—शब्दवदिति ॥ २५ ॥

---

6. ०बन्धार्थं C. 7. ०नुपदेशात् C. 8. घ्राणजाति० A 9. तन्नोत्० C. 10. मनसा० om. C. 11. कारता० C. 12. भाष्यार्थयायिनी C. C–C. om. A. A case of haplography.

ननु नानासंस्कारसत्त्वात् स्मृतिरूपज्ञानयौगपद्यम्, एकविषयस्मरणकालेऽनभिमतस्मरणम्वा[13] भवतोऽपि[14] दुर्वारम्; अत्र कस्यचित् समाधानं दूषयितुमुपन्यस्यति—

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ।। २६ ।।

ज्ञायतेऽनेनेति ज्ञानं संस्कारः समवेतो यत्र तस्मिन्नपि तत्तत्संस्कारविशिष्टेऽपि आत्मनि मनसः प्रदेशसन्निकर्षाद् विषयावच्छेदेन सन्निकर्षादेव स्मृत्युत्पत्तेर्न युगपत् स्मरणोत्पत्तिः ।। २६ ।।

दूषयति—

नान्तःशरीरवृत्तित्वान्मनसः ।। २७ ।।

अन्तःशरीर एव वृत्तिर्व्यापारो जनकीभूतसंयोगो यस्य तत्त्वात्; शरीरावच्छिन्नस्यात्ममनोयोगस्यैव ज्ञानादिजनकत्वान्न तु घटाद्यवच्छिन्नस्येति भावः ।। २७ ।।

आक्षिपति—

साध्यत्वादहेतुः ।। २८ ।।

शरीरावच्छिन्नात्ममनोयोगो न [15]ज्ञानहेतुः, साध्यत्वादसिद्धत्वात्, मानाभावादिति यावत् ।। २८ ।।

उत्तरम्—

स्मरतः शरीरधारणोपपत्ते[16]रप्रतिषेधः ।। २९ ।।

इतरथा मनसः शरीरबहिर्भावे शरीरावच्छिन्नात्ममनोयोगाभावेन धारकप्रयत्नानुत्पादात् शरीरधारणानुपपत्तिः[17] स्यादिति भावः ।। २९ ।।

---

13. ०स्मरणता C.   14. ०अपि om. A.   15. कालहेतुः C.
16. ०धारणोत्पत्ते० A. 17. ०धारणानुत्पत्तिः A.

आक्षिपति—

न तदाशुगतित्वान्मनसः ॥ ३० ॥

तच्छरीराधारणं न, मनस आशुगतित्वात्; शीघ्रमेव मनः शरीर आयातीति भावः ॥ ३० ॥

उत्तरम्—

न स्मरणकालानियमात् ॥ ३१ ॥

तन्नेति[18]। न [19]विलम्ब्य शीघ्रम्वा[20] स्मरणमित्यस्य स्मरणधारा एकमेव वा[21] स्मरणमित्यस्य वा कालनियमाभावात्। विलम्ब्य स्मरणे स्मरणधारायाम्वा शरीरधारणं न स्यादिति भाव इति सम्प्रदायः। स्मरणकाल एव शरीरधारणनियमाभावप्रसङ्गात्, बहिःसंयोगसमय एव धारकप्रयत्ननाशात्, विना च क्रियादिकं संयोगानुत्पत्तेश्चेति तु नव्याः ॥ ३१ ॥

कस्यचिद्दूषणं दूषयितुमुपन्यस्यति—

आत्मप्रेरणयदृच्छाज्ञताभिश्च[22] न संयोगविशेषः ॥ ३२ ॥

आत्मनि प्रयत्नेच्छाज्ञानैश्च सामान्यकारणैर्न संयोगविशेषः, न शरीराद्बहिः केनचिदेव संयोगोऽविशेषादन्येनापि संयोगापत्तेरिति भावः ॥ ३२ ॥

दूषयति—

व्यासक्तमनसः पादव्यथनेन[23] संयोगविशेषेण समानम् ॥ ३३ ॥

अन्यत्र व्यासक्तमनसः [24]पादव्यथाया ज्ञापकेन जनकेन वा संयोगेन समानमेतत्[25]। यथा सामान्यकारणसत्त्वेऽपि [26]विशिष्य कार्यकारण-

---

18. तद्वेति A. 19-20. विलक्षणशीघ्रत्वा A. 21. चा० A.
22. ०ज्ञाताभिश्च A. 23. ०व्यथन A. 24. ०व्यथया A, ०व्यथन C.
25. समाना स तत् C. 26. विशिष्ट० A.

भावात्तत्र संयोगविशेषस्तथा प्रकृतेऽपीति भावः। यत्तु—तत्तद्विषयक-संस्कारावच्छिन्नमनोयोगस्य तत्तद्विषयकस्मृतिहेतुत्वात् स्मरणानुत्पत्ति-दशायाश्च तादृशमनोयोगे मानाभावाद् युगपदस्मरणमिति[27], तन्न, संस्कारस्य तदवच्छेदकत्वे मानाभावात् ॥ ३३ ॥

स्वयं युगपद्ग्रहणप्रसङ्गं निराकरोति—

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्युगपदस्मरणम् ॥ ३४ ॥

स्मृतिकारणानामुद्बोधकतया प्रसिद्धानामर्थज्ञानेच्छादीनां सामानाधि-करण्यप्रत्यासत्त्या [28]हेतुहेतुमद्भावादिच्छादीनां ज्ञानव्यापकत्वमुभय-सिद्धम्[29], तेषाञ्च मनोगुणत्वादात्मनि तन्निवृत्त्या ज्ञाननिवृत्तिरिति[30] मतम् ॥ ३४ ॥

तन्निराकरणायेच्छादीनामात्मगुणत्वं व्यवस्थापयति सूत्रकार :—

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३५ ॥

ज्ञस्य आत्मन इच्छादयो गुणाः, प्रवृत्तिनिवृत्त्योरात्मगुणयोः सामानाधि-करण्येनेच्छाद्वेषहेतुकत्वात्। प्रयोगश्च—आत्मा इच्छावान् प्रवृत्तिमत्त्वात्, द्वेषवान्निवृत्तिमत्त्वादित्यादिः ॥ ३५ ॥

प्रवृत्तिनिवृत्ती स्पन्दरूपाविति मत्वा भूतचैतन्यवादी शङ्कते—

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥ ३६ ॥

प्रवृत्तिनिवृत्तिरूपलिङ्गवत्त्वात् पार्थिवाद्येषु शरीरेषु[31] (इच्छाद्वेषयोः प्रतिषेधो नेत्यर्थः) ॥ ३६ ॥

---

27. ०इति om. A. 28-29. हेतुहेतुमद्भावसत्त्वादसति बाधके द्वयः सहचाराज्ज्ञानव्यापक० A. 30. After this, A reads भावः in excess. 31. शरीरेच्छा C.

प्रतिबन्दिमाह—

परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३७ ॥

तत्रापि तौ स्यातामिति शेषः। व्यभिचारमाह—परश्वेतीति तत्त्वम् ॥ ३७ ॥

किं तर्हि तत्त्वमित्यत आह—

नियमानियमौ तु[32] तद्विशेषकौ ॥ ३८ ॥

यत्नात्मकप्रवृत्त्यादौ नियमः स्पन्दरूपेऽनियमः तौ तयोरात्मशरीराद्यो-र्विशेषकौ इच्छादितदभावसम्पादकौ। यद् वा—[33]प्रवृत्त्यादिवत्त्वं देहेष्ववच्छेदकताख्यसम्बन्धेन[34] [35]परश्वादिषु विषयतयाभिप्रेतं सूत्राद्यार्थाक्षेपः[36]—नियमानियमेति[37]। केनचित् सम्बन्धेन नियमः केनचिच्चानियम इत्यर्थः[38] ॥ ३८ ॥

इच्छादिर्नात्मगुण [39]अद्विष्ठमनोगुणत्वादिति [40]निराकर्तुं तेषां मनो-गुणत्वाभावं व्यवस्थापयति—

यथोक्तहेतुत्वात् पारतन्त्र्यात् स्वकृताभ्यागमाच्च न मनसः ॥ ३९ ॥

यथोक्तहेतुत्वात्[41] इच्छाद्वेषयोः सामानाधिकरण्येन यत्नहेतुत्वम्, तस्माद् यत्नाभावादिच्छादेरभावः साधनीय इति भावः। पारतन्त्र्यादज्ञत्वात्[42] इच्छादौ ज्ञानस्य सामानाधिकरण्येन हेतुत्वादज्ञत्वात्तत्र तयोरभाव इति भावः। मनस्येव[43] कथं न प्रवृत्त्यादीत्यत आह—स्वकृताभ्यागमेति। मनसः कर्तृत्वे [44]तत्र स्वकृतफलस्य सुखादेः प्रसङ्गाच्चेत्यर्थः। [45]कृति-फलयोः सामानाधिकरण्येन हेतुत्वादिति भावः ॥ ३९ ॥

---

32. तु om. C. 33. भूतपूर्वद्वये प्रवृत्त्यादि० A. 34. ०दकाख्यसम्बन्धेन A. 35. परश्वादिविषय० C. 36. सूत्राद्यास्वाक्षेप C. 37. नियमानियमेति om. C. 38. इत्यर्थः om. C. 39. अन्विष्ट० A, वन्निष्ठ० C. 40. नित्यकर्त्तुं C. 41. यथोक्तात् हेतुत्वं A. यथोक्तं हेतुत्वं C. 42. ०अकृत्वात् A. 43. मनस्यैव C. 44. तत्त्व तत्र C. 45. कृतिः फलयोः A.

तेषामात्मगुणत्वे प्रमाणान्तरमाह्—

परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४० ॥

इच्छादिकमात्मगुणः [46]परिशेषात् तदन्यागुणत्वे सति गुणत्वात्, यथोक्तानां हेतूनामुपपत्तिस्तर्कः, 'अहमिच्छामी'त्यादिप्रकृत्येत्यर्थः[47][?]। तस्माच्च यथोक्तानां हेतूनां "दर्शनस्पर्शनाभ्यामि"त्याद्यभिहितहेतूनामुपपत्तेरप्रतिषेधादिति[48] वाऽर्थः ॥ ४० ॥

ननु तथापि निखिलज्ञानस्य नात्मगुणत्वं स्मृतेस्तद्गुणत्वे मानाभावादिति तत्र मानमाह्—

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥ ४१ ॥

ज्ञोऽनुभववति स्वाभाव्यं वृत्तिर्यस्य[49] तत्त्वात् अनुभवसमानाधिकरणत्वात्। यद् वा स्मरणन्त्वात्मन इति 'पर्वते वह्नि'रिति साध्यविशेष्यकानुमितेराकारः, जन्यानुभवत्वादिति[50] हेत्वर्थः ॥ ४१ ॥

ननु के तावत् प्रणिधानादय[51] इत्यत आह्—

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ ४२ ॥

स्मरणमित्यनुषज्यते। प्रणिधानं विषयसन्निकृष्टेन्द्रियेभ्य आकृष्य मनोधारणं सुस्मुर्षया मनःसंयोगविशेषः, यस्यार्थस्य विशेषाः सुस्मुर्षितास्तदनुचिन्तनप्रयत्नो वा[52]। निबन्ध एकग्रन्थनिबन्धनम्, स्वप्रतिपादकसमभिव्याहृतप्रतिपाद्यतया गृहीतस्य संस्मारकमिति भावः। अभ्यासः संस्कारबाहुल्यम्। [53]लिङ्गं तद्व्याप्यलक्षणं तदितरव्यावर्त्तकम्।

---

46. पारिशेष्यात् C. 47. ०त्यादिप्रत्यक्षे C. 48. ०पत्तेः प्रतिषेधा० C. 49. वृत्तिद्वयस्य C. 50. ०राकारजन्यानुभव० C. 51. This refers to न्यायसूत्र ३।२।३४ : प्रणिधानलिङ्गादि० etc. 52. बाधा A. 53. गं तत्वाप्यलक्षणं C.

साद्दश्यं तद्वृत्तिधर्मसजातीयधर्मादिः, एतस्य [54]एतद्वत्तया गृहीतान्यतरधीः[55] स्मृतिहेतुः, एवमिवान्यत्र। परिग्रहः स्वस्वामिभावः। आश्रयाश्रितौ तथा गृहीताश्रिताश्रययोः[56] स्मारकौ। सम्बन्ध उक्तातिरिक्तः शिष्यगुरुभावादिः। विरोधान्ता स्पष्टार्थाः। अतिशय उत्कर्षः येनातिशय उत्पादितस्तस्य स्मारकः, प्राप्तिः प्रतिगृहीतादि दातुः, व्यवधानं खड्गादीनां कोषादिः, [57]सुखदुःखे तज्जन्यतया गृहीतस्य, इच्छाद्वेषौ[58] तद्विषयकतया गृहीतौ तस्य, भयं तत्धेतोः। [59]अर्थित्वमिति दातृप्रार्थकयोः सम्बन्धकथनम्, प्रार्थकदर्शनाद्दातृस्मरणमिति [A]भावः। क्रिया रथादि रथकारादेः, रागो यत्र तस्य, धर्माधर्मौ[60*] प्रागनुभूतसुखदुःखसाधनयोः, निमित्तं क्षणादि। पञ्चमी प्रयोज्यत्वे, तच्च प्रणिधानाभ्यासधर्माधर्मनिमित्तानां[61*] हेतुतयाऽन्येषां ज्ञानविषयत्वेन हेतुतावच्छेदकतया निर्वहतीति[A] भावः ॥ ४२ ॥

॥ समाप्तं बुद्ध्यात्मगुणत्वपरीक्षाप्रकरणम् ॥

इदानीं बुद्धेरुत्पन्नापवर्गित्वस्य [1]तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वरूपस्य व्यवस्थापनाय सूत्रम्—

कर्मानवस्थायिग्रहणात् ॥ ४३ ॥

कर्मविशेष इव[2] ज्ञानमनवस्थायि उत्पन्नापवर्गि[3], द्वितीयतृतीयक्षणयोरेव ग्रहणात्, चतुर्थक्षणविनाशित्वेन ग्रहणाद् वा[4]। अनवस्थायित्वं पञ्चमक्षणवृत्तिराश्रयसमकालीनो वा यो नाशस्तत्प्रतियोगित्वमित्यपरे ॥ ४३ ॥

---

54. तद्वत्तया C. 55. गृहीतस्य धीः C. 56. गृहीतादि आश्रययोः C. 57. सुखदुःखतज्जन्य० C. 58. ०द्वेसौ C. 59. अर्थित्वं सम्बन्धः प्रत्येकदर्शनाद्० C. A—A. om. C, a case of haplography. 60. धर्मधर्मौ A. 61. ०धर्माधर्मानां निमित्ता A.

1. ०क्षणवर्त्ति० C. 2. Writing effaced in A. 3. ०पराज्ञ A. 4. ग्रहणत्वो C. A—A. om. C. A case of haplography.

आक्षिपति—

अव्यक्तग्रहणमनवस्थामित्याद् विद्युत्सस्पाते रूपाव्यक्तग्रहणवत् ॥ ४४ ॥

अव्यक्तग्रहणमिति । वुद्धेः स्यादिति शेषः । व्यक्तग्रहणस्य जातिमत्तया लौकिकप्रत्यक्षत्वस्याभावो[A] वुद्धेरनवस्थायित्वे[5] स्यादित्यर्थः । रूपाव्यक्त-ग्रहणमस्फुटरूपग्रहणम । उक्तप्रत्यक्षाविषयं रूपग्रहणमिति भावः[A] । [6]द्वितीयक्षणे ज्ञानत्वादेर्निर्विकल्पकस्यैवोत्पत्तेः, तृतीये च विषयस्य नाशात्, विषयस्य च कार्यसहवर्त्तित्वेनैव हेतुत्वात् । स्मर्यते च—

"सम्वद्धं वर्त्तमानश्च गृह्यते चक्षुरादिना" ।

(श्लोकवार्त्तिक, प्रत्यक्ष ८४)

व्यक्तग्रहणेन [7]चावस्थायित्वं बुद्धेः साधनीयमिति भावः ॥ ४४ ॥

उत्तरम्—

हेतूपादानात् प्रतिषेध्यव्याभ्यनुज्ञा ॥ ४५ ॥

[8]अनवस्थायित्वस्य हेतोरापादकस्य रूपाव्यक्तग्रहणे स्वीकारात्[9] पक्षे प्रतिषेध्यव्यस्यानवस्थायित्वस्याभ्यनुज्ञा, तता चांशतो[10] वाध इति भावः ॥ ४५ ॥

तथापि पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिः स्यादित्यत आह-

प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥ ४६ ॥

आशुविनाशिनीनामप्यासां व्यक्तग्रहणवद्वुद्धीनामपि व्यक्तग्रहणमिति भावः। मानाभावेन न विषयस्य कार्यसदभावेन हेतुत्वम्, उक्तस्मृतौ च "वर्त्तमानम्" इति पूर्वक्षणे इति शेषः ॥ ४६ ॥

॥ समाप्तं वुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ॥

A-A in A only. 5. वृक्षेरन' A. 6. 'क्षणज्ञानत्वेर्निवि' C. 7. चा' om. A. 8. तानव' C. 9. 'ग्रहणस्वीकारात् A. 10. 'च शरो C.

अथ बुद्धेर्देहगुणान्यत्वं[1] परीक्षणीयम् । तत्र संशयसूत्रम्—

द्रव्ये परगुणोपलब्धेः संशयः ॥ ४७ ॥

बुद्धिः शरीरगुणो [2]न वेत्याकारः । शरीरोपलभ्यमानत्वं साधारणो धर्मः । अस्ति च 'स्निग्धं[3] शरीरमुष्णं[4] शरीरमि'त्यादि च[5] गुणप्रत्ययः, 'चैत्रो जानाति गौरो जानाती'त्यादि प्रत्ययश्च । तत्र [6]बुद्धिर्न शरीरगुणः, विशेषगुणत्वे सति शरीरविशेषगुणान्यत्वात् । न चेदमसिद्धम्, बुद्धिर्न [7]शरीरविशेषगुणः अयावद्द्रव्यभावित्वादित्यनुमानात्तत्सिद्धेः, तच्च [8]स्वाश्रयसमानकालीनध्वंसप्रतियोगित्वमस्तु[9] ॥ ४७ ॥

व्यतिरेकव्याप्तमाह—

यावच्छरीरभावित्वाद्रूपादीनाम् ॥ ४८ ॥

स्वाश्रयसमानकालीनध्वंसाप्रतियोगित्वात्[10] शरीरविशेषगुणानामित्यर्थः ॥ ४८ ॥

आक्षिपति—

न पाकजान्तरगुणोत्पत्तेः ॥ ४९ ॥

नोक्तनियमोऽस्ति, शरीरे[11] पूर्वरूपादिगुणनाशेन पाकजरूपाद्युत्पत्तेः, तथा च पाकनाश्यरूपादौ व्यभिचार इति भावः ॥ ४९ ॥

उत्तरम्—

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५० ॥

पाकजानामुत्पत्त्या व्याप्तेः प्रतिषेधो न, प्रतिद्वन्द्विनो व्यभिचारवारकविशेषणस्य[12] पाकनाश्यत्वस्य सत्त्वात् । यद् वा[13] पूर्वरूपादिषु पाकजानां

---

1. 'गुणत्वं C. 2. नैवेद्यकारः C. 3. सन्दिग्धं A. 4. 'उष्णं om. C. 5. च om. C. 6. तत्र om. C. 7. तच्छरीर' C. 8. तच्छरीरसमान' C. 9. मित्यमत्र C. 10. स्वाश्रय...गित्वात् om. C. 11. शरीरेषु A. 12. 'वारक' om. C. 13. यद् वा om. A.

प्रतिद्वन्द्वित्वस्य विरोधितस्य सत्त्वादित्यर्थः[14]। तथा च पाकजाविरोधित्वं[15] हेतुविशेषणमिति भावः।

पाकनाश्ये व्यभिचारं निरस्यति—न पाकजेति। पाकनाश्येषु[16] न व्यभिचारः, रूपादिनाशानन्तरं तदधिकरणे सजातीयपाकजगुणस्यावश्योत्पत्तिः,[17] तथा च [18]स्वसमानाधिकरणस्वसमानजातीयवद्यावत्स्वाश्रयव्याप्यक्षणातिरिक्त-कालोपाधिकत्वरूपयावद्द्रव्यभावित्वमेव तत्रास्तीति न व्यभिचार इति भावः। इतोऽपि[19] न व्यभिचार इत्याद-प्रतिद्वन्द्वीति। पूर्वरूपादिषु पाकजानां प्रतिद्वन्द्वित्वस्य सत्त्वान्नियमप्रतिषेधो नेत्यर्थः। पाकजाविरोधित्वं पाकजजनकीभूतनाशाप्रतियोगित्वरूपं विशेषणं तत्र नास्तोति न व्यभिचार इति भाव इति[20] भाष्यानुसारी पन्थाः ॥ ५० ॥

हेत्वन्तरमाह-

शरीरव्यापित्वात् ॥ ५१ ॥

शरीरविशेषगुणानाम्[21] [22]आश्रययावदवयवावच्छेद्यत्वात्, बुद्धिश्च न तथेति न सा शरीरविशेषगुण इति भावः ॥ ५२ ॥

आक्षिपति-

न केशनखादिष्वनुपलब्धेः ॥ ५२ ॥

न व्याप्तिरत्र, एषु शरीरावयवेषु शरीररूपादीनामनुपलब्धेरभावात्। तथा त्त व्यभिचार इति भावः ॥ ५२ ॥

उत्तरम्-

त्वक्पर्यन्तत्वाच्छरीरस्य नखादिष्वप्रसङ्गः ॥ ५३ ॥

शरीरावयवत्वस्य न प्रसङ्गः।

---

14. सत्वादितिरर्थः A, सत्त्वादिर्ति वाऽर्थः C. 15. पाकजविरोधित्वं A. 16. 'नाशेषु A. 17. पत्रः C. 18. 'जातीयस्वाश्रयाधिकरणक्षणा' C. 19. इतश्च C. 20. इति भाव om. A. 21. इति शेषः add. C. 22. तच्छरीरयावद' C.

अन्ये तु– बुद्धिर्न तच्छरीरगुणः, [23]तच्छरीरव्यापित्वात्, तच्च तच्छरीर-यावदवयवतच्छरीरयोरेकजारीयसम्बन्धेन[25] वर्त्तमानत्वम्, तेन तच्छरीर-समवेते तदीययावदवयवावच्छिन्ने तदीयरूपादौ न व्यभिचारः, तत्तदीया वयवद्वित्ववारणाय यावदिति, वहुत्वान्यत्वेन च[26] विशेषान्न तद्विशेषे व्यभिचारः, स्वरूपासिद्धिमाशङ्कते[27] न केशेति ; उत्तरम्— त्वगितीत्याहुः[28] ॥ ५३ ॥

हेत्वन्तरमाह-

शरीरगुणवैधर्म्यात् ॥ ५४ ॥

बुद्धिर्न शरीरगुण इति प्रकृतम्[29], तद्वैधर्म्यञ्च[30] अनित्येन्द्रियाग्राह्यत्वे सति ग्राह्यत्वम् ॥ ५४ ॥

आशयमविद्वानाशङ्कते--

न रूपादीनामितरेतरवैधर्म्यात् ॥ ५५ ॥

उक्तनियमो नास्ति, शरीरगुणानामपि रूपादीनां परस्परवैधर्म्यादित्यर्थः ॥ ५५ ॥

[31]आशयमुद्घाटयति--

ऐन्द्रियकत्वाद् रूपादीनामप्रतिषेधः ॥ ५६ ॥

अयं प्रतिषेधो न, ऐन्द्रियकत्वादनित्येन्द्रियग्राह्यत्वात् (रूपादीनाम्), ग्राह्यत्वसहितस्तदभावो हेतूकृतः[32], स च तत्र नास्तीति भावः ॥ ५६ ॥

॥ समाप्तं बुद्धेः[33] शरीरगुणभेदपरीक्षप्रकरणम् ॥

---

23. तत् om. C, 24. तथा च C. 25. 'तच्छरीरमेवैकजातीय' C. 26. च om. A. 27-28. स्वरूपासिद्धि आशङ्कते न केशेष्वित्याहुः C. 29. शरीरगुणात् C. 30. तद्वैधर्म्यञ्च om. A. 31. आश्रय' A. 32. हेत्वकृतः C.

अथ मनःपरीक्षा। तत्र प्रतिशरीरमेकमनेकं[1] वा मन इति विचारे सूत्रम्—

ज्ञानायौगपद्यादेकं मनः ॥ ५७ ॥

प्रतिशरीरमेकं मनः, नानेत्वे नानामनसा[2] नानेन्द्रियसंयोगाद् घ्राणजचाक्षुषाद्योर्युगपदुत्पत्त्यापत्तेरिति भावः ॥ ५७ ॥

आक्षिपति-

न युगपदनेकक्रियोपलब्धेः ॥ ५८ ॥

नैक मनः, युगपदुत्पत्तिकत्वेन चाक्षुषरासनाद्यनेकज्ञानोपलब्धेरित्यर्थः ॥ ५८ ॥

उत्तरम्—

[3]अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ॥ ५९ ॥

[4]आशूत्पत्तेर्दोषात् क्रमिकऽपि तस्य यौगपद्यस्य उपलब्धिर्भ्रमः[5], [6]अलातचक्र भ्रमति क्रमिककर्मसन्ताने यौगपद्यभ्रमवत्[7]। अकमिकत्वे अन्यदाऽपि युगपदुत्पत्तिः स्यादिति भावः ॥ ५९ ॥

यथोक्तहेतुत्वाच्चाणु ॥ ६० ॥

मनोऽणु[8] च, यथोक्तस्य [9]ज्ञानायौगपद्यस्याणुत्वेऽपि[10] हेतुत्वात्, महत्त्वे[11] युगपदनेकेन्द्रियसंयोगोत्पत्त्या[12] ज्ञानयौगपद्यप्रङ्ग इति भावः। [13]यौगपद्यप्रत्ययस्य न भ्रमत्वं कल्प्यते, वाधकाभावात्, किन्तु नानैव मनः, तेषाञ्च प्रत्येकं[14] कदाचित् प्रत्येकेन्द्रियेण कदाचिच्च सर्वेषामेकेन्द्रियेण [A]संयोगः

---

1. 'मेकदनेकम्वा A. 2. मनसे C. 3. आलात' A. 4. आशुपत्ते' A. 5. लब्धिभ्रमः C. 6. आलात' C. 7. 'सन्तानयोगपद्य' A. 8. मनोऽर्थ C. 9. ज्ञाने योग' C. 10. 'पद्यस्याथत्वेपि A. 'पद्यस्यापि C. 11. बहुत्वे A. 12. 'संयोगापत्त्या C. 13. युगपद्य' A. 14. प्रत्येकश्च A. A-A. om. C.

फलवलात्[A], अस्तु वा [15]महद्विभु निरवयवं मनस्तस्य[16] कदाचिदेकेन कदाचित्[17] द्वित्रिकेण कदाचिच्च सर्वैरेवेन्द्रियैः संयोगः फलवलकल्प्य[18] इत्यपि वदन्ति । लाघवादेकस्मिन् शरीरे एकमेवाणु[19] मनः, यौगपद्यप्रस्ययस्तु [20]स्थूलकालावलम्वी[21] [22]अयथार्थ एवेति वस्तुगतिः ॥ ६० ॥

॥ समाप्तं मनःपरीक्षाप्रकरणम् ॥

अथैकस्मिन्नेव शरीरे सर्वात्मना सह मनःसंयोगात्[1] तच्छरीरावच्छेदेन सर्वत्रैवात्मनि ज्ञानोत्पत्तिप्रसङ्गः, तदीयादृष्टजन्यशरीरस्य तदवच्छिन्नमनः-संयोगस्य वा तदीयज्ञाने कारणतया निरसनीय[2] इति [3]शरीरस्यादृष्टजन्यत्वं व्यवस्थापयति—[4]

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६१ ॥

पूर्वजन्यकृतिफलं क्रिया, तदनुवन्धस्ततत्प्रयोजनं तज्जन्यमदृष्टम्, तस्मात् तस्य शरीरस्योत्पत्तिः ॥ ६१ ॥

भूतेभ्यो मूर्त्त्युपादानवत्तदुपादानम् ॥ ६२ ॥

उपादानमुत्पत्तिः, मूर्त्तिर्घटादिः, तस्य शरीरस्य, भूतेभ्यो भूतमात्रेभ्यः, मात्रशब्देनादृष्टव्यवच्छेदः[4] । शरीरमदृष्टाजन्यं मूर्त्तत्वाद्घटवदिति भावः ॥ ६२ ॥

15-16. महदविभूमिववयवमनस्तस्य C. 17. कदाचि C. 18. फलानकल्प्य C. 19. °अणु om. C. 20-21. स्थलकालावलध्वी A. स्मृत्यकालावलम्वी C. 22. ययतार्थ A. यथार्थ C.

1. °संयोगा C. 2. नियमनीय C. 3. शरीरस्य दृष्टः° C. 4. °शब्देनादुवाव्यवच्छेदः C.

उत्तरम्—

न साध्यसमत्वात् ॥ ६३ ॥

साध्यं पक्षस्तत्समत्वात्, दृष्टान्तस्येति शेषः। घटावददृष्टाजन्यत्वस्यासिद्धेर्नेवं व्याप्तिरिति भावः ॥ ६३ ॥

[5]सिद्धान्तमाह—

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६४ ॥

शरीरमदृष्टाजन्यं न, मातापित्रोः[6] कर्मणः पुत्रदर्शनादिजन्यसुखजनकस्य [7]पुत्रादिकामनाकृतशिवाद्यभ्यर्चनादिजनितस्य[8] वा पुत्रादिशरीरोत्पत्तिनिमित्तत्वात् ॥ ६४ ॥

तथा आहारस्य ॥ ६५ ॥

मातापित्रोराहारस्य यज्ञादिशेषप्रपितामहपिण्डभोजनादेस्तथा पुत्रोत्पत्तिनिमित्तत्वात्। न चैतत् साक्षात् कारणम्, [9]किन्त्वदृष्टद्वारेत्यदृष्टजन्यत्वमिति भाव।

भाष्यादौ तु[10] भूतेभ्यो मूर्त्युपादानवदिति विषमोऽयं दृष्टान्त इत्यभिप्रेत्याह— नेति ; मातापित्रोरुत्पत्तिनिमित्त्वात् तयोराहारस्य च पुत्रदेहनिर्वाहकत्वान्न समो दृष्टान्त इत्यर्थः। तथा च यथा पक्षवृत्तिधर्मनत्त्वं (न) दृष्टान्ते तथा दृष्टान्तवृत्तिधर्मोऽपि न पक्षे—इत्यप्रयोजकत्वमिति भावः इति ॥ ६४ ॥

अदृष्टहेतुत्वे मानान्तरमाह—

---

5. सिद्धान्तर' C. 6. 'पित्रोश्च A. 7. स्वीयशिवा' C. 8. 'अभ्यर्चनादिकर्मजनितस्य C. 9. किन्तु दृष्टत्वावेद्यदृष्ट' A. 10. तु om. C.

प्राप्तौ चानियमात् ॥ ६६ ॥

मातापित्रोः प्राप्तावपि पुत्रोत्पत्तिनियमाभावात् अदृष्टमपि हेतुरिति भावः ॥ ६६ ॥

ननु तस्य शरीरस्य सर्वात्मना संयोग(ा)विशेषात् सर्वीयतापत्तिः, [11]न चैवम्, 'नेदमन्यस्ये'ति व्यवहारात्, दुर्वारश्चैवमपि पित्राद्यात्मनि[12] [13] पुत्रादिशरीरावच्छेदेन ज्ञानमित्यत आह—

शरीरोत्पत्तिनिमित्तवत् संयोगनिमित्तं कर्म ॥ ६७ ॥

तथा च[14] शरीरारम्भकतदीयादृष्टजन्यसंयोगस्तदीयताव्यवहारनियामको न संयोगमात्रम्, स तादृशादृष्टजन्यमनःसंयोगो वा[15] तदीयधीहेतुरिति न काऽप्यनुपपत्तिः ॥ ६७ ॥

ननु तत्कर्मण एव कुतो नियतात्मवृत्तित्वमित्यत आह-

एतेनानियमः प्रत्युक्तः ॥ ६८ ॥

एतेन तत्रापि तददृष्टन्तरजन्यसंयोगनियामकत्वेन, अनवस्था चानादिरिति। यद् वा मानान्तरमप्याह[16]-एतेनेति । अदृष्टनियामकत्वेनैव कश्चित् काणः[17] कश्चिन्न[18] तथेति नियमाभावोऽपि प्रत्युक्तः । यद् वा- अनियमः [19]शरीरस्य सर्वात्वसाधारण्यम् । भाष्यम्--"उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः" । तेन शरीरेणात्मनो वियोग आत्यन्तिकस्तादृशसंयोगध्वंसस्तच्छरीरावच्छिन्न-भोगजनकेति कर्मादि (?) ॥ ६८ ॥

अन्तिमसूत्रं निराकरिष्यमाणं [20]परमतं दर्शयति भाष्यम्—"तददृष्टकारितमिति चेत्" इति ; तच्छरीरम्, अदृष्टं दर्शनाभावः, तेनैव कारितम्, न तु

---

11. न चैव नैद' C. 12. पिताभ्यत्मनि C. 13. तच्छरीरा' C. 14. 'तदीयाद्यजन्व C. 15. 'संयोगश्च C. 16. मानान्तरमप्याह om. C. 17. कालः A. 18. 'न om. A. 19. शरीरसर्वात्म' C. 20. परि' C.

गुणविशेषेण[21]। अत्रोत्तरसूत्रम्—

पूनस्तत्प्रसङ्गोऽपवर्गे ॥ ६९ ॥

तस्य शरीरस्य शरीरतादृशसम्बन्धस्य वा तदापि दर्शनाभावसत्त्वादिति भाव:। दर्शनप्रागभावस्य[22] हेतुत्वेनेदं दूषणमिति[23] ध्येयम् ॥ ६९ ॥

एतेनादृष्टै: परमाणुभिस्तेषां[24] गुणै: कर्मभिर्वेत्यर्थतो[25] निराकृतोऽपि मुनिना निराक्रियते[26]—

मन:कर्मनिमित्तत्वाच्च संयोगाव्युच्छेद:[27] ॥ ७० ॥

मन:पदमणुपरम्[28] अदृष्टानिमित्तकत्वविशिष्टपरमाणुकर्मनिमित्तकत्वाददृष्टा-घटितसामग्रीकत्वात्, ज्ञानादिप्रयोजकात्ममन:संयोगानां तदीयतानिर्वाहक-शरीरात्मसंयोगानां शरीरप्रयोजकद्व्यणुकारम्भकाणुसंयोगानाञ्चानुच्छेद:, स्यादिति शेष: ॥ ७० ॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्ते: ॥ ७१ ॥

चैत्रादिशरीरस्य तत्तदात्मीयदु:खानाञ्च [29]नित्यत्वस्यानुच्छेदस्य प्रसङ्ग: ॥ ७२ ॥

आक्षिपति-

अणुश्यामतानित्यत्ववत् स्यात् ॥ ७२ ॥

यथाऽणो:[30] श्यामतानित्यत्वमत्यन्तं[31] निवर्त्तते[32] तथा शरीरादिकमपीति भाव: ॥ ७२ ॥

---

21. विशेषण A. 22. 'प्राभावस्य A. 23. हेतुत्वा ना तददूषण' C. 24. एतेतादृष्टपरमाणु' C. 25. कर्मभिस्वार्थापि C. 26. च add. C. 27. संयोगाद्युच्छेद: C. 28. 'पदनुपरम् C. 29. निष्ठत्वस्या' A. 30. यथात्मनो: A. 31. 'नित्यमन्वन्तं C. 32. निवर्त्तन्ते C.

उत्तरम—

नाकृताभ्यागमप्रसङ्गात्[33] ॥ ७३ ॥

अकृतस्य प्रमाणाविषयीभूतस्याभ्यागमोऽभ्युपगमः, न हि विना कारणोच्छेदं कार्योच्छेद इति भावः ॥ ७३ ॥

[A]॥ समासमदृष्टनिष्पाद्यत्वप्रकरणम् ॥ तृतीयस्य द्वितीयाह्निकञ्च ॥

॥ इति न्यायरहस्ये[A] तृतीयोऽध्यायः[34] ॥

---

33. प्रसङ्गः C. A-A. om. C. 34. तृतीयाध्यायः C.

॥ चतुर्थाध्यायस्य प्रथमाह्निकम् ॥

अथावसरतः कार्यरूपप्रमेयादिषट्कपरीक्षा, सैव[1] चाध्यायार्थः । तत्र प्रथमाह्निके[2] [C]उद्दिष्टधर्मवत्तया प्रवृत्त्यादिपरीक्षा, द्वितीयाह्निके तु प्रमादिविषयिणो धर्मस्य तत्त्वज्ञानस्य (च) परीक्षेति वदन्ति । अत्र प्रथमाह्निके[C] चतुर्दशप्रकरणानि, षट् षण्णां[3] प्रवृत्त्यादीनाम्, अष्टावौपोद्घातिकानि[4] यथास्थानं वक्ष्यन्ते[5] । तत्रोक्तरूपवत्तया प्रवृत्तिदोषयोः परीक्षणं प्रथमप्रकरणम्ः, उक्तरूपवत्ताया यथातथेति सूत्रेणेव ज्ञापनादिति वदन्ति।

सूत्रम्—

प्रवृत्तिर्यथोक्ता ॥ १ ॥

तथैवेति शेषः । येन प्रकारेणोक्ता "प्रवृत्तिर्वाग्वुद्धिशरीरारम्भः [न्या. सू. १।१।१७] इति, तथा । तद्धर्मवत्येवेति नासिद्धं लक्षणमिति भावः । एवं ह्यत्र कारणरूपा[6] प्रवृत्तिः परीक्षिता, कार्यरूपा तु[7] धर्माधर्माख्येत्यवधेयमिति वदन्ति ॥ १ ॥

दोषपरीक्षासूत्रम्—

तथा दोषाः ॥ २ ॥

दोषा अपि तथा उक्तलक्षणयोगिनः, तेन नासिद्ध्यादिरिति भावः ॥ २ ॥

॥ इति प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥

अथ विशेषेण दोषपरीक्षणाय [1]तत्त्रैराश्यप्रकरणम् । तत्र विभागतत्परीक्षापरं सूत्रम्—

---

1. तदेव A. 2. प्रमाह्दिके A. C-C—in C only, omission in A due to haplography. 3. षट् यथां A. 4. अष्टावौपोदयिकानि यताकानि. C. 5. वक्षं तो C. 6. कारण C. 7. कारुत्पत्ते C.

[2]तत्त्रैराश्यं रागद्वेषमोहान्तरभावात् ॥ ३ ॥

तेषां दोषाणां त्रयो[3] राशयः पक्षाः, [4]न त्वेकमेव, रागद्वेषमोहानां परस्परं भेदादित्यर्थः[5]। मानादीनामिह यथायथमन्तर्भावान्न[6] विभागव्याघात-लक्षणातिव्याप्ती इति भावः। रागद्वेषयोरिच्छात्वद्वेषत्वेऽनुभवसिद्धे जातिविशिष्टे अविशिष्टे वा लक्षणे। [7]मोहो मिथ्याधीरयथार्थसविषयक-मात्रम्वा[8] तत्त्वज्ञानान्यज्ञानं वा[9] समानाधिकरणशरीरात्मगोचरसंस्कार-समानकालीनबुद्धिर्वा। तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया[10] दम्भ इति। कामो नारीगताभिलाषो रिरंसारूपः। मत्सरः प्रयोजनानुसन्धानं विना परेष्टवारणेच्छा, यथा 'राजकीयादुदपानान्मोदकं पाः'[11], परोदीरितेऽन्यगुणे 'न तथे'त्यादि। स्पृहा धर्माविराधेनाप्राप्तप्राप्तीच्छा। [12]तृष्णा 'इदं मम न क्षीयतामि'तीच्छा। धर्मविरोधेन परद्रव्यादानेच्छा लोभः। माया परवञ्चनेच्छा। दम्भः कपटेन धार्मिकत्वादिना [13]वा स्वोत्कर्षख्यापनेच्छा। द्वेषपक्षः क्रोधः ईर्ष्या असूया द्रोहोऽमर्षोऽभिमान इति। क्रोधो नेत्रलौहित्यहेतुर्द्वेषः। ईर्ष्या [14]उपचितस्वापरव्यापार-साधारणवस्तुनि [15]तथाभिधानादौ द्वेषः, यथा ज्ञातिपिशाचस्य। असूया परगुणद्वेषः। द्रोहो नाशाय द्वेषः। कृतापकारेऽसमर्थस्य द्वेषोऽमर्षः। अभिमानोऽपकारिण्यकिञ्चित्करस्यात्मनि द्वेषः। कामत्वादयः कोधत्वादयश्च[16] जातिविशेषा एवेति तत्त्वम। मोहपक्षो मिथ्याज्ञानं विचिकित्सा मानः[17] प्रमादः भयं शोक इति। अयथार्थनिश्चयो मिथ्याज्ञानम्। विचिकित्सा सन्देहः। आत्मन्यविद्यमानगुणारोपादुत्कर्षधीर्मानः। अकर्त्तव्ये कर्त्तव्यताबोधः

1-2. त्रैरास्य' A. 3. 'दोषाणात्रयो A. 4. नन्वेकं' C. 5. मनोदीना' C. 6. र्भावार्थ C. 7. मोहोऽनिष्टाधो' A. 8. 'ययानुकाविषयकमात्र' C. 9. आत्मत्वज्ञानस्य सानर्था C. 10. मयो C. 11. 'न्मोदरूपाः C. 12. दृष्यांदिकं समन' C. 13. वार्योत्कर्ष C. 13. वार्योत्कर्ष C. 14. उपचितापर' C. 15. स्वत्त्वाभिधानादौ C. 16. च om. A. 17. 'कित्समानः A.

प्रमादः । भयमनिष्टहेतूपनिपाते परित्यागाशक्यत्वधीः[18] । शोक इष्टवियोगे [19]तल्लाभानर्हणज्ञानम् । मानत्वादयो[20] मानसत्वव्याप्यजातिविशेषा इति तु वस्तुगतिः । न च कार्पण्यमधिकम्, तृष्णयैव[21] गतार्थत्वात्, हिंसा तु द्रोह एव, स्मयो मानभेद इति वदन्ति ॥ ३ ॥

आक्षिपति—

नैकप्रत्यनीकभावात्[22] ॥ ४ ॥

नैतेषां परस्परभेद एकविरोधित्वात्, एकं हि तत्त्वज्ञानमेषां विरोधि ॥ ४ ॥

निराकरोति—

व्यभिचारादहेतुः ॥ ५ ॥

एकाग्निसंयोगविरोधिरूपरसादावित्यादिः ॥ ५ ॥

मोहस्य वलवद्द्वेष्यत्वप्रदर्शनायाह—

तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ॥ ६ ॥

तेषां रागमोहयोः[23] [24]द्वेषमोहयोर्वा मोहः पापीयान उत्कटद्वेष्यः[25] द्विवचनोपपद एव ईयसुनो[26] विधानात्, अन्यथा पापतमः पापिष्ठ इति वा स्यात्[27] । पापीयस्त्वे हेतुमाह-[28] नामूढस्येति । मोहशून्यस्य रागद्वेषोत्पत्तेरभावादित्यर्थः । अत्र रागद्वेषपदं[29] धर्माधर्मोपधायकेच्छाद्वेषपरम्[30] । तत्तदघटितम्वा[31] रागत्वादि, तेन जीवन्मुक्तस्य मोहरहितस्येच्छाद्वेषसत्त्वेऽपि न क्षतिः ॥ ६ ॥

शङ्कते—

प्राप्तस्तर्हि निमित्तनैमित्तिक[32]भावान्मोहोऽर्थान्तरभावो दोषेभ्यः ॥ ७ ॥

---

18. शाक्यधीः C. 19. प्र लाभार्हण' A. 20. 'दाया C. 21. तृष्णासैव C. 22. 'नीकाभावात् C. 23. रागद्वेषयोः A. 25. उत्कटाद्वेष्य C. 26. ईयनूसी C. 27. See Paṇini 5.3.57 and 5.3.55. 28. अमूदस्येति C. 29. रागोद्वेषपदं C. 30. 'द्वेषपरीतं C. 31. तत्तदघटितत्वा A. तद्घटितद्या C. 32. निमित्तनिमित्तक' A.

दोषनिमित्तत्वाद् दोषान्यो मोहः, [33]न ह्यभेदेन हेतुतेत्यर्थः । मोहोशून्यमपि सूत्रमिच्छन्ति ॥ ७ ॥

उत्तरम्—

न दोषलक्षणावरोधान्मोहस्य ॥ ८ ॥

तथा च बाध इति भावः । दोषलक्षणानवरुद्धत्वमुपाधिरित्यर्थ इत्यपि[34] केचित् ॥ ८ ॥

[35]भास्करमात्रलिखितं सूत्रम्—

निमित्तनैमित्तिकभावोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ९ ॥

बुद्धिर्बुद्धेर्द्रव्यं द्रव्यस्य गुणो गुणस्य निमित्तमिति सजातीययोः[36] कार्यकारणभावो[37] नास्तीत्याकारकः सामान्यतो नियमो नास्तीत्यर्थ ॥ ९ ॥

॥ समाप्तं दोषत्रैराश्य[38] परीक्षाप्रकरणम् ॥

अथ प्रेत्यभावपरीक्षा । अथ "पुनरुत्पत्तिः प्रेत्यभावः" [न्या.सू. १।१।१९] इत्ययुक्तम्, तथा हि—पुनरुत्पत्तिर्भूतस्य जन्म, तच्च[1] नात्मनि सम्भवति, आत्मनो ज्ञानरूपस्य द्विक्षणमात्रस्थायिनस्तदभावात्, तस्य [2]चिरस्यायिद्रव्यत्ववादिनापि तादृशशरीरावच्छिन्नात्मनाशादेव[3] तादृशशरीरात्मसम्वन्धविच्छेदविशेषरूपमरणोत्पत्तिर्वक्तव्या, अनतिप्रसक्तकारणान्तराभावात् । न च विशिष्टस्य शरीरसंयोगविशेषरूपं जन्म सम्भवति ; नापि शरीरे, मृतशरीरस्य जन्माभावात् ; [4]तस्माद् भूत्वा प्रायणं प्रेत्यभावः,

---

33. नक्तभेदेन C. 34. 'मुपाधिरित्यपि A. 35. भक्षेव मात्रं C. 36. A adds च 37. 'कारणयो भाव A. 38. 'त्रैरास्य' A. 'त्रैराश्य om. C.

1. तश्च A. 2. भिन्नस्थाने C. 3. 'नाशाद्देव A.

'मुखं व्यादाय [5]स्वपिती'त्यत्र [6]'सुप्त्वा व्यादत्ते' [7]इतिवद् [8]व्युत्पादनेनोपपत्तेः, [9]तच्चात्मनो ज्ञानत्वनये तादृशशरीरावच्छिन्नबुद्धिध्वंसासमानकालोत्पत्तिकबुद्द्वयवच्छेदकसजातीयतादृशशरीरावच्छिन्नबुद्धिप्रागभावसमानकालीनः[10]। मतान्तरे तु स्फुट एवात्मनि शरीरे च सम्भवतीत्यत आह—

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥

<u>आत्मनित्यत्वे</u> तृतीयोक्तयुक्त्युक्त्या[11] व्यवस्थापिते[12] <u>प्रेत्यभावसिद्धि</u>रित्यर्थः। यस्यानित्य आत्मा तस्य प्रेत्यभावो न सिध्यति, तन्नित्यत्वमते स सिध्यत्येवेति भावः । अदृष्टविशेषनाशप्रयोज्यमेव मरणम्, न त्वात्मनाशप्रयोज्यमिति हृदयम् । <u>केचित्तु</u>—प्रायणं नाशः[13], भाव उत्पत्तिः ; एवञ्च ध्वस्तस्योत्पत्तिः प्रेत्यभावः, न चैतत् प्रसिध्यति । न च नित्ये आत्मनि प्रायणं भावो वा प्रत्येकमपि सम्भवति, तस्माद् भूत्वा[14] प्रायणं प्रेत्यभावः, स च नासिद्ध इत्यत आह—[15]<u>आत्मेति</u> । सति यथा तथेत्यनुषज्यते । उक्तमित्यध्याह्रियते[16] च, <u>आत्मनित्यत्वे</u> यथा <u>प्रेत्यभावसिद्धि</u>स्तथोक्तमित्यर्थः । प्रायणं च न नाशः किन्तु शरीरविच्छेदविशेषः[17] [A]भावोऽपि नोत्पत्तिरपि तु देहसंयोगविशेष[A] इति भाव इति प्राहुः ॥ १० ॥

ननु सर्वमेतदुत्पत्तिसिद्धौ स्यात्, सा च न सजातीयविजातीयाभ्यां सम्भवति, व्यभिचारात् ; न च[18] कारणान्तरविरहप्रयोज्योऽन्वयव्यभिचारो न दोषाय, व्यतिरेकव्यभिचारस्तु नास्त्येव, पृथिवीत्वजन्यपृथिवीत्वजलत्वजन्य-

---

4. तस्मातद्भूत्वा A. 5. सुप इत्यत्र A. 6. यद्वाव्यदित्र A. 7. जातिवद् A. 8. वद्यद्पवादिनोपपत्ते C. 9. तुच्छात्मनो C. 10. A. adds च 11. See न्या॰ सू॰ ३।१।१८-२६. 12. ॰स्थापितो C. 13. A adds च 14. भूवा A. 15. अनित्य इति A. 16. ॰ध्याक्रियते C. 17. ॰विच्छेधाशेषः C. A—A. in A only, omission in C due to haplography.

जलत्वादि[19] कपालत्वघटत्वादिना[20] हेतुहेतुमद्भावादिति वाच्यम्, नित्ये पृथिव्यादौ मानाभावेनाद्यपृथिव्यादौ व्यभिचारात् ; न चोक्तहेतुहेतुमद्भाव एव मानं, मानाभावेन [21]तस्यैवासिद्धेरित्यसत्यैवेयमित्यनुपपन्नः प्रेत्यभाव इत्यत आह-

व्यक्ताद्व्यक्तानां[22] प्रत्यक्षप्रामाण्यात[23] ॥ ११ ॥

व्यक्तमन्वयव्यतिरेकप्रकारीभूतधर्मवत्, तथा च पृथिव्यादितः पृथिव्यादीनामुत्पत्तिरिति शेषः ; अत्रान्वयव्यतिरेकग्रहसहकृतप्रत्यक्षस्यैव[24] प्रामाण्यादित्यर्थः ; तथा च नासिद्धं नित्यपृथिव्यादिनेति [?] भावः । तच्च नित्यपृथिव्यादि परमाणुरूपं त्रुटिरूपम्वेत्यन्यदेतत् ॥ ११ ॥

विशेषतो व्यभिचारग्रहोऽपि सामान्यतो हेतुताग्रहविरोधीत्यभिमानेनाशङ्कते-

न घटाद्घटानिष्पत्तेः ॥ १२ ॥

नेति । तथा हेतुतेत्यर्थः ॥ १२ ॥

विशेषतो व्यभिचारग्रहो विरोध्येव न सामान्यतो हेतुताग्रहस्य, सामान्यतो व्यभिचारस्तु नास्त्येवेत्यभिप्रायवान् समाधते—

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥

व्यक्तात् पृथिव्याः कपालरूपयोः ॥ १३ ॥

॥ समाप्तं प्रेत्यभावपरीक्षाप्रकरणम् ॥

---

18. 'चारानु च C. 19. 'जलत्वजलत्व' A. 20. 'कपालघटत्व' A. 21. तस्मै वा C. 22. व्यक्ताव्यक्तोनां A. 23. 'प्रामाण्यं A. 24. 'प्रत्ययस्यैव C.

अथोपोद्घातात्[1] प्रसङ्गतो वा[2] अष्टौ प्रकरणानि। तत्र शून्यतोपादानता-पूर्वपक्षसूत्रम्—

अभावाद्भावोत्पत्तिर्नानुपमृद्य[3] प्रादुर्भावात् ।। १४ ।।

अभावो[4] भावोपादानम्। कुतः ? बीजादिकमनुपमृद्य[5] अङ्कुरादेः आत्मानमनुपमृद्य अस्य[6] [?] च प्रादुर्भावाभावात्, उपमृद्य[7] च प्रादुर्भावात्। प्रादुर्भाव उत्पत्तिः, उपमर्दः क्वचिद्ध्वंसः क्वचिच्च प्रागभावः। अभावो भावोपादानं अनुपादानकारणत्वेनोभयवादिसिद्धान्यत्वे सति भावकारणत्वात्। यद् वा—बीजध्वंसो स्वप्रागभावो वा अङ्कुरारम्भ-काद्यानित्योपादानं[8] अङ्कुरारम्भकत्रसरेणूपादानं[9] वा, तदनुपादान-कारणत्वेनोभयवादिसिद्धान्यत्वे सति तत्कारणत्वात्—इति सामान्यतो व्याप्तिः, कपालादिकं दृष्टान्त इति तु पर्यवसितम् ।। १४ ।।

शङ्कते—

व्याघातादप्रयोगः ।। १५ ।।

उपमृद्य[10] प्रादुर्भावादिति प्रयोगो न युज्यते, उत्तरवर्त्तिनः[11] प्रादुर्भूत-स्योपमर्दहेतुत्वव्याघातात्, समानकर्त्तृत्वविशिष्टानन्तर्यस्य ल्यवर्थत्वा-दिति[12] भावः ।। १५ ।।

निराकरोति—

नातीतानागतयोः कारकशब्दप्रयोगात् ।। १६ ।।

उक्तदोषो न, अतीतानागतयोरपि कारकशब्दप्रयोगात्, यथा 'आसीद्[13] घटो भविष्यति घट' इत्यादि ; तथा च तद्वदेवेह न समानकर्त्तृकत्वं[14]

---

1. अथोत्पादवातात् C. 2. प्रसङ्गाभावा C. 3. ०नुपसृत्य C.
4. अभावा A. 5. ०नुपसृत्य C. 6. ०नुपसृत्यर्थस्य C. 7. ०सृत्य C.
8. ०रम्भकान्या० A. 9. ०कक्रशरेथकपालं A, ०कतः स्वरेणूपादानं C.
10. उपसृत्य C. 11. ०रयति नः C. 12. रर्थस्यादिति C.
13. आशीद् A. 14. तद्वदोरहनकर्त्तृत्वं C.

विवक्षितम्, किन्त्वानन्तर्यमिति भाव इति सम्प्रदायः। नव्यास्तु—अभावकारणताग्राहकमानस्य व्याघातादयमप्रयोग इति पूर्वसूत्रार्थः; अतीतानागतयोः स्वप्रागभावपूर्वद्रव्यध्वंसयोरुपादानादौ कारकशब्द-प्रयोगाभावादकारकत्वात् कार्यानुपधायकत्वात् [न] तयोर्हेतुत्वमित्युत्तर-सूत्रार्थ इत्याहुः ॥ १६ ॥

"अभावाद्भावोत्पत्ति"रित्यनेनाभावस्य भावोपादानकारणत्वं वा साध्यते भावकारणत्वं वा[15] ? आद्ये समाधानसूत्रम्—

न विनष्टेभ्योऽनिष्पत्तेः ॥ १७ ॥

विनष्टेभ्य इति भावे निष्ठा, तथा च विनाशेभ्यो निष्पत्तिविशेषाभावा-दित्यर्थः, अभावस्यानुपादानत्वादिति तु[16] फलितार्थः। द्रव्यत्वस्पर्श-त्वादिना हि[17] गुणद्रव्याद्युपादानता, सा च नाभाव इति भावः। यद् वा—विनष्टेभ्यः[18] विनाशिभ्यः[19] स्वोत्पत्तिकालीननाशप्रतियोगिभ्यः स्वस्य [20]तथाऽनुत्पत्तेः, तथा प्रतियोगिन उपादानकारणत्वाभावादिति तु[21] फलितार्थः। अन्यथा क्षणिकत्वापत्तेः, तस्याश्च निराकृतत्वात्, एवञ्च न प्रागभावस्य तथा हेतुतेति भावः ॥ १७ ॥

अन्त्ये सिद्धसाधनमाह—

क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥

अभावस्य कारणत्वन्तु न प्रतिषिध्यते, अन्वयव्यतिरेकानुविधानादिति भावः। यद् वा—अभावस्तुच्छत्वादकारणमिति[22] कश्चिदाह, तन्मतं निराकृतमनेन[23] सूत्रेण। यद् वा—एतावताऽभावमात्रकारणकत्वम-भावान्यत्वव्यापकाभावप्रतियोगिकारणतासामान्यकत्वरूपं साध्यते,

15. वा om. A. 16. तु om. C. 17. हि C. 18. विनष्टो C. 19. स्वाविना० C. 20. तथा व्युत्पत्तेः C. 21. तु om. A. 22 अभावस्तु वृत्त्वाद० C. 23. ०कृतमानस C.

[A]अभावान्यत्वावच्छेदेन कारणत्वाभावो वा साध्यते[24],[A] अभावकारण-कत्वं वा? आद्ये—नेति। [25]विनष्टेभ्यः वर्त्तमानकादाचित्काभाव-प्रतियोगिभ्यः कपालादिभ्यो घटादेरनिष्पत्तेर्न तेषामहेतुत्वम्, अन्यथा स्वप्रागभावादिरूपसामग्रीसत्त्वात् कपालादिकमन्तरेणापि घटादेरुत्पत्त्या-पत्तेरिति भावः। द्वितीये—क्रमेति। ननु सामग्र्याः कार्यव्याप्यत्वे मानाभावः, अस्तु [26]वा स्वोत्पत्त्यव्यवहितप्राक्कालोत्पत्तिकध्वंस[27]-स्वप्रागभावयोरेव हेतुत्वमित्यत[28] एव वा आह—क्रमेति। भावानामपि नियतपूर्ववर्त्तिताविशेषरूपकारणतासत्त्वात् तत्प्रतिषेधो नेत्यर्थः। द्वितीये सिद्धसाधनं स्फुटमेव। अथवा—एवं हि अभावमात्रकारणकत्वं साध्यते, अभावोपादानकत्वं वा, अभावान्यत्वावच्छेदेन कारणत्वाभावो वा, अभावे उपादानत्वं वा, कारणत्वं वा? आद्ययोः—व्याघातादिति[29]। अप्रसिद्धे-रित्यर्थः। तृतीये—नातीतेति। अतीतानागतयोश्च [30]कपालाद्योर-भावस्य घटाद्याकारकत्वाद्[31] तेषामपि हेतुतेति भावः। तुरीये—नेति। अन्त्ये—क्रमेति।

अपरे पुनः व्यूहान्तराद् द्रव्यनिष्पत्तिरिति चरमसूत्रमिच्छन्ति। तथा चेत्थं व्याख्येयानि सूत्राणि। नन्वस्तु तावत् प्रयोगः, न पुनरभावः कारणं मानाभावादिति[32] प्रदर्शनाय न विनष्टेति[33] सूत्रम्। विनष्टं विनाशोऽभाव इति यावत्, अनिष्पत्तेर्निष्पत्तौ मानाभावान्नाभावः कारण-मिति भावः। अत्र[34] समाधानं पूर्वपक्षी प्राह—क्रमेति। अन्वयाद्यनु-विधानादभावकारणत्वाप्रतिषेध इत्यर्थः। उत्तरम्—व्यूहेति। व्यूहान्तरं

A—A. in A only, omission in C due to haplography. 24. A adds इति यावत्, which seems to be superfluous. 25. विशिष्टेभ्यः A. 26. वाऽस्योत्पत्त्य० A. 27. ०त्विध्वंस० C. 28. ०मित्यत्र C. 29. व्याघादिति C. 30—31. ०भावस्या घटाद्यकारकत्वात् A, ०भावस्य-कारकत्वात् C. 32. कारणमिति C. 33. विनर्देति C. 34. अत्र om. A.

कपालादि, क्रमनिर्देशादिति हेतुरनुषञ्जनीयः, तथा[35] च नाभावमात्रकारणकत्वमिति भावः। यद् वा—[36]प्रथमेनाभावोपादानत्वनिरासः, अभावकारणकत्वे द्वितीयेन सिद्धसाधनमभिहितम्, [37]तृतीयेनाभावमात्रहेतुकत्वव्युदासः।

अत्र वदन्ति—न वयं कार्यमात्र एवाभावमात्रहेतुकत्वं[38] ब्रूमोऽपि तु प्राथमिके[39], [A]तथा हि तद्धेतुत्वेन सम्भावितं तावत् साधारणं दिगादि, न च दिक्कालयोर्भगवति तज्ज्ञानादौ च मानमस्ति, अदृष्टस्य च [40]श्रुतिसिद्धतत्तत्कार्य एव हेतुत्वेन [41]प्राथमिके[A] मानाभावात्; असाधारणं परमाणुतत्संयोगप्रभृति, न चोत्पादविनाशशालित्वेन साक्षात्क्रियमाणातिरिक्ते बहिर्द्रव्ये[42] मानमस्ति, अनुमानानामप्रयोजकत्वात्। न च पृथिवीत्वजन्यपृथिवीत्वादिना हेतुहेतुमद्भावात्तत्सिद्धिरावश्यिकी, आद्यपृथिव्यादिव्यावृत्तपृथिवीत्वादिजातेरेव तत्कार्यतावच्छेदकत्वात्, अन्यथा [43]गोत्वजन्यगोत्वादिना हेतुहेतुमद्भावान्नित्यगवादिसिद्ध्यापत्तेः, तथा च पारिशेष्यात् तत्प्रागभावस्य पूर्वसर्गीयप्रतियोगिकचरमध्वंसस्यैव[44] च तत्र हेतुत्वम्, नातः[45] प्राक्सर्गान्तरे तदुत्पत्तिः। न चान्वयव्यभिचारवारणाय तदव्यवहितपूर्वोत्पन्नमनःक्रियादेरेव[46] हेतुत्वमस्तु, मनसो दूरनिरस्तत्वात्। न चैवं प्रलयोत्पत्त्यव्यवहितोत्तरक्षण एव [47]द्रव्योत्पत्त्यापत्तिः, तद्द्रव्यप्रागभावविशिष्टस्य प्रलयरूपध्वंसस्यैव [A]तदुत्पत्तिक्षणत्वेन तद्द्रव्योत्पत्तिक्षणस्यैव[A] तदव्यवहितोत्तरक्षणत्वात्। न च जात्यादेरात्मनो वा तद्धेतुत्वं त्वयाऽपि स्वीक्रियते, "असदेवेदमग्र आसीदि"ति [छान्दोग्य० ६।२।१] श्रुतिरप्यर्थमेनं[48]

35. तवा A. 36. प्रथमे नाभावो० C. 37. तृतीये नाभाव० C. 38. ०मात्रो हेतु० C. 39. प्राथमिककार्ये A. A—A. in A only, omission in C due to haplography. 40. सिद्धं तत्त्त्० A. 41. प्राथमिककार्ये A. 42. ०रिक्तवहि० A. 43. गेहिजना गोत्वा० C. 44. ०ध्वंसस्यैव C. 45. न ततः A. 46 ०क्रियामेवेव C. 47. तद्द्रव्यो० C. 48. ०प्यर्थसन्नं A.

सम्वदति। अत्र सच्छब्दः साक्षात्सम्बन्धेन [49]सत्ताश्रयमात्मातिरिक्तमात्माद्दष्टातिरिक्तं[50] वाऽहं[51], आत्मनः सदातनस्य श्रुत्यन्तरसिद्धत्वात्, जातेश्च[52] तदापि सत्त्वात्। जातेर्नित्यत्वं कल्पपर्यन्तस्थायित्वमेव, कल्पभेदेन जातिभेदकल्पनञ्च श्रुतिसिद्धत्वान्न दोषाय [A]इति साक्षात्सम्बन्धेन न वक्तव्यम्[A]—इत्यपि कश्चित्। यदि चात्मनः कार्यमात्रहेतुत्वं श्रुतिसिद्धं तदाऽस्त्वात्मान्यभावाहेतुकत्वमेवाभावमात्रहेतुकत्वम्, यदि च तत्राद्दष्टमपि हेतुस्तदाऽद्दष्टान्येत्यपि वाच्यम्, द्रव्यानुपादानकत्वे सत्यभावहेतुकत्वम्वा तत्। एवञ्च साक्षात्परम्परयाऽत्मभावमात्रहेतुकं कार्यमात्रमेव तव परमाणुहेतुकं निखिलकार्यद्रव्यमिव[53]। यदि च भावकार्यमात्रे समवायिकारणजन्यत्वनियमस्तदाऽस्तु अभावस्यैव तत्समवायित्वं नो चेन्नेति। एवमङ्कुरारम्भकमाद्यमनित्यद्रव्यमपि न[54] द्रव्योपादानकं किन्तु बीजध्वंसोपादानकमेव, द्रव्यानुपादानकत्वे सत्यभावहेतुकत्वमेव च तत्राभावमात्रहेतुकत्वमिति; प्रयुज्यते[55] च—कार्यत्वम् अभावमात्रहेतुकवृत्ति, कार्यत्वव्यापकत्वान्मेयत्ववत्; अखण्डाभावे च न वैयर्थ्यम् [?]; [C]कार्यद्रव्यं साक्षात्परम्परयात्मभावान्यहेतुकम्, द्रव्यत्वात्, आत्मवदित्यादीति[C]।

परे तु प्रकरणमिदमेवं व्याचक्षते—प्रसङ्गादभावस्य हेतुतां व्यवस्थापयति—अभावादिति। मानाभावान्नाभावः कारणमिति शङ्कते—व्याघातादिति। उत्तरम्—नातीतेति। शङ्कते—न विनष्टेभ्य[56] इति। विनष्टेभ्यः कार्योत्पत्तिकालीननाशप्रतियोगिभ्यः। कार्यासहवर्त्तित्वान्न तद्धेतुत्वमिति भावः। उत्तरम्—क्रमेति। पूर्ववर्त्तित्वान्न हेतुत्वं विरुद्धमिति भाव इत्याहुः ॥ १८ ॥

॥ समाप्तं शून्यतोपादानतानिराकरणप्रकरणम् ॥[57]

---

49. सत्ताश्रयमात्माति॰ C. 50. ॰रिक्तमात्मो दृष्टा॰ C. 51. वा om. A.
52. जातिश्च A. A—A. in A only. 53. निखिलद्रव्यमिव C.
54. न om. C. 55. प्रयोज्यते A. C—C. in C only.
56. विशिष्टेभ्य A. 57. C adds शुभमस्तु ॥ मङ्गलं चास्तु ॥ श्रीरस्तु ॥

निराकर्त्तुं मतान्तरमाशङ्कते[1]—

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥ १९ ॥

कारणं कार्यमात्रस्य प्राथमिककार्यस्य वा उपादानकारणम्, पुरुषकर्मणोऽफलत्वं[2] यत्र तादृशज्ञानात्, अदृष्टाजन्यज्ञानादिति पर्यवसितो हेतुः। व्यतिरेकतो व्याप्तिरिति भावः ॥ १९ ॥

दूषयति—

न पुरुषकर्माभावे फलानिष्पत्तेः ॥ २० ॥

नायं हेतुः, अदृष्टमन्तरेण कार्यमात्रस्यैवाभावात्, फलमात्र एवादृष्टस्य हेतुत्वादित्यर्थः। तथा च व्यर्थविशेषणत्वात् पुरुषकर्मजन्यत्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्धेर्वा नायं हेतुरिति भावः ॥ २० ॥

ननु जन्यतायाः[3] कारणघटितत्वात् कुतो वैयर्थ्यं कुतो वाऽप्रसिद्धिः, गुरोरप्यवच्छेदकत्वस्वीकारात्, अस्तु वा[4] [5]अजन्यज्ञानमेव हेतुरित्यत आह—

तत्कारितत्वादहेतुः ॥ २१ ॥

तत्पदं प्रक्रान्तं व्यक्तं[6] परामृशति। द्रव्यस्येति तदादिः। स्पर्शवत्पृथिव्यादि च व्यक्तम्, एवञ्च द्रव्यस्य सामान्यतो विशेषतश्च स्पर्शवत्पृथिव्याद्युपादानकत्वादीश्वरोऽहेतुरनुपादानमित्यर्थः। स्पर्शवत्त्वादिनोपादानोपादेयभावः प्रत्यक्षे[7] घटकपालादाववधारित[8] एवेति भावः। यद् वा—ईश्वरेऽनुपादानत्वानुमितेरपीति तदादिः, तत्कारितत्वादजन्यज्ञानरूपहेतुकारित्वादुक्तहेतुरहेतुरसाधारण इति भावः। अथवा ननु

मय्येव सकलं जातं[9] मयि सर्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्[10] ॥ [कैवल्य० १९]

---

1. मतान्तरं शङ्कते A. 2. ०कर्मणः ताफलत्वं C. 3. जन्यतवा C. 4. वा om. C. 5. जन्य० C. 6. Cf. न्या. सू. ४।२।२२; 7. प्रत्यक्षेण C. 8. ०दावव्वान्वित C. 9. मय्येवपफलं C. 10. ०द्वयमस्त्यहम् C.

इत्यादिश्रुतेरुपादानं स इत्यत आह—तदिति। श्रुत्या[11] तत्कारितत्व-बोधनात्, श्रुतिनेश्वरोपादानत्वबोधनं हेतुरित्यर्थः।

वस्तुतस्तु—ईश्वर इत्यस्य एवेति शेषः। तथा च कार्यं प्राथमिकं कार्यम्वा[12] ईश्वरान्याहेतुकम्[13], अदृष्टाजन्यत्वात्, [14]आत्मवदित्यर्थः। प्रथमसूत्रं[15] निराकरोति—नेति। तथा च कार्यमात्र एवादृष्टहेतुत्वाव-धारणाद् बाध इति भावः। दूषणान्तरमाह—तदिति। कार्यमात्रस्यैवा-दृष्टकारितत्वात् स्वरूपासिद्धो हेतुरिति भावः।

यद् वा—कार्यं प्राथमिकं द्रव्यं वा[16] [17]ईश्वरान्यानुपादानकम्, [18]अदृष्टाजन्यत्वादित्याक्षेपः। अत्र स्वरूपासिद्धिमाह—नेति। बाधमाह—तदिति। व्यक्तोपादानकत्वादुक्तो हेतुरहेतुर्बाधित इत्यर्थः।

यद् वा—[19]ईश्वरान्यहेतुकत्वे बाधासिद्धयोरभिधानं नेति सूत्रेण, ईश्वरोपादानकत्वे बाधाभिधानं तदिति सूत्रेण।

प्राञ्चस्तु—यदि सापेक्षकारणमीश्वरस्तदा यदपेक्षणीयं ^A^तत्रानीश्वरः स्यात्, न ह्यपेक्षणीयं ^A^किञ्चित् केनचित् क्रियत इति दृष्टमत आह—तदिति। अपेक्षणीयस्यापि दण्डादेः कुलालादिरूपकर्त्तृकारित्वादपेक्ष-णीयत्यमकरणे[20] न हेतुरित्यर्थः।

सम्प्रदायविदस्तु—तर्हि कर्मैव बीजमस्तु किमीश्वरेणेत्यत आह—तदिति। कार्यमात्रस्य कर्त्तृकारितत्वादीश्वरप्रत्याख्यायकमहेतुरित्यर्थः[21]; न हि [22]कर्त्तारमन्तरेण [23]कार्यमुत्पद्यते, न च क्षित्यादेः कर्त्ताऽन्योऽस्तीति भाव इत्याहुः।

---

11. श्रुत्यादि C. 12. कार्यत्वो C. 13. ०हेत्वकम् C. 14. आत्मवव-दिति C. 15. ०सूत्रस्य C. 16. द्रव्यत्वा A, C. Reading emended in the light of the context. 17. इवेरास्यानु० C. 18. च जन्यत्वा० C. 19. ईश्वरान्यो० A. A-A in A only. 20. ०क्षणीयमकरणे C. 21. ०प्रत्यक्षायवमाहेतु० C. 22. कर्त्तरिनन्तरेण C. 23. कार्यनुत्० C.

अत्र वदन्ति—जन्यद्रव्यं जन्यभावं जन्यमात्रं प्रति वा द्रव्यत्वेनोपादानत्वादाद्यजन्यावयवोपादानत्व ब्रह्मण एव, अनन्तपरमाणुतदुपादानकत्वकल्पनापेक्षया[24] ब्रह्मण उपादानकल्पनाया अतिलघुत्वात्; न चैवं दिक्कालगगनमनसामपि द्रव्यारम्भकत्वापत्तिः, ब्रह्मातिरिक्तदिगादौ[25] मानाभावात्, संसार्यात्मनाश्च ब्रह्मानतिरेकात्। अस्तु वा तत्र प्रागभावादिरूपसहकारिविरहात् फलाभावः, नित्यस्य स्वरूपयोग्यस्य[26] सहकार्यवश्यम्भावे[27] मानाभावात्; स्वीक्रियतांवा[28] संसार्यात्मैकत्वव्यावृत्ता भगवदेकत्वसाधारणी द्रव्यारम्भकतावच्छेदिका जातिः, संसारिव्यावृत्ता भगवत्साधारणी तथाविधा जातिरूपाधिर्वा, जातेरसंकीर्णत्वनियमे मानाभावात्, सुखसमवायिकारणतावच्छेदकस्यात्मत्वस्य[29] भगवद्वृत्तित्वे मानाभावाच्च। जन्यपृथिवीत्वाद्यवच्छेदेन पृथिवीत्वादिनोपादेयभावादीश्वरे च पृथिवीत्वादेरभावत्वे तस्य पृथिव्याद्युपादान[त्व]ाभावादिति[30] चेन्न, जन्यतावच्छेदकपृथिवीत्वादेराद्यजन्यपृथिव्याद्यवृत्तित्वात्, ऐश्वर्यसमानाधिकरणपृथिवीत्वादेर्जन्यतावच्छेदकत्वाद्वा। वस्तुतः पृथिवीत्वाद्यवच्छिन्नं प्रत्येव पृथिव्याद्यन्यत्वविशिष्टभगवदन्यत्वाभावेन[31] [32]अखण्डेन शक्तिविशेषेण वा हेतुत्वम्। अस्तु वा जन्यद्रव्योपादानतावच्छेदकस्यैव [33]पृथिव्याद्युपादानतावच्छेदकत्वम्, सहकारिविरहाच्च[34]अन्त्यावयविनीव[35] जलादौ[36] पृथिव्यादेरनुत्पत्तिः। गन्धादिजन्यतावच्छेदकजातेः पुनराद्यपृथिव्यादिगन्धादिव्यावृत्तत्वं[37] तादृशगन्धादावसमवायिकारणविरहेऽपि क्षतिविरहात्। अस्तु वा भगवदेकत्वादिसाधारणशक्तिविशेषेण[38] [39]गन्धस्नेहत्वाद्यवच्छिन्नं प्रत्येव समवायिकारणत्वम्। न चावयवस्य भगवतः परममहत्त्वादवयविनोऽपि

---

24. ०कल्पनात् पक्षया C. 25. ०रिक्ते दिगादो C. 26-27. ०योग्यसहफार्य० C. 28. स्वीक्रियताद्या C. 29. स्वस्वसमवायि० A. 30. ०दानातदिति A. 31. ०भावेनार्थं० A. 32. खण्डनशक्ति० A. 33. पृथिव्यामुपादान० C. 34—36. अन्त्यवयविनीव० A, अन्त्यावयविनीरजनादो C. 37. गन्धव्यावृत्तत्वं A. 38. ०विशेषण C. 39. गन्धसुह० C.

परममहत्त्वापत्तिः, उत्कर्षस्य विशेषविश्रामेण तथा हेतुत्वे मानाभावात्, [40] महत्त्वैकत्वादेरनुगतनित्याखण्डधर्मत्वस्वीकारेऽनुपपत्तिलेशस्याप्यभावाच्च। अथेदानीन्तनत्रसरेणुप्रभृतेरन्यदाऽनुत्पत्तिः[41] यथाकथञ्चित्संयोगविशेषादीनां विरहादुपपद्यते, [42]सर्गाद्यवस्तूत्पत्तिः सर्गान्तरेण[43] भवतु, चरमध्वंसस्य तत्राहेतुत्वात्; प्रलये तदुत्पत्तिश्च कथं न भवति, सामग्र्या वर्त्तमानत्वात् ? अस्मन्मते तु सर्गाद्यद्रव्यप्रागुत्पन्नसंयोगव्यक्तिविलम्बात् प्रलये तदनुत्पत्तिः तत्संयोगानुत्पत्तिश्च, [44]प्रागुत्पन्नक्रियाव्यक्तिविलम्बादेव तत्र तत्रापि तत्संयोगप्रागभावविशिष्टतत्प्रलयस्य द्रव्यप्रतिबन्धकत्वाद्वा तदा द्रव्यानुत्पत्तिः, न त त्वया[45] संयोगादिविलम्बेन विलम्बो[46] वक्तुं [47]शक्यते, प्रलये[48] मूर्त्तमात्राभावेन कर्मसंयोगादीनां सर्वथा चाभावात् सर्गाद्यद्रव्यानुत्पत्त्यापत्तेः[49]।

अत्राहुः—प्रलयेऽपि[50] शब्दजशब्दसन्तानोत्पत्तेस्तत्क्रमात्[51] कार्यक्रमः, प्राथमिकद्रव्यकारणीभूतश्च शब्दो[52] नान्यदाऽस्तीति नान्यदा तदुत्पत्तिः। शक्तिसन्तानक्रमाद्वा कार्यक्रमः, क्षणनामकक्षणिकातिरिक्तपदार्थक्रमात्[53] तत्क्रम इत्यपरे। भूतलादौ घटाभावादेरिव[54] भगवति द्रव्यारम्भकतावच्छेदिकायाः शक्तेरपि कदाचिदेव सत्त्वादन्यदा च शक्तविलम्बाद्विलम्ब [? शक्तिविरहाद्विलम्ब] इति तु नव्याः। प्रलये तदनुत्पत्तेरपि यदा सामग्री (तदा)तदव्यवहितोत्तरक्षणे कार्यमिति व्याप्तेर्न बाधः, [55]प्रलये कार्यमात्रस्यानुत्पत्तावपि[56] क्षणान्तराभावेन प्राथमिकद्रव्योत्पत्तिक्षणस्यैव [57]तदव्यवहितोत्तरक्षणत्वादिति तु तार्किकाः।

40. महात्मक॰ C. 41. ॰पत्तिलेशः C. 42. सर्वेभ्यवस्तू॰ C. 43. A indistinct. 44. तत्प्रागुत्पन्न॰ C. 45. द्वया C. 46. om. A. विलम्यो C. 47. युक्तं A, वुक्तं C. 48. om. C. 49. ॰पत्तिः A. 50. प्रलयऽपि C. 51. ॰पत्तेत्क्रमात् C. 52. ॰भूतशब्दो A. 53. ॰पदानुक्रमात् C. 54. ॰भावादेवी C. 55. प्रायकार्यं C. 56. ॰नुत्पत्ता A. 57. तत्र व्यव॰ C.

सामग्रीनिष्ठकार्योत्पत्तिव्याप्तेर्विशेषविश्रामात् अन्यत्र तथाभावेऽपि प्रकृते न तथा नियमो मानाभावात्, अत एवातिरिक्तध्वंसप्रागभावयोरनभ्युपगमेऽपि न क्षतिरिति [58]सुतार्किकाः। संयोगविशेषस्यासमवायिकारणत्वं [59]पुनराद्यद्रव्यव्यावृत्तधर्मावच्छिन्नं प्रत्येव ब्रह्मनिष्ठशक्तिविशेषेण कार्यद्रव्यमात्रं प्रति वा ; श्रुतिरपि भगवति कार्यजातस्योत्पत्तिलयौ कथयन्ती तदुपादानत्वं स्पष्टमाह, तच्च प्राथमिकद्रव्यं प्रति साक्षात्, अन्यत्र साक्षात् परम्परया वेति ; श्रूयते च—

"ब्रह्मैवेदं सर्वम्" [मुण्डक० २।२।११]
"सर्वं खल्विदं ब्रह्म" [छान्दोग्य० ३।१४।१]
"तज्जलानिति शान्त उपासीत" [छान्दोग्य० ६।२।३]

इति च ; 'कपालं घटो भवती'त्यादौ कपालपदस्य कपालोपादेयादाविव ब्रह्मपदस्यापि ब्रह्मोपादेये निरूढलक्षणावत्त्वात् ।

परे तु यथाश्रुतश्रुत्यनुसाराज्जगत एव ब्रह्मोपादानकत्वं ब्रह्माभेदञ्च स्वीकुर्वन्ति, सोऽयं ब्रह्मपरिणामवादः[60]। [61]ब्रह्मेतराहेतुकमपि [62]प्राथमिकं द्रव्यम्, आगमसिद्धसुखदुःखादिविशेषातिरिक्ते कर्मणो हेतुत्वे मानाभावात्, अतएव [63]प्रलयेऽदृष्टमस्तीत्यत्रापि मानाभावः, [64]सर्गानन्तरं [65]कृतकर्मण एव च सुखाद्युत्पत्तिः[66]। यदि [67]चाकृततत्सर्गीयकर्मणोऽप्येतत्सर्गीयसुखदुःखादिकं [68]प्रमाणसिद्धं तदाऽस्तु तत्र कर्मणोऽहेतुत्वम्, सामान्यतो [69]हेतुत्वस्यागमेनाप्रतिपादनात्, [70]भागवतज्ञानादेश्च भगवदनतिरेकात्, [71]आत्मान्तरस्य भगवदति-

58. स्वतार्किकाः C. 59. पुनराच्च० C. 60. ०परिणवादः C.
61. ब्रह्मतरा० C. 62. ०मलि C. 63. प्रत्यये० C. 64. गर्भानन्तरं C.
65. प्रकृत० C. 66. सुखावुत्पत्तिः C. 67. चाकृते तत्० C.
68. प्रेयाणसिद्धं C. 69. हेतुहेतुत्व० A. 70. भगवत० A.
71. आत्माम्भरस्य C.

रिक्तत्वमतेऽपि मानाभावेन तस्य तत्राहेतुत्वात्, जात्यादेरहेतुत्वस्य सर्वसिद्धत्वात्, प्रागभावस्य चामूलमुन्मूलनात्। भगवति हेतुत्वस्य

"मय्येव सकलं जातम्" [कैवल्य० १६]

इत्यादिश्रुतिसहस्रसिद्धत्वात्। प्रलये किञ्चिदस्तीत्यत्रापि मानाभावः, [72]अभावस्य च[73] बहुशः[74] [75]प्रत्याख्यानात्; भगवदेकत्वपरिमाणादेस्तदतिरिक्ते मानाभावात्, 'एकं ब्रह्मे'त्यादि सहप्रयोगस्य[76] [77]'घटाभावो घटाभाववानि'तिवदुपपत्तेः[78]; विशेषसमवाययोश्च [79]दूरनिरस्तत्वात्। न च जातावपि मानमस्ति। 'अयं घट' इत्यादिबुद्धिरेव मानमिति चेत्; न, तस्या[80] [81]असाधारणतद्व्यक्तिलद्गतासाधारणधर्ममात्रावलम्बनत्वात्[82]; रूपादौ च [83]व्यक्तेरेवासाधारणधर्मत्वात्। बहुषु घटेषु 'घट' [84]इत्यनुगतमतेस्तत्सिद्धिः, न च ब्रह्मणैव सा निर्वाह्या, पटादावपि 'घट' इत्यनुगतबुद्ध्यापत्तेः, अन्यथा तत्र 'पट' इत्यपि धीर्न स्यात्, पटत्वस्यापि ब्रह्मरूपत्वादिति चेन्न, तादृशानुगतमतेः स्ववासनामात्रविजृम्भितत्वात्, अन्यथा सिंहभेकादौ[85] 'हरि'रित्यनुगतमतेः [86]सिंहभेकादिसाधारणहरित्वस्याप्येकस्य सिद्ध्यापत्तेः[87]। अथ हरिपदशक्यत्वेन शक्तिसम्बन्धेन हरिपदेन वा [88]सा मतिर्भवतीति [89]नातिरिक्तहरित्वसिद्धिः, 'हरि'रिति धियो हरित्वांशे लौकिकचाक्षुषमसिद्धमेव; अस्तु वा विशेषणताविशेष्यत्वभावेन[90] तस्यापि लौकिकचाक्षुषत्वमिति चेत्, तुल्यं प्रकृतेऽपि. घटादिपदेन तदधीनशाब्दधीविशेषणत्वात्

72-73. अभावस्यादि C. 74. बहुसत्य C. 75. प्रत्याप्रत्या० C.
76. प्रयोगस्या A. 77-78. घटाभावो घटो भाववान्निति वतपपत्तेः C.
79. पूरनिरस्त० C. 80. तस्या om. C. 81. अवधारण० C.
82. ०वलवत्त्वात् A. 83. व्यक्तित्वेरा० A, व्यक्तिरेवा० C.
84. इत्यर्थं० C. 85. सिंहतेत्यादौ C. 86. सिंहतेजादि० C.
87. ०एकस्य क्वापत्तेः C. 88. साममि० C. 89. नातिहरित्व० C.
90. विशेषणत्वाविशेष्यत्वाभाव्येन C.

तदुपपत्तेः। अतीतानागतघटादेरिदानीन्तनज्ञाने विषयतयेदानीमवस्थानमिवातीतानागतपदादेरपि घटादेरिदानीमवस्थानमपि न दोषाय, कथं वा 'दण्डी'त्याद्यनुगतमतेः[91] दण्डित्वादिकमपि नैकं सिद्ध्यति, परम्परासम्बद्धं[92] [93]दण्डत्वादिकमेव तदिति चेत्, तर्हि दण्डेऽपि तथा प्रत्ययप्रसङ्गः। तत्र तादृशसम्बन्धाभावान्न तथा प्रत्ययः, 'दण्डः' 'दण्डी'ति [94]प्रत्यययोर्धर्मिणि दण्डत्वरूपैकप्रकारत्वमिष्यत एव, सम्बन्धविशेषविषयकत्वात्तु बुद्ध्योर्विशेष इति चेन्मैवम्[95], अग्रणैव घटादिस्वरूपसम्बन्धेन 'घट' इत्याद्याकारकानुगतमतिरस्तु, किमतिरिक्तेन सामान्येन। वस्तुतोऽनुभूयमानत्वात्तद्घटवृत्तित्वमनुभवबलात् कल्प्यते [96]लाघवान्नत्वतिरिक्तं सामान्यम्, [97]'दण्डिमानि'त्यादावपीयमेव गतिः[98]। न चैवं सर्वत्रैव [99]घटे 'तद्रूपवानि'ति प्रत्ययः स्यात्, तत्त्वावच्छिन्नाधारतायाः सर्वत्राभावान्निरवच्छिन्नाधारतया एव सर्वत्र घटे स्वीकारात्, आधारतायाः स्वरूपानतिरेकेऽपि प्रत्ययवैचित्र्यस्य त्वयाऽपि स्वीकारात्; अस्तु वाऽनुगतमतिरिक्तं घटत्वादि, न च प्रलये[100] तदस्तीत्यत्र मानमस्ति। अथ तेषामुत्पत्तिविनाशयोर्मानाभावादविनाशिनोऽनुत्पन्नस्य च सदातनत्वात् प्रलयेऽप्यवस्थानं सिद्ध्यतीति चेन्न, [101]तादृशामसार्वत्रिकत्वेनैवाऽसदातनत्वेऽपि [102]क्षतिविरहात्। न च घटादेरप्येवमेव कादाचित्कत्वोपपत्तौ तद्ध्वंसादिविलोपप्रसङ्गः, तेषां स्वतन्त्रप्रतीतिसिद्धत्वात्। अथैवं पूर्वसर्गविनष्टानामेव घटादीनां[103]सर्गान्तरे, [104]पूर्वपूर्वसमयविशिष्टानाञ्च [105]तेषामुत्तरोत्तरसमये समुत्पत्तिरङ्गीक्रियताम्, अतिरिक्तघटादिकल्पने गौरवान्मानाभावाच्च। अतएव—

---

91. ०मभे A. 92. ०सम्बद्धे C. 93. दण्डीत्वा० A. 94 प्रत्ययोः० C. 95. चेन्न न्वेवं A, C. 96. लाघवात्त C. 97. सत्तिमानि० A. 98. पीयामरगतिः C. 99. घटितरूप० C. 100. प्रत्यये A. 101-102. तादृश्या सार्वत्रिकत्वस्त्वे वा सदा० A, तादृशस्य सार्वत्रिकत्वावा सदा० C. 103. गर्गान्तरे C. 104. ०समय० om. C. 105. च om. C.

"पुनः स भविता कृष्णः[106] पुनः स एव राघवः[107] ।
[108]पुनः कंसो [109]रावणश्च पुनर्युद्धं तयोस्तयोः ॥"

इति सर्वानुभवः, 'पुनरुत्पन्नास्त एव [110]केशा' इत्यपि । प्रतियोगिनः सत्त्वदशायाञ्च ध्वंसप्रागभावयोस्तयोरद्वैतमते[111] प्रतियोगिनि तयोः प्रतियोगित्वस्य विरहादेव न तदा तत्र तयोः[112] प्रत्ययः, [113]ध्वंसादिश्चातिरिक्तो वाऽधिकरणस्वरूपो वेत्यन्यदेतत् । 'सर्गान्तरभावी[114] घट इदानीं विनष्ट' इति च न प्रत्ययः, इदानीन्तनत्वविशिष्टविनाशे भावित्वविशिष्टघटप्रतियोगिकत्वाभावात्, एतत्सर्गावच्छिन्नघटादौ पूर्वसर्गावच्छिन्नघटादिभेदस्यापि च सत्त्वान्न[115] [116]तत्प्रलयानुपपत्तिः । एवमेव क्षणबुद्ध्यादीनामपि कादाचित्कत्वम् । न चैवमुत्पत्तिप्रत्ययो न स्यात्, स्वाधिकरणसमयध्वंसानधिकरण[117]समयसम्बन्धरूपोत्पत्तेरप्रसिद्धेरिति वक्तव्यम्; तत्क्षणवृत्तित्वावच्छिन्नतत्क्षणा[118]ऽव्यवहितपूर्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्यैवोत्पत्तिपदार्थत्वात्, द्वितीयादिक्षणवृत्तित्वञ्च न[119] प्रथमक्षणवृत्तिप्रागभावप्रतियोगितावच्छेदकमिति नातिप्रसङ्गः, अव्यवहितपूर्वत्वञ्च तत्प्रागभावाधिकरणसमयप्रागभावानधिकरणत्वम्, क्षणानाञ्च न पुनरुत्पत्तिरित्युभयसिद्धमतो नाप्रसिद्धिस्तदवस्था[120] । वस्तुतस्तु तत्र तत्र तत्तत्क्षणवृत्तित्वमेवोत्पत्तिः[121], "स्वाधिकरणसमयध्वंसे"त्याद्युक्तेरपि विशेष एव विश्रामात्, एवञ्च विभिन्नसर्गीययावत्तद्[122] घटोत्पत्त्यधिकरणक्षणयोरभेदेऽपि[123] न क्षतिः । 'उत्पन्न' इत्यनुगतप्रतीतिसाक्षिकोऽखण्ड एव कश्चन धर्म उत्पत्तिः, तस्याश्च[124] कदाचित्-

---

106. कृष्टः C. 107. लाघवः A, C. 108. पुनः काशो A, पुनर्कासो C. 109. वारणश्च C. 110. ०पन्नास्तव C. 111. ०स्तयोवत्वेतमते A, ०स्तयोरद्वैतमते C. 112. तयोश्च C. 113. ध्वंसापिश्चाति० C. 114. सर्गान्तवद्भावी C. 115. सत्त्वानु C. 116. तत्प्रत्यया० C. 117. ०ध्वंसाधिकरण० C. 118. ०तल्लक्षणा० C. 119. ज om. C. 120. नाप्रसिद्धितदवस्था C. 121. ०पत्तिश्च A. 122. ०क्षणक्षणयोरभेदेऽपि C. 124. स्याच्च A.

कत्वक्वाचित्कत्वे प्रतीतिबलाद् व्यवस्थाप्ये—इत्यपि वदन्ति। परे पुनरेतत्सर्गीयत्वादिना "स्वाधिकरणे"त्यादौ[125] समयं[126] विशेषयन्ति, विशेषयन्ति च तादृशसमयसम्बन्धं प्रागभावप्रतियोगिविशिष्टत्वेन। तेन घटत्वादेर्नोत्पत्तिसत्त्वमिति चेदेवमेवेत्येकदेशिनः। अन्ये तु निरधिकरणघटत्वादिमत्तया तत्तदवच्छेदेन ब्रह्मण एव भाणम्, अतएव प्रत्ययमात्रस्यैवायथार्थत्वम्, घटत्वादिभिर्ब्रह्मणो असम्बन्धात्। शुक्तिरजतयोः 'इदं रजतमि'ति प्रत्ययस्य भ्रमत्वप्रमात्वव्यवहारश्च [127]भ्रमत्वप्रमात्वाखण्डधर्मबलादेव[128], घटत्वादयो वृत्तिरूपाः प्रत्ययाः, क्षणाश्च कादाचित्का एव, अप्रतीयमानदशायान्तु न कस्यापि सत्त्वं मानाभावादित्याहुः।

यद् वा—प्रसङ्गाद्धेतुतयेश्वरं व्यवस्थापयति—ईश्वरः कारणमिति। क्षित्यादाविति शेषः। ईश्वरः उपादानगोचरापरोक्ष[129]ज्ञानचिकीर्षादिमान्। क्षित्याद्युपादानगोचरापरोक्ष[130]ज्ञानकृतिमज्जन्यं वेति[131] फलितार्थः। समवेतत्वे सति कार्यत्वादिति स्पष्टो हेतुः। ईश्वरः [A]साक्षात्कारादिमान्[A], साक्षात्कारादिर्वा कारणम्, तथा चोक्तानुमानसहायकस्तर्कः प्रदर्शितः। ननु क्षित्यादिकमपि कर्मद्वारा अस्मत्कृत्यादिजन्यमेव[132] [133]भविष्यतीति [134]किं तदर्थमीश्वरस्वीकारेणेत्यत आह —[135]पुरुषेति। पुरुषकर्मणि सत्यपि फलं न दृश्यते इत्यन्वयव्यभिचारान्नादृष्टहेतुत्वमिति भावः। [136]आक्षिपति—नेति। अन्वयव्यभिचारश्च कारणान्तराभावायत्तो त दोषायेति भावः[137]।

यद् वा—पुरुषेति क्षित्यादेः पुरुषकर्मजन्यत्वे मानाभावादित्यर्थः।

---

125. ०करणे आदौ C. 126. समयो A, C. 127. प्रमात्वभ्रमत्वा० A, C. 128. ०धर्मिवशादेव C. 129. ०गोचरापक्ष° C. 130. ०गोचा परोक्ष° C. 131. ०जन्यस्वेति A, C. A–A. in A only. 132. ०कृतादिजन्यमेव A, C. 133. तरिष्यतीति C. 134. किं तुदनुमीश्वर० C. 135. पुरुषिति C. 136. आकृतिनेति A. 137. भान: A.

शङ्कते—नेति । कार्यमात्रं प्रति तस्य हेतुत्वमेव[138] मानमिति भावः । समाधत्ते—तदिति । तत्पदमीश्वरमपरोक्षज्ञानादिमद्रूपं परामृशति[139] तथा च कार्यमात्रस्यैव ज्ञानादि यतो [?] ज्ञानादेर्वा साक्षाज्जन्यत्वात् ईश्वरप्रत्याख्यायको[140] हेतुरहेतुः, अदृष्टजनकीभूतकृत्यादि वा साध्यान्तर्भूतहेतुशून्य इति न सिद्धसाधनमिति भावः ।

यद् वा—ननु [141]अदृष्टसमानाधिकरणकृतिजन्यत्वं चेष्टाजन्यत्वं वाऽत्रोपाधिः,[142] तथा च तदभावेन पक्षे साध्याभावः साधनीय इत्यत आह—पुरुषेति । पुरुषकर्मादृष्टसमानाधिकरणकृतिश्चेष्टा वा, तद्फलत्वस्य कृत्यादिजन्येऽङ्कुरादौ दर्शनादित्यर्थः । तथा च नोपाधेः साध्यव्यापकत्वम्, न वा तदभावस्य साध्याभावव्यापकत्वमिति भावः । शङ्कते—नेति । कृत्यादिजन्ये पुरुषकर्मफलत्वमिति शेषः । [143]फलानिष्पत्तेः कृतिफलानिष्पत्तेः । अङ्कुरादौ कृतिजन्यत्वन्तु नाद्यापि सिद्धमिति भावः । समाधत्ते—तदिति । कार्यमात्रस्यैवं कृत्यादिजन्यत्वात् कार्यत्वकृतित्वादिना कार्यकारणभावात् क्षित्यादौ कृत्यादिजन्यत्वाभावसाधनायोपन्यस्तोऽदृष्टसमानाधिकरणकृतिजन्यत्वाभावो न हेतुर्व्यभिचारीति यावत्, [144]साध्यत्वेनोपाधिव्याप्यमित्यर्थः ।

इदं पुनरिहावधेयम्—कार्यमात्रं प्रति [145]शाब्दानुमित्युपमितिचाक्षुषत्वादिना मत्सरत्वमायात्वदानत्वयागत्वादिना प्रवृत्तित्वनिवृत्तित्वादिना द्वेषत्वसुखदुःखत्वादि[ना] वह्नित्वधूमत्वतृणत्वादिना[146] च यथा न हेतुत्वं मानाभावात्, क्वाचित्कसहचारदर्शनस्य चाप्रयोजकत्वात्, तथा ज्ञानत्वादिनापि व्यभिचारसंशयस्योभयत्रापि[147] [148]तुल्यत्वाल्लाघवेन व्यभिचारनिश्चयाच्च, अन्यथा व्यक्त्यन्तरकल्पनापत्तेः, अवच्छिद्यते च

---

138. हेतुत्वभानमेव C. 139. परामृत्तिभि C. 140. ०प्रत्यायको A. 141. दृष्टसमाना० C. 142. वाऽत्रोपविष्टाः C. 143. फलनिष्पत्तेः C. 144. साध्यत्वानोपधि० C. 145. शब्दार्थमित्युप० C. 146. ०धूमत्वदृशत्वादिना C. 147. ०उभयत्रादि C. 148, तुस्यत्वाल्लाघवेन C.

लाघवेन ज्ञानत्वेच्छात्वयत्नत्वादिनाऽस्मज्ज्ञानेच्छादिजन्यत्वम्, तस्मात्[149] श्रुतिरेव तत्र मानमित्यन्यत्र विस्तरः ॥ २१ ॥

॥ समाप्तमीश्वरोपादानतानिराकरणप्रकरणम्[150] ॥

आकस्मिकत्वं निराकर्त्तुमाशङ्कते—

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥ २२ ॥

[1]तसिल् प्रथमान्तात्। भावः कार्यम्, तथा च [2]कार्यमहेतुकम्, उत्पत्तिमत्त्वात्, कण्टकतैक्ष्ण्यादिवत्। कार्यत्वं प्रागभावप्रतियोगित्वम्; तैक्ष्ण्यं[3] संस्थानविशेषः, स [4]चाहेतुक इत्यभिमान इति प्राञ्चः। उत्पत्तिमदहेतुकम्, भावत्वात्, कण्टकतैक्ष्ण्यादिवद् गगनादिवद्वेति[5] भाव इति तु नव्याः। कण्टकतैक्ष्ण्यादीति दृष्टान्तार्थम्, दर्शनादित्येव हेतुरित्यपरे। सहेतुकत्वञ्च[6] तेषामसत्ख्यात्युपनीतमिति नाप्रसिद्धिरिति वदन्ति। घटादिकं प्रत्यन्यथासिद्धे तन्नियतपूर्वसत्त्वस्य, नियतपूर्ववर्त्तिनि वाऽनन्यथासिद्धत्वस्य, वह्नित्वादौ वा [7]धूमादिव्यापकतावच्छेदकत्वस्य, धूमादिमन्निष्ठाभावप्रतियोगिताविशेषावच्छेदके वा भेदप्रतियोगितावच्छेदकत्वस्याभावो धर्मत्वादिना साधनीय इत्यपि प्राहुः। निमित्तपदमुपादानकारणपरम्, तसिल्[8] प्रथमया[9] पञ्चम्या वा, एवेति शेषः। अनुपादानत एव, उपादानतो न भावोत्पत्तिरित्यर्थः। कार्यमनुपादानकं कार्यत्वाद् ध्वंसवत्, भावत्वाद्वा गगनादिवदिति तु भाव इति वस्तुगतिः ॥ २२ ॥

---

149. तस्मा C. 150. ०निराकरणव्याकरणम् C.

1. सिन C. 2. कार्यं न हेतुकम् C. 3. क्षण्यं C. 4. च हेतुक C. 5. गगनादिवत्त्वेति C. 6. सहेतुकेञ्च C. 7. धूमदेर्व्यापक० C. 8. तस्मिन् A. 9. प्रथमयोः C.

राद्धान्तसूत्रम्—

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥

कार्यमात्रं नानिमित्तकम्, [10]अनिमित्ते निमित्तस्य प्रमाणस्य [11]त्वयाप्य-भ्युपगमात्। तथा च तस्यामेव प्रमायां व्यभिचाराच्च[12] [13]कार्यत्वादिक-महेतुकत्वव्याप्यमिति भाव इति प्राञ्चः। कण्टकतैक्ष्ण्यादिकमपि ना-निमित्तकम्, तत्रान्ततो निमित्तकारणभिन्नस्योपादानादेरेव निमित्तत्वात्, अनिमित्तस्य कण्टकावयवादेरुपादानत्वाद्वेति दृष्टान्तासिद्धिरिति तु नव्याः। [14]न निमित्तं प्रमाणं यत्र[15], तथा चाप्रमितनिमित्तत्वान्नि-मित्तस्याप्रसिद्धेरनिमित्तकं साधयितुं न शक्यते इति वा सूत्रार्थः ॥२३॥

दूषणान्तरमाह—

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥ २४ ॥

[16]अर्थान्तरभावात् प्रमाणसिद्धभेदात्। प्रतियन्ति[17] च लौकिका इदं [18]निमित्तमिदमनिमित्तमिदमुपादानमिदमनुपादानमिति, तथा च बाध इति भावः। अर्थान्तरभावात् प्रतियोग्यनुयोगिभावात्, तथा च साध्याप्रसिद्धिर्बाधो[19] वेति भाव इत्यप्याहुः। [20]अन्यथासिद्ध्य-निरूपकनियतपूर्ववर्त्तितावच्छेदकधर्मवत्त्वं हि कारणत्वम्, वह्नित्वादि च धूमत्वादेस्तथा, व्यभिचाराभावात्, अन्यथासिद्धिनिरूपकगगनत्वादितो भिन्नत्वाच्च। अन्यथासिद्धिनिरूपिका व्यापकता न कारणतायां निविशते, गौरवात्, तया कारणव्यवहारविरहाच्च। अनिरूपकान्तश्च नियमविशेष-परिचायकम्, न तु कारणताघटकमित्यन्यत्र विस्तरः।

---

10. अनिर्मित्तनिमित्तस्य A. 11. द्वयाभ्युपगमात् C. 12. व्यभिचारान् C. 13. कार्यादिक० A. 14. न om. C. 15. यन्न C. 16. द्रव्यान्तर-भावात् A, C. Emended in the light of the Sūtra. 17. प्रतियन्तीय C. 18. निमित्त० om. C. 19. ०प्रसिद्धिर्बारे A. 20. अन्यथासिद्धिनिरूपक० A.

नव्यास्तु त्रिसूत्रीमेवं व्याचक्षते—प्राथमिकं कार्यद्रव्यमनिमित्तकमनुपादानकञ्चा[21], तथात्वे मानाभावात्, कण्टकतैक्ष्ण्यादिवत्। न हि [22]त्र्यणुकरूपप्राथमिककार्यद्रव्यस्योपादानादौ [23]मानमस्तीति प्रत्ययकृतार्थः[24][१]। उत्तरसूत्रार्थस्तु—न निमित्तं यस्य तदनिमित्तं परमाणुप्रभृतिः, [25]तन्निमित्तकत्वात्[26] तदुपादानकत्वाच्च[27] नानिमित्तकमनुपादानकं प्राथमिककार्यद्रव्यम्, तद्रूपेणैव तत्सिद्धेरिति। ननु परमाणुप्रभृत्येवासिद्धं मानाभावात्, प्राथमिककार्यद्रव्यस्य चाद्यापि[28] सोपादानत्वाद्यसिद्धेरित्यत आह तृतीयम्; निमित्तं निमित्तकारणं कालादि[29], अनिमित्तमुपादानकारणम्, तयोर्भावकार्यमात्र एवार्थान्तरभावात् कारणत्वात् परमाण्वादेरप्रतिषेध[30] इति तदर्थः। यद् वा—ननु निमित्तस्यानिमित्तत्वं विरुद्धमिति छलवादिनं[31] निरस्यति—निमित्तानिमित्तयोरिति। अर्थान्तरभावात् भेदात्। अनिमित्तपदं बहुव्रीहिणाऽनिमित्तकपरमिति भाव,।

अत्र वदन्ति—कार्यमात्रे कार्यद्रव्यमात्रे कार्यपृथिव्यादिसामान्ये वा उपादानादिहेतुत्वे मानाभावाद्घटादौ कपालादेश्च विशिष्यैव हेतुत्वात् त्रसरेणुप्रभृति[32]कार्यद्रव्यं सर्गाद्योत्पत्तिकं कार्यान्तरञ्चा[33] अनुपादानात्येव[१०नकमेव], [34]कादाचित्कस्येव[35] [36]क्वाचित्कस्यापि सहेतुकत्वानियमात्, अन्यत्राऽन्यदाऽपि स्यादित्यत्र चापादकाभावादित्यत्र विस्तर इति ॥ २४ ॥

॥ समाप्तमाकस्मिकत्वनिराकरणप्रकरणम् ॥

---

21. अनुपादानकत्वा C. 22. अणुक० C. 23—24. मानसं न प्रत्यतथा C. 25-26. अनिमित्तकत्वात् A, तन्निमित्तकत्वाच्च C. 27. तदुपादानकत्वाच्च om. C. 28. चात्यपि A. 29. ज्ञानादि C. 30. परमाण्वादेव प्रतिषेधः C. 31. मिति न वादिनं C. 32. त्रसरेणुप्रत्यभि C. 33. कार्यान्तरष्टा C. 34-35. कादाचित्कस्येव om. A. 36. कादाचित्कस्यापि C.

अथ सर्वानित्यत्वनिराकरणप्रकरणम्[1] । तत्राक्षेपसूत्रम्—

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥

अनित्यत्वं ध्वंसप्रतियोगित्वं ध्वंसो वा, उत्पत्तिधर्मकस्य [2]विनाशधर्मकत्वादिति व्याप्तिप्रदर्शनम् ; तथाचोत्पत्तिमत्त्वादिति हेतुः, उत्पत्तिमच्च सर्वम्, मेयत्वादिति[3] भाव इति प्राञ्चः। उत्पत्तिविनाशधर्मकधर्मकत्वादित्यर्थः। उत्पत्तिविनाशधर्मकश्च ज्ञानादिसर्वेषां धर्मः[4], हेतौ च न [5]व्यर्थविशेषणत्वं दोषाय, प्रयोजनञ्च विनाशिधर्मवत्त्वेन विनाशित्वमिति तर्कप्रदर्शनायेति तत्त्वम् ॥ २५ ॥

समाधत्ते—

नानित्यतानित्यत्वात् ॥ २६ ॥

'अनित्यतानित्यत्वात् [इति][7] । अनित्यताया ध्वंसस्यैव नित्यत्वात् [अविनाशित्वात्][8] न सर्वमनित्यम्, अन्यथा भावोन्मज्जनापत्तेः, तथा च बाधो व्यभिचारो वेति[9] भावः ॥ २६ ॥

आक्षिपति—

[10]तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ २७ ॥

तस्य ध्वंसस्यापि [अनित्यत्वम्] ध्वंसः। नन्वेवं भावोन्मज्जनापत्तिः, [11]तद्ध्वंसप्रागभावानधिकरणसमयस्य तदधिकरणत्वनियमादित्यत आह

1. सर्वानित्यत्वप्रकरणम् A. 2. विनाशकर्मक० A, C. Emended in the light of the Sūtra. 2. सर्वमेयत्वात् C. 4. ज्ञानादि सर्वेषाद्धर्म C. 5. व्यनुविशेषण० C. 6-7. अनित्यतानित्यत्वात् om. C. 8. Added in the light of न्यायसूत्रवृत्ति of Viṣvanātha. ध्वंस cannot be regarded as नित्य in the usual sense, since it is produced. Viṣvanātha's comment seems to be based on dictums like अनित्यत्वं विनाशाख्यं क्रियासामान्यमुच्यते, which is quoted in न्यायकन्दली of Śrīdhara. 9. व्यभिचारादिति A. 10. तदनित्यत्व अग्ने० A. 11. तध्वंस० A, C.

—अग्नेरिति। दाह्यविनाशोत्तरमग्नेर्नाशेऽपि यथा न दाह्योन्मज्जनं तथा प्रकृतेऽपि ; [12]प्रतियोगिध्वंसध्वंसस्यापि[13] प्रतियोगिध्वंसत्वादिति[14] भावः। दाहकनाशे यथा न दाह्योन्मज्जनमप्रयोजकत्वात्, तथा ध्वंस-नाशेऽपि न प्रतियोग्युन्मज्जनमप्रयोजकत्वेनोक्तनियमाभावादिति[15] भावः। अग्नेर्दाह्यविनाशानन्तर[16]विनाशप्रतियोगित्ववद् घटध्वंसस्यापि [17]घटविनाशानन्तरविनाशप्रतियोगित्वम्। तथा च घटविनाशो[18] घटविनाशान्तरं जनयति, तदनन्तरं स्वयं नश्यति, एवमेवोत्तरत्रेति भाव इत्यप्याहुः॥ २७॥

समाधत्ते—

नित्यस्याप्रत्याख्यानं यथोपलब्धि व्यवस्थानात्॥ २८॥

अप्रत्याख्यानमनिराकरणम्। यथेति। धर्मिग्राहकमानसिद्धत्वादित्यर्थः। गगनादेर्नित्यत्वं लाघवसहकृतधर्मिग्राहकमानसिद्धमिति बाध इति भावः॥ २८॥

॥ समाप्तं सर्वानित्यत्वनिराकरणप्रकरणम्॥

12. प्रतियोगि० om. A. 13. ध्वंसः। नन्वेवं भावोन्मज्जनापत्तिस्तद्ध्वंस add. A, a case of partial dittography. 14. ०ध्वंससत्त्वादिति A. 15. ०नियताभावादिति C. 16. विनाश्यान्तर० A. 17. घटविनाशान्तरानन्तर० C. 18. ०विनाशो C.

यस्य कस्यचिन्नित्यस्य सिद्धौ तद्दृष्टान्तेन सर्वनित्यत्वं शङ्कते—

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥

नित्यत्वं सदातनत्वम्, कालत्वव्यापकमिति यावत्। ध्वंसस्य प्रागभावस्य च प्रतियोगितासम्बन्धेनाभाववत्त्वम्, ध्वंसप्रागभावयोः स्वतन्त्रप्रतीतिसिद्धयोः सांख्यैरप्यनपलापात्[1]। अत्यन्तान्योन्याभावान्यत्वव्यापकभेदप्रतियोगितावच्छेदकानुयोगिता[2]सामान्यकत्वं वा तत्। पञ्चभूतनित्यत्वादिति[3] व्याप्तिप्रदर्शनाय, पञ्चेति भूतमात्रलाभाय, भूतमात्रस्यैव नित्यत्वादित्यर्थः। तथा च भूतत्वादिति हेतुः, गगनादिकं तु स्पष्टो दृष्टान्तः। पञ्चभूतनित्यत्वादिति दृष्टान्तप्रदर्शनाय, भूतपञ्चकञ्च पृथिव्यादिपरमाणुगगनात्मकम्, दृष्टान्ते सहचारस्यापि प्रयोजकत्वात् पञ्चमी नानुपपन्नेत्यपि वदन्ति। भूतत्वमिह विशेषगुणवत्त्वं गुणवत्त्वं वा[4], तद्वदेव च[5] पक्ष इति नासिद्धिः। भूतत्वं धर्मवत्त्वमिहेत्यपरे[6] ॥ २९ ॥

समाधत्ते—

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥

उत्पत्तिविनाशयोस्तत्कारणस्य [7]चोपलब्धेरित्यर्थः। कारणोपादानञ्च प्रमाणदार्ढ्याय, तथा च बाधव्यभिचाराविति[8] प्राञ्चः। तयोः कारणतः[9] प्रमाणत उपलब्धेरिति नव्याः। प्रतियन्ति च लोका 'इदमुत्पन्नं नष्टमिद'मिति ॥ ३० ॥

उत्पत्तिविनाशकारणोपलब्ध्याऽनुमानविषया पक्षतावच्छेदकसामानाधि-

1. ॰प्यनपलापाठ A. 2. ॰वच्छेकानुप्रतियोगिता॰ C. 3. नित्यत्वादि C. 4. गुणवत्तया C. 5. त A. 6. ॰वत्त्वमित्यपरे A. 7. तोपलब्धे॰ C. 8. बाधव्यभिचारादिति A, C. 9. कारणात् C.

करण्येनानित्यत्वं साधयति, नित्यत्वसिद्धिं प्रतिरोधयति[10] च सिद्धान्तीत्य-भिमानेन शङ्कते—

तल्लक्षणावरोधादप्रतिषेधः ।। ३१ ।।

तल्लक्षणेन [11]भूतलक्षणेन भूतत्वेन अवरोधात् प्रतिरोधात्, नित्यत्वप्रतिषेध-सिद्ध्यभाव इत्यर्थः ।

यद् वा—तल्लक्षणस्य उत्पत्तिविनाशलक्षणस्यावरोधात्[12] [13]प्रसिद्ध-नित्यत्वसिद्धौ[14] प्रतिषेधो नेत्यर्थः । अत्र पूर्वसूत्रेण प्रत्यक्षबाध एवा-भिहितो न तु प्रतिरोध इत्याशयेन[15] सूत्रान्तरं कृतमिति प्राच्यः पन्थाः ।

"नोत्पत्तितत्कारणोपलब्धे"रिति राद्धान्तसूत्रान्तरमिच्छन्ति परे । अत्रोत्पत्तिपदं विनाशस्याप्युपलक्षकम्, तथा चोत्पत्त्यादिकं प्रत्यक्षेणोप-लब्धमिति बाध इति भावः ।। ३१ ।।

ननूत्पत्त्यादिप्रत्ययो[16] [17]भ्रमत्वादसाधक इत्यत आह—

न व्यवस्थानुपपत्तेः ।। ३२ ।।

तेषां प्रत्ययानां भ्रमत्वमिति न, बाधकं विना प्रतीतेर्भ्रमत्वे वस्तुव्यवस्थानु-पपत्तेरित्यर्थः ।

यद् वा—ननु [18]स्वायम्भुवानामस्माकं [19]भेदाभेदवादिनां मतेऽस्तु सर्वेषामनित्यानामपि नित्यता, अविरोधादित्यत आह—न व्यवस्थेति । [20]अप्रामाणिकभेदाभेदस्वीकारे सर्वेषां[21] सर्वत्र भेदाभेदापत्तेर्भाना-भावस्तुल्य एवेत्यर्थः ।

---

10. प्रतिबोधयती C. 11. भूततल्लक्षणेन A, भूतल्लक्षणेन C. 12. ०लक्षणस्याविरोधात् C. 13. प्रसिद्धोनभ्यस्व० A. 14. ०सिद्धिं A, ०सिद्धौ om. C. 15. न add. C. 16. ननुत्पद्यादिप्रमेयो C. 17. वसत्वादसाधक C. 18-19. स्वायस्तुवानस्माकं A, ह्वायस्तुवालास्माकं C. Emended in the light of न्यायवार्त्तिकतात्पर्यटीका. 20. अमाणिक० 21. वेंषां C.

[22]नव्यास्तु — [23]तल्लक्षणानामुत्पत्तिविनाशोपलब्धिलक्षणानामवरोधादप्रामाण्यादप्रतिषेध इति पूर्वपक्षः। न तेषामप्रामाण्यम्, बाधकं विना प्रतीतीनामप्रामाण्ये[24] व्यवस्थानुपपत्तेरिति राद्धान्तः। न व्यवस्थेत्यतः पूर्वं "नोत्पत्तितत्कारणोपलब्धे"रिति सूत्रमस्त्वे—नाप्रामाण्यम्, तथोपलब्धेर्बाधकशून्यत्वादिति शेषः। स्वरसत इत्यादिर्वा। ननु [25]भूतार्थनित्यत्वनियम एव बाधक इत्यत आह—न व्यवस्थेति। यथा तथा कल्पितनियमो न स्वारसिकप्रतीतेर्बाधको [26]वस्तुव्यवस्थानुपपत्तेः, वस्तुत्वेन घटादित्वनियमबलेन पटादौ घटादिभेदानुभवस्यापि[27] भ्रमत्वापत्त्या पटादेरपि घटादित्वापत्तेरित्यर्थः। तल्लक्षणेति सूत्रेण भेदाभेदवादिनो वा पूर्वपक्षः, भूतलक्षणस्य भूतत्वस्य अवरोधात्[28] योगान्नित्यस्याप्रतिषेधः, भूतत्वेन नित्यत्वस्याप्यवधारणादिति भावः। अप्रामाणिकनियमबलेनाप्रामाणिकभेदाभेदस्वीकारे सर्वस्य सर्वभिन्नाभिन्नतापत्तेर्नैवं भेदाभेद इति न व्यवस्थेत्यस्यार्थ[29] इत्याहुः ॥ ३२ ॥

॥ समाप्तं [30]सर्वनित्यत्वनिराकरणप्रकरणम् ॥

22. पूर्वंनोत्पत्य नव्यास्तु C. 23. तल्लक्षणानुत्पत्ति० A, तद्वक्षणानामुत्पत्ति० C. 24. प्रतीतीनामप्रामाण्यं A. 25. भूतानुनित्यत्व० C. 26. वस्तु० om. C. 27. ०भेदानुतरस्यापि A. 28. अविरोधात् A, अवरोधात् not in C. Emended in the light of the Sūtra. 29. व्यवस्थेत्यस्यानु C. 30. सर्वंनित्यत्व० A, सर्वंमित्यत्व० C.

कश्चित् सर्वपृथक्त्वं शङ्कते—

सर्वं पृथग् भावलक्षणपृथक्त्वात् ।। ३३ ।।

सर्वं वस्तु घटपटादि स्वस्मात्[1] पृथक्, भावलक्षणानां[2] तद्वृत्तिधर्माणां नीलपीतादितः ततः[3] पृथक्त्वात्, तस्य च [4]स्ववृत्तिनीलाद्यभिन्नत्वात्, 'नीलो घट' इत्यादिप्रतीतेरित्यर्थः । एवञ्चायं घटः एतद्घटभिन्नः[5], एतद्घटवृत्तिधर्मत्वात् [6]धर्मस्वरूपत्वात् रसाद्यात्मकत्वस्य तस्य[7] प्रदर्शितत्वात्, स्वरूपासिद्धेश्च निराकृतत्वात् ।। ३३ ।।

समाधत्ते—

नानेकलक्षणैरेकभावनिष्पत्तेः ।। ३४ ।।

अनेकैर्धर्मिरूपादिभिर्विशिष्टस्य एकस्य धर्मिणो निष्पत्तेः रूपादीनां समवाय एव धर्मिणि नाभेद इति स्यरूपासिद्धिः, 'नीलो घट' इत्यादिप्रतीतीनां नीलरूपवदभेदस्यैवावगाहनाच्च [8]अप्रयोजकत्वमपीति भावः ।। ३४ ।।

समाधानान्तरमाह—

तल्लक्षणव्यवस्थानादेवाप्रतिषेधः ।। ३५ ।।

तेषां रूपादीनां लक्षणं त्वगग्राह्यचक्षुर्ग्राह्यगुणत्वादि, तद्व्यवस्थितेर्घटादीनां रूपादितो भेदप्रतिषेधोऽभेदो न, घटादीनां [9]त्वग्ग्राह्यत्वादित्यर्थः । यद् वा—तेषां रूपादीनां लक्षणं प्रत्ययः, तद्व्यवस्थानात्[10] [11]तन्नियमात्, 'घटे रूपमि'त्यादिप्रतीतेर्'घटो रूपमि'त्याद्यप्रतीतेश्च नाभेद इत्यर्थः ।

केचित्तु—"सर्वं पृथगि"ति सूत्रम् अभेदनिराकरणाय राद्धान्तिनः,

---

1. अस्मात् C. 2. ०लक्षणा जानां C, 3. तस्य: C. 4. स्ववृत्त० C. 5. एतद्घटभिन्न: om. C. 6-7. धर्मस्वरूपत्वात् रसत्वत्वात्कस्य A, धर्मत्वारूपत्वात् रसद्वात्वात् कस्य C. 9. त्वग्राह्य C. 10. ०व्यवस्थान C. 11. तुन्नियात् C.

सर्वं रूपादितः पृथगेवात्यन्तभेदवत्[12], घटादिधर्माणां घटादितोऽत्यन्तपृथक्त्वात्, एवं व्याप्तिप्रदर्शनेन घटादिधर्मत्वादिति पर्यवसितो हेतुः, दृष्टान्तश्च घटत्वादिकमिति भावः। अत्र सामान्यतो व्याप्तिमभिप्रेत्य व्यभिचारमाशङ्कते—नानेकेति। अनेकलक्षणैः [13]प्रमेयत्वज्ञेयत्वसाक्षात्क्रियमाणत्वादिभिर्भगवत्साक्षात्कारप्रमाज्ञानादिभिर्वा एकस्य[14] धर्मिणो भगवज्ज्ञानादेर्निष्पत्तेः भगवज्ज्ञानधर्मस्यापि भगवज्ज्ञानस्य तद्भिन्नत्वाभावाद्[15] व्यभिचार इति भावः। विशेषव्याप्तिमभिप्रेत्य समाधत्ते—तल्लक्षणव्यवस्थेति। घटादिधर्मत्वस्य हेतूकरणान्न व्यभिचार इति भावः। यद् वा—अप्रयोजकत्वं शङ्कते—नानेकेति। [16]अनेकधर्मैः रूपत्वादिमद्भिरेकस्य धर्मिणो[17] निष्पत्तेः, अभेदे तृतीया, 'नीलो घट' इत्यादिप्रतीतेरिति भावः। राद्धान्तसूत्रम्—तल्लक्षणेति। पूर्वमेव व्याख्यातार्थमेतदिति प्राहुः। चक्षुर्मात्रग्राह्यजातिमत्त्वादेरेव[18] च रूपादिलक्षणत्वात्, रूपत्वाद्यंशे[19] च सत्त्वात् सर्वमिदमाकूतमिति वदन्ति॥ ३५॥

॥ समाप्तं सर्वपृथक्त्वनिराकरणप्रकरणम्॥

12. पृथगेवाद्यस्तु भेदवत् C. 13. प्रमेयत्वाज्ञेयत्वं° C. 14. सकस्य C. 15. °भिन्नत्वादिभावात् C. 16. अनेकधर्मंरूपत्व° C. 17. धर्मिणे A. 18. °ग्राह्य इति सत्त्वादे° C. 19. रूपत्वा तृणे C.

[1]अथ सर्वशून्यतानिराकरणप्रकरणम्[2] । तत्राशङ्कासूत्रम्—

सर्वमभावो [3]भावेष्वितरेतराभावसिद्धेः ।। ३६ ।।

अत्राभावत्वं न भावभिन्नत्वम्, [4]अप्रसिद्धेर्बाधाद्वा[5] ; नापि[6] सप्रतियोगित्वम्[7], वस्तुमात्रस्यैव स्वाभावाभावत्वेन सिद्धसाधनात्[8] ; नापि[9] इतरज्ञानाधीनज्ञानविषयत्वं प्रतियोगिज्ञानाधीनज्ञानविषयत्वं वा, तत[10] एव ; किन्तु प्रतियोगित्वावगाहित्वव्याप्यविषयतासामान्यकत्वम् ; 'अनश्वो[11]गौ'रित्यादिप्रतीतेः ज्ञानमात्रे प्रतियोगित्वावगाहित्वसाधनन्तु फलितार्थः। भावेषु अन्योन्याभावविषयकसिद्धेरेव सत्त्वात् ; भेदावगाहित्वव्याप्यविषयतासामान्यकत्वादिति अन्योन्याभावावगाहित्वादिति वा पर्यवसितो हेतुः ।। ३६ ।।

निराकुरुते—

[12]न स्वभावसिद्धेर्भावानाम् ।। ३७ ।।

स्वभावसिद्धेः [13]अन्योन्याभावमविषयीकृत्यापि गोत्वादिना सिद्धेः, तथा चासिद्धो हेतुरिति भावः ।। ३७ ।।

शङ्कते—

न स्वभावसिद्धिरापेक्षिकत्वात् ।। ३८ ।।

भावा [14]न स्वभावसिद्धिकाः, [15]अन्योन्याभावावगाहित्वव्याप्यविषयतासामान्यकाः[16], आपेक्षिकत्वात् भिन्नत्वात्। ज्ञानमात्रं वाऽन्योन्याभावविषयकं भिन्नविषयकत्वादिति फलितार्थः ।। ३८ ।।

1-2. om. C. 3. भावेस्मित० A. 4. न प्रसिद्धे० A. 5. ०बाधा C. 6. नत्वेपि C. 7. ०योगिकत्वम् A. 8. साधनाभि C. 9. लापि C. 10. तत्र C. 11. अनाश्रा A, C. 12. नन्वभाव० A. 13. भावसविषयी० C. 14. नन्वभाव० A. 15-16. अन्योन्याभावावगाहित्वभावावगाहित्वव्याप्यविषयतासामान्यता A.

निराकुरुते—

व्याहतत्वादयुक्तम् ॥ ३९ ॥

व्याप्तेरित्यादि। मानभावादिति भावः।

नव्यास्तु—[17]अभावत्वं तावदुभयसिद्धं[18] भावव्यावृत्तो धर्मः, तद्वत्त्वं वस्तुमात्रे साध्यते[19]। यावन्तोऽभावास्तेषां[20] प्रत्येकप्रतियोगिकभेदानां यावत्त्वावच्छिन्नाभावो [21]वाऽभावत्वम्। तथा च भावमात्रमेव निराकृतं भवति, ज्ञेयत्वादिति स्पष्टो हेतुः। तर्कमाह—भावेष्विति। [22]गवादिष्वश्वादिभेदसमूहसिद्धेः[23] उभयवादिसिद्धेः, तथा च [24]गवादिवृत्तित्वेनाभिमतेन भेदसमूहेनैव गवादिव्यवहारोपपत्तौ किमधिकेन गवादिनेति[25] भावः। निराकुरुते—नेति[26]। स्वभावसिद्धेः स्वभावेन गोत्वादिना अभावभिन्नत्वेन च प्रत्यक्षादिप्रमाणतः [27]सिद्धेर्गवादीनामिति भावः। शङ्कते—नेति। आपेक्षिकत्वादभावत्वेनैव च[28] सर्वेषां सिद्धिरिति भावः। निराकरोति—व्याहतेति। अनुभवेनेत्यादिः। अनुभवानङ्गीकारेऽभावेऽपि का प्रत्याशेति वदन्ति।

भाष्यादिकृतस्तु तुच्छत्वमभावत्वमित्याहुः। तत्र तुच्छत्वमलीकत्वम्, [29]तच्च समयासम्बन्धित्वम्, तुच्छस्य कालमात्र एवासत्त्वात्, कालसत्त्वप्रत्ययस्य च भ्रमत्वात्[30]; [31]धर्मरहित्वं वा[32], [33]घटघटत्वादेरसतः परस्परासम्बन्धात्[34]; सत्तारहितत्वं वा[35]। प्रमेयत्वे [36]केवलान्वय्य-

---

17-18. अभावत्तन्तावन्नभयसिद्धं A, आभावत्वस्तावदुभयसिद्धं C. 19. साध्यन्ते A, साध्यान्त C. 20. ०भावस्तेषां A. 21. वा om. A. 22-23. गवादिष्वण्वादिभेदसमूहसिद्धेः C, ०भेदसमूहस्य सिद्धेः A. 24. गवादिव्यावृत्तत्वेन० A. 25. गवादिनिति A. 26. सति C. 27. सिद्ध्योवादीनामिति C. 28. च om A. 29. तस्य एव मयासम्बन्धि० C. 30. भ्रामत्वा A. 31-32. धर्मारहितत्वा A, भ्रमरहितत्वा C. 33-34. घटघटत्वादेव सतः परम्परासम्बन्धात् A, घटत्वादेरसतः परम्परासम्बन्धात् C. 35. ०रहितत्वाद्या: C. 36. केवलानुयंभाव० C.

भावप्रतियोगित्वं साध्यमित्यपि वदन्ति । [37]पक्षादेरसत्ख्यात्युपनीतत्वान्नाप्रसिद्धिः । नेति । भावानां कालसंम्बन्धिनां स्वभावसिद्धेः प्रत्यक्षादिना प्रमितेरित्यर्थः । [38]न स्वभावेति । आपेक्षिकत्वात् वासनामात्रकल्पितत्वात् । घटादिकं हि वासनामात्रकल्पितम्, न तु [39]परमार्थसदिति भावः । व्याहतेति । वासनामात्रकल्पितत्वस्येत्यादिः । प्रत्यक्षसिद्धमेव घटादि, न तु वासनाकल्पितम्, वासनादेरनिरुक्तेरिति[40] भावः ।

केचित्—[41]अभावाभावस्य भावरूपे तात्पर्यमुपवर्णयन्ति मुनेः[42], तथाहि—सर्वं मात्रयेतवान्योन्याभावः[43][?] [44]स्वात्यन्ताभाव-[45]स्वाश्रयान्योन्याभावयोरत्यन्ताभावश्च, तेषु[46] तेषु भावेषु [47]स्वतृस्वेव तद्वद्भिन्नान्योन्याभावप्रतीतेः[48] । [49]इतरेतराभावेति । [A]तदत्यन्ताभावस्याप्युपलक्षकम्[50], अभावान्तरकल्पने च गौरवमिति भावः । अत्र शङ्कते—[51]न स्वभावेति । स्वभावेन स्ववृत्त्यसाधारणधर्मेण निष्प्रतियोगिकत्वेनैव सिद्धेः भावानां न सप्रति[A]योगिकत्वरूपमभावत्वमित्यर्थः । निष्प्रतियोगिकत्वेनैव सिद्धेरित्यस्य [52]कोऽर्थः, सप्रतियोगिकत्वेनासिद्धेरिति वा निष्प्रतियोगिकत्वेन सिद्धेरिति वा । आद्ये—नेति । [53]सप्रतियोगिकत्वेनासिद्धेः आपेक्षिकत्वात्, 'घटाभावो नास्ती'त्याकारसप्रतियोगिकत्वप्रतीतेः । द्वितीये[54] व्याहतेति । निष्प्रतियोगिकत्वप्रतीतेरित्यादिः । न हि 'घटी निष्प्रतियोगिक' इति कश्चित्[55] प्रत्येतीति भावः ।

37. ०असत्ख्यानुपनीत० C. 38. ननु भावेति C. 39. परमाणुसदिति C. 40. ०देव निरुक्तेति C. 41. भावाभावस्य C. 42. ०मुपवं र्णयन्ति मूले: C. 43. सर्वमानमेतरान्योन्याभावः C. 44. आत्यन्ता० C. 45. आश्रया० C. 46. om. C. 47-48. सतृस्वारतद्वत्तिनान्यो C. 49. इतरेनि० C. A-A in A only. 51. नन्वभावेति A. 52. ०योगिकत्वे निरसितत्वेरित्यस्य C. 53. न सप्रति० C. 54. om. C. 55. om. A.

एकदेशिनः पुनरभावाभावातिरिक्तत्वे तात्पर्यमुपवर्णयन्ति। तथा हि—"सर्वमभाव" इति शङ्कासूत्रमभावाभावस्याभावरूपत्वतात्पर्यकम्[56]। समाधानसूत्रं—नेति। [57]स्वभावेन अभावत्वविरुद्धभावत्वेन सिद्धेरित्यर्थः। अभावत्वं हि भावभेदः, तद्विरुद्धञ्च भावत्वमिति भावः। शङ्कते—नेति। नाभावविरुद्धधर्मेण सिद्धिः, आपेक्षिकत्वात्, अभावत्वस्य [A]सप्रतियोगिकत्वरूपत्वात्[A], सप्रतियोगिकत्वविरुद्धञ्च नाभावत्वमिति भावः। समाधानं—व्याहतेति। [58]अभावत्वं सप्रतियोगिकत्वमिति व्याहतं यतोऽत इदमुक्तमित्यर्थः। न हि 'घटो नास्ती'ति प्रतीतिर्घटप्रतियोगिके सप्रतियोगिकत्वमालम्बते किन्त्वन्यदेवेति भावः॥ ३९॥

॥ समाप्तं सर्वशून्यतानिराकरणप्रकरणम्॥

---

56. ०भावस्य भावरूप० C. 57. अभावेन A, C. A–A in A *only*.
58. ह्यभावत्वं C.

अथ संख्यैकान्तनिराकरणप्रकरणम्। संख्या एकान्ता येषु[1] वादेषु[2] ते संख्यैकान्ता वेदान्तादिवादाः। तथा ह्येकमेव ब्रह्माख्यं जगति पदार्थम्,

"एकमेवाद्वितीयं ब्रह्म" [छान्दोग्य ६।२।१]

"नेह नानास्ति किञ्चन" [बृहदारण्यक ४।४।१९]

"मृत्योः स मृत्युमाप्नोति
य इह[3] नानेव पश्यति।" [बृहदारण्यक ४।४।१९]

इत्यादि श्रुतेरिति वेदान्तिनः। नित्यानित्यभेदाद् द्वयमेव पदार्थ इत्यन्ये[4]। ज्ञाता ज्ञेयं ज्ञानमिति त्रयमेवेत्यपरे। प्रमाता प्रमेयं प्रमाणं प्रमेति चत्वार एवेत्येके। रूपादिस्कन्धपञ्चकमिति सौत्रान्तिकाः। व्यक्त्य [? वक्त्र-]भिप्रायकमिदं सर्वम्, वक्तॄणां धर्मिणामुक्तधर्मेण विभजने त्वविवादादित्येतत्[5] सर्वं निराकरोति—

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥ ४० ॥

एक एव पदार्थ इत्यादेरसिद्धिः, प्रमाणाभावात्। अथ प्रमाणमस्ति, तथाप्यसिद्धिः, प्रमाणस्यैवातिरिक्तस्य सत्त्वात्, अन्येषामपि प्रत्यक्षादिप्रमाणसिद्धत्वाच्चेति भावः ॥ ४० ॥

शङ्कते—

न कारणावयवभावात् ॥ ४१ ॥

कारणानाम्[6] प्रमाणानां ब्रह्मणोऽवयवभावात्, अवयवस्य चावयविनोऽनतिरिक्तत्वात्[7] इति भावः ॥ ४१ ॥

निराकरोति—

निरवयवत्वादहेतुः ॥ ४२ ॥

ब्रह्मण इत्यादिः। अन्यथावयवस्यैवातिरिक्तत्वेनान्वितस्य भङ्गापत्तेः[8]।

---

1. देषु C. 2. om C. 3. यदिह C. 4. इत्यनेन A, इत्यने C. 5. ॰मुक्तधर्मिण विभजनत्वविवादा॰ C. 6. कारणा C. 7. चावयवत्वं मोहनतिरिक्त॰ C. 8. ॰नार्थित॰ A.

स्वप्रकाशत्वान्न[9] तत्र मानान्तरापेक्षेति चेन्न, प्रत्यक्षादिप्रमाणेनान्येषामपि[10] सिद्धेरभिहितत्वात् । श्रुतेः का गतिरिति चेत्, प्रमाणान्तरनिराकरणपरत्वात् तस्याः, विषापनोदाय[11] विषशास्त्रोपदिष्ट 'गरुडोऽहमि'ति[12] भावनावत्, मोक्षोपयोगित्वपरत्वाद्वेति[13] संक्षेपः ॥ ४२ ॥

॥ समाप्तं संख्यैकान्तवादनिराकरणप्रकरणम् ॥

---

9. ०त्वान् C. 10. प्रमाणे नान्येषा० C. 11. विषपानादाय C.
12. चरुड़ोऽहम्० C. 13. ०परत्वात्वेति C.

अथ क्रमप्राप्तफलपरीक्षा। तत्र संशयसूत्रम्—

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४३ ॥

[1]तत्तद्यागादिफलं [2]स्वर्गादि तत्तद्यागादिसमानकालसामग्रीकं न वेति, तत्तद्यागध्वंसाधिकरणक्षणध्वंसानधिकरण[3]क्षणोत्पत्तिकं न वेति संशयः। संशयानुगुणं[4] साधारणधर्ममाह[5]—सद्य इति। [6]गमनादिफलस्योत्तरदेशसंयोगस्य सद्यो निष्पत्तेः. [7]कृष्यादिफलस्य च कालान्तरे निष्पत्तेर्दर्शनात्,[8] तथा च फलत्वमेव साधारणधर्म इति भावः ॥ ४३ ॥

ततः[9] कश्चिदाह—यागादिना सद्य एव [10]स्वर्गादिकमुत्पाद्यते,[11]साक्षात्कारश्च [12]स्वर्गादेर्न भवति दोषवशादिति। तत्र समाधानमाह—

न सद्यः कालान्तरोपभोग्यत्वात्[13] ॥ ४४ ॥

[A]कालान्तर एव साक्षात्क्रियमाणत्वात्[A] [14]स्वर्गादेरिदानीमुत्पत्तौ दोषादेः [15]स्वर्गादिसाक्षात्कारप्रतिबन्धकत्वे च मानाभावः, [16]स्वर्गादौ देवादिशरीरस्य देवाङ्गनादीनाञ्च हेतुता तु[17] श्रुतिसिद्धेति नायं[18] प्रकारः सम्भवतीति भावः। नाश्यनाशकभावस्य विशेषविश्रामात् शरीरविशेषादेश्च तत्साक्षात्कार एव हेतुत्वादपूर्वकल्पनागौरवाभावाच्च सम्भवत्येवायं प्रकार इत्यपि वदन्ति ॥ ४४ ॥

शङ्कते—

न कालान्तरे निष्पत्तिर्हेतुविनाशात् ॥ ४५ ॥

यागादिरूपहेतुर्विनाशात् कालान्तरे न[19] फलं भवितुमर्हति, सामग्र्यभावादिति भावः ॥ ४५ ॥

---

1. तत्तु यागा० A, तव यागा० C. 2. सुखादि A. 3. ०करणध्वंसाधिकरण० C. 4. संशयादिगुणं A. 5. धर्ममह A, C. 6. गगनादि० A. 7. कृत्यादि० C. 8. ०त्तेः कुलात् A. 9. om. C. 10. सुखादि० A. 11. वाक्षात्० A. 12. सुखादे० A. 13. ०कालान्तरेऽपि योग्यत्वात् A. 14. सुखादे० A. A—A. in A only. 15. सुखादि A. 16. सुखादौ A. 17. च C. 18. ०सिद्धेनायं प्रकारः A. 19. कालान्तरेण C.

समाधत्ते—

प्राङ्निष्पत्तेर्वृक्षफलवत्तत् स्यात् ॥ ४६ ॥

यथा वृक्षफलस्योत्पत्तेः [20]प्राक् तरुमूलसेकादेरवयवोपचयद्वारा[21] सत्त्वात् तरुमूलसेकादिनाशेऽपि तज्जन्यवृक्षफलोत्पत्तिस्तथा [22]स्वर्गाद्युत्पत्तेः प्रागदृष्टद्वारा यागादेश्च सत्त्वाद् [23]यागादिनाशेऽपि [24]तज्जन्यस्वर्गाद्युत्पत्तिरिति भावः ॥ ४६ ॥

फलमात्रमाक्षिपति—

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ॥ ४७ ॥

प्रागुत्पत्तेरित्यनुषज्यते। तथा च फलमुत्पत्तेः प्राक् नासत्, असतो वैधर्म्यात्, उत्पत्तिमत्त्वं ह्यसतो वैधर्म्यम्। न हि [25]नरविषाणादेरुत्पत्तिरस्ति। तदुक्तम्—

"नासतो विद्यते भावः" [भगवद्गीता २।१६] इति। न सत्, [26]ततो वैधर्म्यात्, तदुत्तरकालोत्पत्तिकत्वं हि तत्कालसत्त्ववैधर्म्यम्[27]। अतएव[28] न सदसत्, तयोर्विरोधात्। न च सदसत्त्वं प्रसिद्धम्, न हि सत्त्वविशिष्टमसत्त्वं सदसत्त्वं किन्तु सदसत्त्वोभयम्, न चाप्रसिद्धमेव; नापि सदन्यत्वासदन्यत्वोभयवत्, तत एव[29], प्रकारान्तरस्तु न सम्भवत्येवेति भावः ॥ ४७ ॥

समाधत्ते—

प्रागुत्पत्तेरुत्पत्तिधर्मकासदित्यद्धा[30] उत्पादव्ययदर्शनात् ॥ ४८ ॥

उत्पत्तिधर्मकं कार्यमात्रम् उत्पत्तेः प्राक् असदिति अद्धा सत्यम्, उत्पाद-

---

20. पाक A, C. 21. ०वयवपिचय C. 22. सुखा० A. 23. यागानाशे० C. 24. सुखाद्युनषत्ति० A. 25. न च - - - पादे० C. 26. तक्नो A, तन्नो C. 27. ०कालमत्त्वधर्मं C. 28. एवं C. 29. एवेसि मन्तव्यम् in addition in C. 30. ०असदित्यत्वा C.

विनाशौ[31] च दृश्येते[32] यतः, न ह्यसतोऽन्यस्य गगनादेस्तदुभयं सम्भवति। असत्त्वं हि नालीकत्वम्, क्वचिदपि तदनङ्गीकारात्, किन्तु प्रागभावप्रतियोगित्वम्, तच्च नोत्पत्तिविरुद्धम्, परन्तु व्यापकमेवेति[33] भाव ॥ ४८ ॥

उत्पत्तेः प्रागसदेव कार्यमित्यत्र मानमाह—

बुद्धिसिद्धन्तु तदसत् ॥ ४९ ॥

'इदमिदानीं नास्ति' 'इदानीं भविष्यती'ति बुद्धिसिद्धं तदसत्त्वमित्यर्थः ॥ ४९ ॥

आक्षिपति—

आश्रयव्यतिरेकाद् वृक्षफलवदित्यहेतुः ॥ ५० ॥

मूलसेकादि फलञ्चैकत्र वृक्ष इति युज्यते, प्रकृते तु नैक आश्रयः; इह हि[34] यागादि, देहान्तरे च फलमिति वृक्षफलवदित्यसमः[35] पूर्वोक्तो दृष्टान्त इत्यर्थः। व्यधिकरणस्य हेतुत्वेऽतिप्रसङ्गात् सामानाधिकरण्येनैव हेतुत्वं वाच्यम्; तच्चात्रैव[36] देहे [37]स्वर्गोत्पत्तावेव सम्भवतीति देहान्तरे तदुपभोगमात्रम्, अत्र च देहे तदनुपलब्धिर्दोषवशादित्यवश्यं स्वीकरणीयमिति किमपूर्वसहस्रकल्पका सद्य [?] [38]उत्पत्तिस्वीकारेणेति भावः ॥ ५० ॥

उत्तरम्—

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५१ ॥

यागाद्यनुकूला कृतिः प्रीतिश्चात्मन्येव समवैतीति [39]कृतिफलयोः सामानाधिकरण्येन हेतुत्वं देहान्तरे [40]स्वर्गोत्पत्तावपि [41]सम्भवतीति-नायं प्रतिषेध इति भावः ॥ ५१ ॥

31. विनाशा C. 32. दृश्यते A. 33. व्यापकत्वमेवेति C. 34. इति A, इह हि C. 35. ०दित्यसत्त्वः A, ०दित्यनार्थकः C. 36. तच्चातैव C. 37. सुखोत्पत्ता० A. 38. उत्पत्त्य उत्पत्ति० C. 39. श्रुतिफलयोः C. 40. सुखोत्० A. 41. ०बवि A.

आक्षिपति—

न पुत्रपशुस्त्रीपरिच्छद[42]हिरण्यान्नादिफलनिर्देशात् ॥ ५२ ॥

"पुत्रकामो[43] यजेत"[44] [ ] [45]इत्यादिश्रुत्या पुत्रादेरपि फलत्वं निर्देश्यते[46], न पुत्रादिकमात्माश्रयमिति कथं कृतिफलयोः सामानाधिकरण्येन [47]हेतुहेतुमद्भाव इति भावः ॥ ५२ ॥

उत्तरम्—

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥ ५३ ॥

पुत्रादिसम्बन्धात् फलस्य सुखादेर्निष्पत्तेः तेषु तत्तत्सुखादिषु फलवतां फलसाधनप्रतिपादकानां[48] पुत्रादिपदानामुपचार[49] इत्यर्थः। तत्र पुत्रादिपदं पुत्रादिजन्यसुखोपचरितमिति भावः। यद् वा—तेषु पुत्रादिषु फल इव [50]सुख इवोपचार आत्मसम्बन्ध[स्य] इत्यर्थः, पुत्रादेरपि परम्पराविशेषेणात्मसम्बन्धान्न[51] वैयधिकरण्यमिति भावः ॥ ५३ ॥

॥ समाप्तं फलपरीक्षाप्रकरणम् ॥

---

42. ०परिजन० A. 43. ०कामे C. 44. यजेते C. 48. इत्यादि० om. C. 46. निर्देशस्येति A, निर्देश्यात् C. 47. हेहेतु० A. 48. फलसाधनप्रतिपादकानां repeated in C. 49. ०नुपचार C. 50. मुख C. 51. ०अर्थसम्बन्धान्न C.

अथ क्रमप्राप्तदुःखपरीक्षा। ननु "बाधनालक्षणं दुःखमि"- [न्या० सू० १।२।२१]त्यनेन दुःखत्वजातिर्दुःखलक्षणमुक्तम्, तच्चाव्याप्तम्, शरीरादेरपि दुःखत्वात्, अन्यथा तत्र बलवद्द्वेषानुपपत्तिः, दुःखत्वबुद्धेर्द्वेषबीजत्वादित्यत आह—

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ५४ ॥

जायन्त[1] इति जन्मानि शरीरादयः, तेषाम् उत्पत्तिस्तु उत्कटदुःखयोगादेव[2]। दुःखं बलवद्द्वेष्यम्, न तु [3]दुःखबुद्धेरिव तदनुबन्धित्वबुद्धेरपि द्वेषबीजत्वादिति भावः।

यद् वा—"बाधनालक्षणं दुःखम्" [न्या० सू० १।१।२१] इत्यनेन बलवद्द्वेषविषयत्वं लक्षणमुक्तम्, शरीरादेरपि लक्ष्यत्वात्। नन्विदमयुक्तम्, दुःखत्वबुद्धेर्द्वेषहेतुतया शरीरादेरद्वेष्यत्वादित्यत आह—विविधेति। व्याख्यातार्थम् ॥ ५४ ॥

शङ्कते—

[4]न सुखस्याप्यन्तरालसिद्धेः ॥ ५५ ॥

तथा च [5]सुखासम्बलितत्वं [6]निरन्तरालत्वस्योत्कटत्वं दुःखे नास्तीति कुतो बलवान् द्वेष इति भावः ॥ ५५ ॥

समाधत्ते—

बाधनाऽनिवृत्तेर्वेदयतः [7]पर्येषणदोषादप्रतिषेधः ॥ ५६ ॥

वेदयतो[8] विज्ञस्य पर्येषणाद्बहुतरदुःखानुबन्धात् सुखेऽपि बाधनाया द्वेषस्यानिवृत्तेः प्रतिषेधो नेत्यर्थः। इष्टासम्बलितत्वं तन्निरन्तरालत्वं

1. जयन्त C. 2. देर C. 3. खत्वा दुःखत्वबद्धे० C. 4. ननु सुख० A. 5. दुःखा० C. 6. निरन्तरालदुःखोत्० C. 7. पर्येस्तन A. 8. वेदयस्ता C. 9. वा कटत्वम् C.

वौत्कटत्वम्[9], अन्यथाऽतिप्रसक्तेः, [10]अन्तरालसुखञ्च न विज्ञस्येष्टं परन्तु बलवद्द्विष्टमेवेति भावः ॥ ५६ ॥

क्वचिदन्तरालसुखमपि नास्तीत्याह—

दुःखविकल्पे सुखाभिमानाच्च ॥ ५७ ॥

बहुतरदुःखानुविद्धानां स्वल्पदुःखे सुखाभिमानाच्चेत्यर्थः। यद् वा—नन्वेवं[11] कथं राजकीयशरीरादौ रागिणां[12] प्रवृत्तिरित्यत आह—दुःखेति। दुःखकल्पनाविगमे[13] द्वेषविगमे वा उत्कटसुखाभिमानाच्च सुखिनां[14] प्रवृत्तिरिति शेषः।

प्राञ्चस्तु[15]—दुःखमेवेत्येवकारेणा[16]न्ययोगव्यवच्छेदपरेण सुखं व्यवच्छिद्यत इत्यभिप्रेत्य शङ्कते[17]—न सुखेति। अयोगव्यवच्छेदोऽर्थो[18] नान्ययोगव्यवच्छेद इत्यभिप्रेत्य समाधत्ते—बाधनेति। पर्येषणदोषात् [19]प्रवृत्त्यादिनिबन्धनाद् धर्माद् वा बाधनाया[20] अनिवृत्तिरयोगव्यवच्छेदः। सुखं वेदयतः प्रमाणात् [?] तस्या अप्रतिषेध इत्यर्थः। क्वचित् सुखव्यवच्छेदोऽपि घटत इत्यभिप्रेत्याह—दुःखेति[22]। यद् वा—एकदेशिनो मतमाह[23]—दुःखेति। दुःखाभावे सुखबुद्धेरित्यर्थः। तथा च सुखमतिरिक्तं नास्त्येव, दुःखाभावेनैव सुखव्यवहारोपपत्तेरित्यन्ययोगव्यवच्छेद [24]एवार्थः, स[25] च 'सुखी'त्याकारप्रत्ययविषयस्यात्मनि[26] समवायेन व्यवच्छेद[27] इत्याहुः ॥ ५७ ॥

॥ समाप्तं दुःखपरीक्षाप्रकरणम् ॥

---

10. नन्तराल० C. 11. लब्धेयं C. 12. वासिनां C. 13. ०कल्पनाद्विगमे A, ०कल्पनान्निरासे C. 14. सुइनां A, सु-नां C. 15. प्राञ्चस्तु om. C. 16. ०कारण० A, C. 17. शङ्काह C. 18. ०दोष्नो C. 19-20. प्रवृत्त्यादिनिबन्धना धर्मात् अबाधमाया C. 21. ०प्रेत्या C. 22. दुःखेति om. C. 23. मत आह A. 24. मवार्थः A. 25. न A. 26. विषयस्यात् सति C. 27. ०वाये न व्यव० C.

अथापवर्गपरीक्षा। तत्राक्षेपसूत्रम्—

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५८ ॥

अपवर्गाभावः तत्तदात्मीयदुःखध्वंसत्वावच्छेदेन तत्तदात्मीयदुःखासमानकालीनत्वाभावः, तथा च "तदत्यन्तविमोक्ष" [न्या० सू० १।१।२२] इति लक्षणमप्रसिद्धम्, [1]लक्ष्याप्रसिद्धेरिति भावः। कुतः ? [2]ऋणाद्यनुबन्धात्। [3]ऋणान्यावश्यकानि [4]देवर्षिपितॄणां कर्मान्यग्निहोत्रतर्पणबलिकर्मादीनि, तेषामनुबन्धात्[5], जरामरणपर्यन्तमनुष्ठानात्। तथा च तत्तत्कर्म परित्यज्य मोक्षार्थानुष्ठाने[6] प्रत्यवायोत्पत्तौ दुःखधारावश्यकत्वम्[7], तत्तत्कर्माचरणे [8]तेनैव सुखपर्याप्तेर्न [9]मोक्षार्थं मननादिवार्त्तापीत्युभयथाप्येवमपवर्गाभावः[10]। श्रूयते हि—

"जायमानो ह वै ब्राह्मणस्त्रिभिऋ॑णै[11]ऋ॑णवान्[12]जायते ब्रह्मचर्येण[13] ऋषिभ्यः[14], यज्ञेन देवेभ्यः[15] प्रजया[16] पितृभ्यः"
[तैत्तिरीयसंहिता ६।३।१०] इति,

"एतत् सत्रं[17]यदग्निहोत्रं दर्शपौर्णमासौ च"
[शतपथमाध्यन्दिन १२।४।१।१] इति,

"जरया ह वा एष एतस्माद्[18] विमुच्यते मृत्युना वा"
[शतपथमाध्यन्दिन १२।४।१।१] इति च।

[19]"जरये"त्यन्ताशक्तिपरम्[20], [21]"मृत्युना वे"ति समभि-

---

1. लक्षा० C. 2. वपनाद्य० C. 3. यसान्याव० C. 4. देवर्षो० C. 5. ०बन्ध C. 6. मोक्षानुष्ठाने A, मोक्षार्थानुष्ठानं C. 7. ०वश्यवत्वं C. 8. तेनैवासुखः पर्याप्तेर्न A, तेनैवायुदुः पर्याप्तेर्न C. 9. मोक्षानुमनना० A, मोक्षार्थानुष्ठानं मनना० C. 10. ०उभयथाप्यबवर्गा० C. 11. ०तिभिद्वर्णै A, तिभिद्वर्णे० C. 12. ०काराण C. 13. ब्रह्मचर्यणा C. 14 कायित्यो C. 15. दोर्त्थः C. 16. प्रजाय C. 17. एतत् सर्वं A, एतव्याग्रं C. 18. या एष एतस्माम् C. 19. यवयेत्य० C. 20. शक्तिकाल C. 21. परिमृत्युना C.

व्याहारात्। क्लेशा [22]रागादयस्तदनुबन्धात् आजन्ममरणान्तं[23] तत्तत्सत्त्वादप्यपवर्गाभावः, रागादीनां साक्षात् परम्परया वा दुःख-हेतुत्वादिति भावः।

परे तु तत्तदात्मीयदुःख[24]-[C]ध्वंससत्त्वे तत्तदात्मीयदुःख[C]समान-कालीनत्वनियमः क्लेशानुबन्ध इत्याहुः।

प्रवृत्तेरप्यनुबन्धादपवर्गाभावः, न ह्ययं कदापि निरीह इति[25] धर्मा-धर्मसन्तानाविच्छेदाद् आवश्यक इति भावः॥ ५८॥

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः॥ ५९॥

जायमानादिशब्दानां [26]मुख्यार्थानुपपत्त्या [27]तैर्लक्ष्यार्थस्य गृहस्था-देरनुवादः, [28]ऋणानामनपाकरणे निन्दायै, अपाकरणे प्रशंसायै[29] चेत्यर्थः। तथा च गार्हस्थ्यादन्यावस्था [30]ऋणानवरुद्धेति[31] तदाऽऽम्नाम-ननं नानुपपन्नमिति भावः। मुख्यार्थानुपपत्तिः कुत इति चेदुच्यते— "जायमान" इत्यादि ह्यनुवादो ब्रह्मचर्यादिविधिशेषो विधिविषयमेवार्थ-मभिप्रैति[32]। विधिश्च न जातमात्रे कुमारे, तस्य तत्रासामर्थ्यात्। लौकिकोऽपि हि न रक्तपादास्यं बालमुपदिशति—'अधीष्व यजस्वे'ति[33], किं पुनरुपपन्नानवद्यवादी भगवान्[34]। गृहस्थमधिकृत्य[35] होमादिविधिप्रवृत्तेश्च। श्रूयते हि—

"[36]पत्न्यवेक्षितमाज्यं भवति"[37] [ ]

"पत्न्य[38] उद्गायन्ति" † [ ]

---

22. वादयः C. 23. आजन्मवणान्तं C. 24. ०आत्मीयः ख C. C-C in only C. 25. निरीहतानि C. 26. मुख्याचा० C. 27. तैलक्षणत्वस्य C. 28. ऋणा० om. C. 29. प्रकामोये C' 30-31. द्धानानवरुद्धेति C. 32. ०मभिप्रेतः C. 33. यद्विति C. 34. चाचावान C. 35. हानादि० C 36-37. पत्नीवेक्षितमा - - भि C. तैत्तिरीयब्राह्मण ३।३।४।१ contains a similar line. 38. पल्लै C. † ताण्ड्यमहाब्राह्मण २०।४।८ and काठकसंहिता ३४।६ contain a similar line.

इत्यादि। अतो "जायमान"पदं भक्त्या[39] गृहस्थः सम्पद्यमान[40] इत्यर्थकम्। "ब्रह्मचर्येण ऋषिभ्य" इत्यत्र तु ब्रह्म वेदस्तस्य[41] चर्यमध्ययनमिति गृहस्थस्वाध्यायस्यैव विवक्षितत्वान्न[42]तद्विरोधः। सकामपरञ्च जायमानपदम्, विधौ सकामाधिकारश्रुतेः। "जरये"त्यप्यर्थिताविच्छेदपरम्, तत्र प्रायोऽर्थिताविच्छेदात्, अन्यथा यावज्जीवं तदनुवृत्तौ जयन्तेति [? जरयेति] व्यर्थं स्यात्। न ह्येतदसामर्थ्यपरम्, स्वयमसमर्थस्य[43] प्रतिनिधिविधानात्,

"अन्तेवासी[44] वा जुहुयात् विद्यया स परिक्रीतः क्षीरहोता[45] वा जुहुयाद्धनेन स परिक्रीतः" [ ]

इत्यादिश्रुतेः। एतेन [46]निष्कामस्यैव [47]यतेर्मननादिकं[48] यागादिपरित्यागेन[49] नानुपपन्नम्। श्रूयते हि—

"कर्मभिर्मृत्युमृषयो निषेदुः[50] प्रजावन्तो[51] [52]द्रविणमीहमानाः[53]।
अथापरे ऋषयो[54] मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः"[55] ॥
[वाजसनेयि संहिता ३।१।१८]

"परेण नाकं[56] निहितं गुहायां विभ्राजते[57] यद्यतयो[58] विशन्ति॥"
[तैत्तिरीय आरण्यक ३।१२।७]

इत्यादिः।

"चत्वारः[59] पथयो देवयानाः" [ ]

इति चातुराश्रम्यं वदता यत्याश्रमो विहितः। बृहदारण्यके च—

---

39. उक्त्वा C. 40. संपद्यम संरद्यमा C. 41. ब्रह्माबदम्भस्य A, ब्रह्मवदस्तस्य C. 42. ०त्वान्न om. C. 43. यमसमयत्वस्य A, नायमसमयत्वस्य C. 44. ०वापी C. 45. क्षीवहेतो A, C. 46. नि- -मस्यैव C. 47. मते० C. 48. ०सनादिकं C. 49. परीत्यागो न C. 50. ०मृषया च A, हृषया निषेत्व C. 51. प्रजावन्मे A, प्रजावन्ते C. 52-53. त्रिविणमिहमाताः C. 54. द्रायषयो C. 55. ०मानस्तः C. 56. परेण किं A. 57. ०जतो A. 58. ययुभयो C.

"इति होक्त्वा[60] याज्ञवल्क्यः[61] प्रव्रव्राज[62]"

[बृहदारण्यक ४।५।१५] इति।

एतेन यत्याश्रम[63] एव नास्तीत्यपास्तम्,

"ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद्वनी[64]भूत्वा प्रव्रजेत्"।

[Cp. जाबालोपनिषत् ४][65]

"अथ [66]परिव्राड्विवर्णवासा शुचिरद्रोही भैक्षाशो ब्रह्मभूयाय[67] भवति", [जाबालोपनिषत् ५]

"ब्रह्मसंस्थोऽमृतत्वमेति"[68] [छान्दोग्य० २।२३।१]

इत्यादिना च तदभिधानात् ॥ ५६ ॥

युक्त्यन्तरमाह—

समारोपणादात्मन्यप्रतिषेधः ॥ ६१ ॥

आत्मन्यग्नीनां समारोपश्रुतेरुक्तप्रतिषेधो नेत्यर्थः। श्रूयते हि—

"[69]प्राजापत्यामिष्टिं निरूप्य तस्यां सर्ववेदसं हुत्वा[70] आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्" [ ]

इति ॥ ६० ॥

युक्त्यन्तरमाह—

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६१ ॥

ज्ञानिनः अग्न्यादेरभावः, यतो अन्त्येष्टौ[71] तत्र [72]पात्रचयान्तानि

---

59. च द्वार C. 60. होतृ A, होस्व C. 61. योग्यवद्यः C. 62. प्रवव्राज C. The printed text of बृहदारण्यक reads विजहार. 63. यद्याश्रमो C. 64. गृहात्वनी C. 65. The complete sentence is ब्रह्मचर्यं समाप्य गृही भवेद् गृही भूत्वा वनी भवेत् वनी भूता प्रव्रजेत्. 66–67. परिव्राज्ञिवर्णवाधशुचिरात्राहभेक्ष्या ब्रह्मभूयप C. 68. ०संस्थासुतत्वमेति C. 69. प्रापत्यमिष्टि A, प्राजापत्यामिष्टं C. 70. सर्वविदसंबृद्धान्ता C. 71. अस्यष्टो C. 72. पत्रे० C.

यजमानस्याङ्गे[73] यथास्थानमुदूखलादिपात्रनिधानात्मकानि[74] कर्माणि नोपपद्यन्ते। श्रूयते ह्येषणाव्युत्थानम्—

"[75]तदुह स्म वै पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं [76]लोक इति ते ह स्म वै [77]पुत्रैषणायाश्च [78]वित्तैषणायाश्च [79]लोकैषणायाश्च व्युत्थायाथ [80]भिक्षाचर्यं चरन्ति" † [ ]

इति ॥ ६१ ॥

क्लेशानुबन्धे[81] उत्तरम्—

सुषुप्तस्य[82] स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ ६२ ॥

यथा सुषुप्तौ न [83]कियत्कालं [84]रागादयस्तथा जाग्रद्दशायामपि चिरकालं रागादेरभावादपवर्गो नानुपपन्न इति।

परे तु यथा सुषुप्तिकालोत्पन्ननष्टपदार्थे न दुःखसमानकालीनत्वं[85] तथाऽपरादपि [?] इत्यप्रयोजकं दुःखध्वंसत्वेन दुःखसमानकालीनत्वमिति भाव इत्याहुः ॥ ६२ ॥

प्रवृत्त्यनुबन्धादित्यत्राह—

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६३ ॥

रागादिहीनस्य प्रवृत्तिर्विहितनिषिद्धविषयो यत्नो नादृष्टाय, दोषवत[86] एव तत्राधिकारादित्यर्थः। रागश्च शरीरात्मभेदविषयकसहिच्छेत्युक्तम् ॥ ६३ ॥

---

73. ययमान० C. 74. ०स्थानमुपप्रखनादिपत्रे० C. 75. भयत्व ह स्म C. 76. ०आत्माद्वयं C. 77. पुत्रेषशाया० C. 78. वित्तेष शाया० C. 79. लोकौतेणा० C. 80. व्युखाऽव C. † A similar line is found in बृहदारण्यक० ४।४।२२. 81. क्लेशान्तवनु C. 82. सुषुप्तौ C. 83. किञ्चित्कालं A. 84. वाचादय० C. 85. ०कालत्वं C. 86. दोवत C.

आक्षिपति--

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६४ ॥

[87]न दुःखसन्ततेः उच्छेदः, [88]तस्यानादित्वादित्यर्थः । तदीयदुःखत्वं न स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति, अनादितावच्छेदकत्वात्, द्रव्यत्ववत् । [89]तद्दुःखत्वञ्च स्वाश्रयध्वंसानाधिकरणकालकान्यत्वमिति[90] तु पर्यवसितार्थः[91] ॥ ६४ ॥

यथाश्रुतार्थमभिप्रेत्यैकदेशी समाधत्ते—

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम् ॥ ६५ ॥

प्रागुत्पत्तेरभावः प्रागभावः, तद्वदनादित्वेऽप्यनित्यत्वमिति, तथा च व्यभिचारोऽप्रयोजकत्वं वेति[92] भावः । इदञ्च दुःखस्यानादित्वमभ्युपेत्य,[93] वस्तुतः प्रागभावाप्रतियोगित्वमनादित्वं स्वरूपासिद्धमेवेति मन्तव्यम् ॥ ६५ ॥

सत्त्वे सति [94]प्रागभावाप्रतियोगित्वमनादित्वमित्यत्राप्याह—

अणुश्यामतानित्यत्ववद्वा[95] ॥ ६६ ॥

तथा च परमाणौ[96] स्वरूपासिद्धिपरीहाराय प्रागभावाप्रतियोगिसमवेतत्वरूपमनादित्वमुच्यते यदि, तथा वा विवक्षितम्[97] ॥ ६६ ॥

स्वयं समाधानमाह—

न [98]सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६७ ॥

सङ्कल्पः शरीरादावहमभिमानः, तत्सहकारतो रागादीनां धर्माधर्मजनक-

---

87. नखसन्ततेः C. 88. तस्याभूलावि० C. 89. तद्द्रव्यत्ववत्त्वञ्च आश्रय० C. 90. ०कान्यमिति A. 91. ०वसित न C. 92. ०जकत्व ति C. 93. ०मभ्युपे C. 94. प्रागभावप्रति० C. 95. अणुस्यामताऽनित्यत्वात् A, मणुस्यामतां नित्यत्वावद्वा C. 96. परमाणो A, C. After this, C has the additional reading परमाणुद्विहनायनेति, which makes no sense. 97. तदा वा विवक्षिते A, C. 98. शङ्कल्प० C.

त्वमिति शेषः। तथा च हेतूच्छेदे दुःखसन्तानोच्छेद आवश्यक इत्युक्तमप्रयोजकमिति भावः।

अन्ये तु—अनादितावच्छेदकत्वं स्वाश्रयध्वंसानधिकरणकालोत्पत्ति[A]कस्याभावप्रतियोगि[A]वृत्त्यन्यत्वम्, अभिहितम्वा। आद्ये—तत्प्रागभावत्वादौ[99] व्यभिचारमाह—प्रागिति। अन्त्ये[100] अप्रयोजकत्वमाह—नेतीत्याहुः।

वस्तुतो महाप्रलयाभ्युपगमेन[101] प्रागभावत्वे व्यभिचारमाह[102]—नेति ॥ ६७ ॥

॥ समाप्तमपवर्गपरीक्षाप्रकरणम् ॥

॥ इति न्यायरहस्ये चतुर्थाद्यमाह्निकम् ॥

A–A in A only. 99. मावत्वा C. 100. प्रागतिन्त्ये C.
101. ०प्रलयमितेन C. 102. ०प्रलयस्याव्याप्यसिद्धेरप्रयोजक० A, C.

॥ चतुर्थाध्याये द्वितीयाह्निकम् ॥

अथेदानीं तत्त्वज्ञानं परीक्षणीयम्, तत्परीक्षैवाह्निकार्थः। तत्र द्वितीयाह्निके षट् प्रकरणानि—तत्त्वज्ञानोत्पत्तिप्रकरणम्, प्रसङ्गादवयविप्रकरणम्, निरवयवत्वप्रकरणम्, बाह्यार्थभङ्गनिराकरणप्रकरणम्[1], तत्त्वज्ञानविवृद्धिप्रकरणम्, [2]तद्रक्षाप्रकरणमिति। ननु तथापि कथं[3] तत्त्वज्ञानोत्पत्तिः, [4]स्रक्चन्दनवनितादिवासनाया आजन्ममरणानुवृत्तेस्तद्व्यसनेनैव जन्मपर्याप्तेर्मननसमयाभावादित्यत आह—

दोषनिमित्तानां तत्त्वज्ञानादहंकारनिवृत्तिः ॥ १ ॥

दोषनिमित्तानां स्रगादीनां बलवदनिष्टाननुबन्धिनां[5] तत्त्वज्ञानाद्बलवदनिष्टजनकत्वज्ञानात्[6] अहंकारस्याभिलाषस्य[7] निवृत्तिरित्यर्थः ॥ २ ॥

दोषनिमित्तमाह—

दोषनिमित्तं रूपादयो विषयाश्च सङ्कल्पकृताः ॥ २ ॥

सङ्कल्पकृता अभिलषिताः[8] ॥ २ ॥

ननु बलवदनिष्टजनकत्वज्ञानात्[9] [10]कुतोऽभिलाष[11A]निवृत्तिरित्यत्राह—

तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥

तस्य सङ्कल्पस्य[A] निमित्तं पुनरवयव्यभिमानः[12] 'योषिदियं मृगलोचनेयमि'त्याद्यभिमानः, [13]बलवदनिष्टाजनकत्वधीरिति यावदित्यर्थः। तथा च तद्विघटनद्वारा बलवदनिष्टजनकत्वग्रहस्याभिलाषविरोधित्वमिति भावः। उक्तञ्च भाष्यादिकृता—

"निमित्तानुव्यञ्जनसंज्ञा हेया" [cf. न्या० भा० ४।२।३]

---

1. प्रकरण० om. C. 2. तत्राक्षा० C. 3. प्रथमां C. 4. ०पत्तिस्स्रक्० C. 5. ०निष्टानुबन्धिनां C. 6. ज्ञानत्वे C. 7. ०भिनास्य C. 8. ०लासिताः A. 9. ०ज्ञान A. ज्ञाना C. 10-11. हेतोऽभिलास० A, ऽकुतोऽभिलाषस्य C. A—A in A only. 12. ०वयवत्यभि० C. 13. अनिष्टजनक० C.

इति। तत्र 'योषिदि'ति संज्ञायां निमित्तं [14]रमणीयदन्तौष्ठादिकम्, अनुव्यञ्जनं तत्र [15]स्पृहनीयवस्तुसादृश्यम्, यथा[16]—

"[17]स्वयमेव दह्यमानस्मरनिर्गतधूमवर्त्तिकाकारः।
चिकुरभरस्तव[18] सुन्दरि कामिजनं किङ्करं कुरुते॥"
[कुट्टनीमतम्, ४।४]

ज्ञानज्ञास्या अशुभसंज्ञाभावनेन, [19]सा तु—

[20]मज्जामस्थ्नामथ प्लीह्नां यकृतां शकृतामपि[21]।
पूर्णाः [22]स्नायुशिरास्युतास्त्रियश्चर्म[23]प्रसेविकाः॥
[Cf. तात्पर्यटीका, ४।२।३]

इति।

यद् वा—[24]ननु तत्त्वज्ञानान्मिथ्याज्ञाननिवृत्तिर्न भवत्येव, घटादितत्त्वज्ञानेऽपि[25] मिथ्याज्ञानतादवस्थ्यात्[26] इत्यत आह—दोषेति। दोषनिमित्तानां दोषप्रयोजकानां शरीरतद्रूपादीनां तत्त्वज्ञानादात्मभेदेनानात्मीयत्वज्ञानात्[27] अहंकारस्य [28]शरीरात्मभ्रमस्य निवृत्तिरित्यर्थः। दोषेति। दोषप्रयोजकमित्यर्थः। रूपादय इत्यादिपदेन शरीरस्यापि [29]परिग्रहः। सङ्कल्पकृता आत्मीयत्वात्माभेदभ्रमविषयीभूताः। ननु कथं शरीरादीनां दोषप्रयोजकतेत्यत आह—तन्निमित्तं त्विति। दोषनिमित्तं त्ववयविनि शरीरे आत्माभिमान इत्यर्थः। 'तु' शब्दो 'हि' समानार्थः। तथा च यतः शरीरे आत्मभ्रमो दोषनिमित्तमतः शरीरादेर्दोषप्रयोजकतेति भावः॥ ३॥

॥ समाप्तं तत्त्वज्ञानोत्पत्तिप्रकरणम्॥

14. मदीयकं तोष्टादिकं C. 15. स्पृहनीयस्तुसादृश्यं A, स्तूहनीयवस्तुसादृश्यं C. 16. तथा C. 17. अयमेव A. 18. ०भवं भव C. 19. सात्त C. 20—21. मज्जनस्य मथप्रीह्नां यद्गतार्थकुतामपि C. 22—23. स्थायुसिरालस्वा स्त्रियश्चर्म० A, स्नायुसिवानत्वा स्तिथश्चर्म० C. 24. न तु C. 25. ०ज्ञाने तपि C. 26. ०तदेवस्मादि C. 27. ज्ञाना तदात्माभेनेनात्मीयं A, भेदानात्मीय० ०ज्ञानादात्म C. 28. शरीरात् सत्रमस्य C. 29. पदग्रह C.

अथ [1]प्रसङ्गादुपोद्घाताद्वा[2] [3]विशिष्यावयविनिरूपणम् । तत्र संशयानुगुणं साधारणधर्ममाह—

विद्याऽविद्याद्वैविध्यात् संशयः ॥ ४ ॥

संशयः कार्यद्रव्यमणु [4]न वेत्याकारः । [5]विद्याऽविद्ययोः [6]प्रमाऽप्रमयोः द्वैविध्यात् अणुतदन्यविषयकत्वात्, तथा च प्रमेयत्वं भ्रमविषयत्वञ्च साधारणो धर्म इति भावः ॥ ४ ॥

अत्रावयविसाधनम् पूर्वोक्तहेतुं स्मारयति—

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

द्वितीयाध्यायस्थापितहेतोरवयविनो निश्चितत्वान्न[7] तत्संशय इत्यर्थः । तथाविधद्रव्यं नाणु, प्रत्यक्षद्रव्यत्वादिति भावः ॥ ५ ॥

अवयविनि बाधकं शङ्कते—

वृत्त्यनुपपत्तेरपि संशयानुपपत्तिः ॥ ६ ॥

अवयवेषु कृत्स्नत[8] एकदेशतश्चावयविनो वृत्त्यनुपपत्तेः नास्त्यवयवीत्यतोऽपि संशयानुपपत्तिरित्यर्थः । तथा च भाष्यम्[9]—

"कृत्स्नैकदेशावृत्तित्वादवयवा[A]नामवयव्यभावः"

इति । अवयवा ह्यवयविनि वर्तन्ते, अवयवी वा तेषु, नाद्योऽल्पपरिमाणस्याधिकपरिमाणासमवायात्, 'पटे तन्तु'रित्याद्यप्रतीतेश्च, वृत्तिरपि कात्स्न्र्येनैकदेशेन वा[A], आद्ये न तत्रावयवान्तरं स्यात्, मूर्त्तानामेकदेशताविरोधात्, द्वितीये तस्याप्येकदेशान्तरप्रसङ्गेऽनवस्था । न द्वितीयः,

---

1—2. प्रसङ्गत्वापाद्ध्याभात्वा C. 3. विशिष्टा० C. 4. नारित्याकारः C. 5. रित्यारित्याया: C. 6. प्रमां प्रमयो C. 7. ०त्वानु C. 8. कृसूत A, कृत्स्नत्र C. 9. भाष्यम् om. C. A—A in A only.

अवयवी[10] ह्यवयवे कार्त्स्न्येन वर्त्तते एकदेशेन वा, आद्ये एकत्र कार्त्स्न्येन[11] वृत्तावेकत्रैवावयवी स्यात्, अन्त्ये तस्मिन्नेकदेशेऽपि तथा स्वीकारादनवस्थेति भावः ॥ ७ ॥

ननु कार्त्स्न्यैकदेशाभ्यामवृत्तावपि स्वरूपेण[12] वृत्तेर्न वृत्त्यनुपपत्तिरित्याह—

तेषु चावृत्तेरवयव्यभावः ॥ ७ ॥

वृत्तेः कार्त्स्न्यैकदेशवृत्तिव्याप्यत्वात् तदभावेन[13] वृत्तिमात्रस्यैवाभावादवयव्यभावः। कार्यद्रव्यमणु स्पर्शवत्त्वात्, न [14]चाप्रयोजकत्वम्, स्पर्शवतो वस्तुमात्रस्य वा उभयावृत्तित्वेनावयवबहुत्वादीनां [15]महत्त्वकारणानां विरहेण [16]महत्त्वानुपपत्तेरिति तु[17] निगर्वः ॥ ७ ॥

नन्ववयवावृत्तावप्यवयवान्यवृत्तिरेवास्त्ववयवीत्यत्राह—

पृथक् चावयवेभ्योऽवृत्तेः ॥ ८ ॥

उक्तन्यायेनावयवेभ्योऽन्यत्राप्यवृत्तेरिति भावः ॥ ८ ॥

नन्ववयवाभ्युपगमे [18]नावयविनोऽपलापः सम्भवति, तयोरैक्यादित्यत आह—

न चावयव्यवयवाः ॥ ९ ॥

न च स्वं स्वावयवम्, विरोधादिति भावः।

परे तु सूत्राण्येवं व्याचक्षते—[19]विद्येति। द्रव्यं समवेतं[20] न [21]वा,

---

10. अवयवं C. 11. कार्येण C. 12. स्वरू(पे हि अवयवे कार्त्स्न्ये वर्तते)पेण A, brackets in the Mss. 13. तदभावो न C. 14. च प्रयोजक० C. 15. बहुत्व० C. 16. महत्त्वानुत्पत्ते० C. 17. त्व C., 18. वावयविनो० C. 19. रित्येति C. 20. समवेतत्व A. 21. न om. A,

अनेकसमवेतं न[A] वेति वा, तत्समवेतं[A] तदन्यसमवेतं न वा, तद्वृत्ति तदन्यवृत्ति न [22]वेत्याकारः संशयः। तदसंशयेति। द्रव्येऽनेकसमवेतत्वस्य प्रत्यक्षग्रहिर्द्रव्यत्वेन सिद्धत्वान्न तत्संशय इत्यर्थः। अनेकद्रव्यसमवेतत्वश्च बहिर्द्रव्यप्रत्यक्षे तत्प्रयोजकमहत्त्वे [A]वा प्रयोजकम्, महत्त्वे[A] वा प्रयोजकमिति भावः। शङ्कते—[23]वृत्त्यनुपपत्तेरिति। उभयत्रेत्यादिः। तदनुपपत्तिः [24]कार्त्स्न्यैकदेशविकल्पानुपपत्तेरिति भावः। [A]किञ्च—अवयवी किमवयवेषु वर्त्तते तदन्यत्र वा स्वस्मिन् वा। आद्य आह—तेष्विति। अवयविष्वित्यर्थः, कृत्स्नैकदेशविकल्पेनेति भावः। द्वितीय आह—पृथगिति। तृतीय आह—न चेति। विरोधादिति भावः।[A]

यद् वा—तद्वृत्ति न[25] तदन्यवृत्ति, तदन्यत्र कार्त्स्न्येनावृत्तित्वे [26]सत्येकदेशेनावृत्तित्वादिति वृत्त्यनुपपत्तेरित्यस्यार्थः। तर्कपुरःसरं हेत्वन्तरमाह—तेषु चावृत्तेरिति। प्रसङ्गेनेति शेषः। तदन्यवृत्तित्व इत्यादिश्च[27]। तथा च तद्वृत्ति न तदन्यवृत्ति, तद्वृत्तित्वात्, यदि तदन्यवृत्तिः स्यात् तद्वृत्ति न स्यादिति भावः। ननु माऽस्त्वनेकद्रव्यवृत्तित्वरूपमवयवित्वम्, जन्यमहत्त्वरूपन्तु[28] स्यादित्यत आह—पृथगिति[29]। महत इत्यादिः[30]। द्रव्यं कार्यमहतः पृथक् अवयवेभ्य इति, सप्तमर्थे पञ्चमी। तथा चानेकवृत्तित्वादिति पर्यवसितो हेतुः। तर्कान्तरम(प्य)ाह—पृथगिति। अवयवेभ्योऽन्यत्र सर्वत्रावृत्तिरित्यर्थः। अयम्भावः—तद्वृत्तेस्तदन्यवृत्तित्वे तदन्यत्वाविशेषादन्यत्र सर्वत्रैव वर्त्तेत, न चैवमतो न तदन्यवृत्तीति। अनेकवृत्तित्वाभावसाधकान्तरं वाऽह[31]—पृथगिति। अवयवेभ्योऽन्यत्र सर्वत्रावयवेषु [32]वा वृत्तेरित्यर्थः।

A—A in A only 22. कृत्याकारः C. 23. वत्यनुप॰ C. 24. कार्यैकदेश॰ C. A—A in A only. 25. न om. A. 26. यद्येक॰ A. 27. न om. C. 28. ॰रूप C. 29. प्रथगिति A. 30. महद् इत्यादि महत इत्यादिः C. 31. ॰कान्तरमाह A, C. 32. चावृत्त॰ C.

तथा च द्रव्यं नानेकवृत्ति, सर्वत्रावृत्तित्वादिति भावः। अवयवभावापन्नोऽवयवी[33] च कपालादिः सम्भवत्येव नेत्याह—न चेति। न च द्रव्यसमवायिनो द्रव्यसमवेतत्वं सम्भवति, कृत्स्नतो द्रव्यसमवायित्वे द्रव्यसमवेतत्वानुपपत्तेः, एकदेशस्वीकारे चानवस्थानात्, द्रव्यसमवायिमात्रस्यैव द्रव्यसमवेतत्वप्रसङ्गेनानवस्थानाच्चेति[34] भावः ॥ ९ ॥

सिद्धान्त्याह[35]—

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ १० ॥

अनेकस्याशेषता हि कृत्स्नता, किञ्चित्त्वमेकदेशता, न चैकस्मिन्नवयविनि[36] ते सम्भवत इति नायं प्रश्न उपपद्यत इति भावः ॥ १० ॥

अवयवान्तराभावेऽप्यवृत्तेरहेतुः ॥ ११ ॥

अवयवान्तरस्यैकदेशस्याभावे वृत्तेः कात्स्न्र्येन वृत्तेः, अपिकारादवयवान्तरसत्त्वेऽपि वृत्तेरेकदेशेन च[37] [38]वृत्तेरभावादित्यहेतुः[39], अप्रयोजकत्वेन च [40]व्याप्त्यादेरभावादित्यर्थः। अयम्भावः—किमिदं कात्स्न्र्येन वृत्तित्वम्; साकल्येन वृत्तित्वमिति चेत्, [41]साकल्यम् अनेकता वाऽशेषता वा[42]; आद्ये एतस्य घटस्यानेकता नास्त्येवेति क्वचिदपि न तथा वृत्तितम्, द्वितीये त्वनेकत्र तथा स घट वर्त्तत इति। एकदेशेन वृत्तित्वञ्चावयवेन सह वृत्तित्वम्, तच्च नैकत्रापि कपाले। अथ कात्स्न्र्येन वृत्तिः पर्याप्तिः, एकदेशेन वृत्तिरव्याप्यवृत्तित्वे [सति] पर्याप्तिः, अव्याप्यवृत्तित्वञ्च स्वरूपसम्बन्धविशेषः; तथा च—इदं नैतद्वृत्ति, तत्रापर्याप्तत्वे सति अत्राव्याप्यवृत्तित्वेभिन्नत्वात् [?अव्याप्यवृत्तिभिन्नत्वात्]—इति चेन्न, अत्र पर्याप्तत्वेनासिद्धत्वात्, न चान्यत्र पर्याप्तस्यात्र पर्याप्त्यनुपपत्तिः, मानाभावादिति संक्षेपः ॥ ११ ॥

33. भावाप अवयवी C. 34. प्रसङ्गे लाघवसमवेतत्वप्रसङ्गेनानवस्थानाच्चेति C. 35. सिद्धान्तमाह C. 36. ०एकस्मिन्नवयवे A. 37. वृत्तिवद्वादावपि C. 38—39. वृत्तेरभावादित्यत्त हेतुः A, वृत्तिरभावादित्यहेतुः C. 40. व्याप्त्योदेव भावा० C. 41—42. साकल्यमानकभावाऽशेषभावा C.

"तदसंशयः पूर्वहेतुप्रसिद्धत्वात्" [न्या. सू. ४।२।५] इत्यनेन यत्साधकमुपन्यस्तं तन्न युज्यत इत्यभिप्रायवान् शङ्कते—

केशसमूहे तैमिरिकोपलब्धिवत्तदुपपत्तिः ॥ १२ ॥

यथा तैमिरिकेन प्रत्येकं केशा न गृह्यन्ते[43], एवं परमाणवोऽपि[44] मिलिता एव गृह्यन्त इति सूत्रार्थः। मिलनमेव प्रत्यक्षप्रयोजकं न महत्त्वमिति भावः ॥ १२ ॥

उत्तरम्—

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ १३ ॥

इन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य[45] पटुमन्दभावः [46]स्वयोग्यानतिक्रमेण। ननु योग्येऽपि साक्षात्कारजनकत्वम्, [47]अणवश्च न योग्याः, महत्त्वस्य योग्यतात्वात्, मिलनस्य चानतिप्रसक्तस्यानिरूपणादिति भावः ॥ १३ ॥

[48]नन्ववयवत्वेन विनाशित्वनियमात् प्रलये निखिलावयवानामेव विनाशात्ततः परमवयवावयविसृष्टिर्न[49] स्यादित्याशङ्कते—

अवयवावयविप्रसङ्गश्चैवमाप्रलयात् ॥ १४ ॥

प्रलयपर्यन्तमेवैवं प्रसङ्गः [50]स्यात्, ततः परं न[51] स्यादित्यर्थः ॥ १४ ॥

उत्तरम्—

न प्रलयोऽणुसद्भावात् ॥ १५ ॥

[52]नावयवत्वेन प्रलयो विनाशिता[53], परमाणूनां धर्मिग्राहकमानेन सदातनत्वादविनाशित्वादिति भावः ॥ १५ ॥

---

43. न add. C. 44. ॰माणवोप A. 45. ॰ग्रहणस्यं C. 46. अयोग्या॰ C. 47. अनववच्च A. 48. ननु वयवत्वे C. 49. ॰सृष्टित्व C. 50.सस्यात् C. 51. न om. C. 52. तं त एवं स्यादित्यर्थः उत्तरं जावयवत्वेन C. 53. विनाशेत A.

परमतमाह—

परं वा त्रुटेः ॥ १६ ॥

[54]त्रसरेणोः परमेव वा प्रलय इति भावः, प्रलये परमाणूनां [55]त्रुटीनाम्वा सद्भावान्न[56] ततः परमवयविसृष्ट्यनुपपत्तिरिति पर्यवसितार्थः ।

यद् वा—[57]नन्ववयवस्यावयवित्वेऽनवस्थितिर्नावयवावयविभाव इत्यत्राह—अवयवेति । अवयवस्यावयवित्वप्रसङ्गश्च विनाशिन इत्यर्थः, [58]अवयवत्वेनावयवित्वे[59] साध्ये [A]विनाशित्वमुपाधिरिति भावः । नन्ववयवत्वेन[A] विनाशित्वनियमात्[60] [61]साधनव्यापकत्वेन[62] नायमुपाधिरित्यत[63] आह—नेति । व्याख्यातार्थमिदमादिसूत्रद्वयम् । ये[64] [65]पुनरुक्तनियमबलप्रमाणसिद्धत्वादनवस्था न दोषायेति वदन्ति, तन्मते बाधकमाह—[66]परमिति । अन्यथेत्यादिः, महत्त्वं स्यादिति[67] शेषः, वाकारोऽप्यर्थः[68] । तथा चान्यथा त्रुटेरपि प्रकृष्टं महत्त्वं स्यात्, अगलितावयवकत्वादिति भावः ॥ १६ ॥

॥ समाप्तमवयविप्रकरणम् ॥

---

54. त्र्यसरेणोः A. 55-56. त्रुटीनार्थसंभावान् C. 57. ननु वयव C. 58-59. अवयवत्वेनावयवत्वेसाध्ये A, अवयवित्वेनावयवित्वे साध्ये C. A-A in A only. 60. विनाशित्वे नियमात् C. 61-62. साधनाव्यापकत्वेन A, माधनव्यापकत्वे C. 63. नायमुपाधेविद्युत C. 64. येन A. 65. पुनरुक्तानियम॰ A. 66. अनुमिति C. 67. महत्त्वादिति C. 68. वाकारोप्या C.

अथ निरवयवत्वप्रकरणम्। तत्र पूर्वपक्षसूत्रम्—

आकाशव्यतिभेदात्तदनुपपत्तिः ॥ १७ ॥

तस्याणोः निरवयवस्यानुपपत्तिः, [1]अन्तर्बहिराकाशसम्बन्धादित्यर्थः, अणुर्न निरवयवः[2], सावयवो वा, अन्तराकाशसम्बन्धाद्बहिराकाशसम्बन्धाद् घटवदिति भावः ॥ १७ ॥

नन्वन्तराकाशसम्बन्धो नास्त्येवेत्यसिद्धो हेतुरित्यत आह—

आकाशासर्वगतत्वं वा ॥ १८ ॥

स्यादिति शेषः। [3]आकाशस्याण्वन्तःसम्बन्धाभावे आकाशस्यासर्वगतत्वं स्यादित्यर्थः। अणोर्निरवयवत्वानुपपत्तिर्वा स्यात्, [4]आकाशस्यासर्वगतत्वम्वा[5] स्यादिति भावः ॥ १८ ॥

उत्तरम्—

अन्तर्बहिरिति कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः ॥ १९ ॥

बहिरन्तःशब्दौ कार्यद्रव्यस्य समवायिकारणताविशेषमभिदधतो[6]ऽतोऽकार्ये[7] परमाणौ अन्तर्बहिरभावः, तथा चासिद्धो हेतुरिति भावः। न चाकाशान्यत्वे [8]सत्याकाशसंयोगित्वमाकाशसंयोगित्वम्वाऽकाशव्यतिभेदः[9], अप्रयोजकत्वादिति ॥ १९ ॥

नन्वेवमाकाशमसर्वगतं स्यात्[10], परमाण्वन्तः[11]सम्बन्धाभावादित्यत आह—

शब्दसंयोगविभवाच्च सर्वगतम् ॥ २० ॥

---

1. अन्तरा हि राकाश० C. 2. अणुनामिव वयवः C. 3. आकाशस्यार्थन्तः० C. 4-5. स्वंस्याकारवर्गतत्वर्था C. 6. ०मभिधत्ते A. 7. अतो न कार्ये C. 8-9. सत्याकाशसंयोगित्वाद्याकाशव्यतिते नः C. 10. ०आकाशमसर्वत्नं पस्यात् C. 11. परमाणुस्तः C.

शब्देनानुमितोऽयं[12] संयोगविभवः सर्वमूर्त्तसंयोगः, तस्मात् [13]सर्वगतं गगनं[14] व्यवह्रियते, न तु सकलमूर्त्तान्तर्बहिःसंयोगादिति भावः ॥ २० ॥

[15]नन्वाकाशस्य मूर्त्तसंयोगित्वे मूर्त्तानामुत्तरदेशगतिप्रतिरोधः, पूर्वदेशगतिश्च[16] स्यादत आह—

अव्यूहनाविष्टम्भविभुत्वानि[17]चाकाशधर्माः ॥ २१ ॥

व्यूहनं पूर्वदेशगतिप्रयोजकत्वम्, विष्टम्भ उत्तरदेशगतिप्रतिबन्धप्रयोजकत्वम्, स्पर्शवतस्तत्र प्रयोजकत्वादाकाशस्य च [18]विभुत्वेन स्पर्शविरहान्न[19] तत्त्वमिति भावः।

वस्तुतस्तु—आकाशव्यतिभेदादित्याकाशान्यत्वे सत्याकाशसंयोगादित्यर्थः। विशेषासिद्ध्या वाऽकाशासर्वगतत्वं स्यादिति द्वितीयसूत्रार्थः। अत्र समवेतद्रव्यत्वरूपसावयवत्वे साध्येऽन्तर्बहिर्वत्त्वमुपाधिः, न च पक्षे परमाणौ तत्सत्त्वादुपाधेः साधनव्यापकत्वम्, परमाणावकार्यत्वेन कारणविशेषस्य तस्याभावादित्यभिप्रायवान् समाधत्ते—अन्तरिति। ये पुनराकाशासर्वगतत्वं स्वीकृत्य स्वरूपासिद्धिमाहुस्तन्मतं निरामरोति—शब्देति। शब्दात् [20]सकलजन्यमहत्त्ववत्संयोगाद् [21]विभुत्वाच्च व्यतिरेकिणोऽन्वयिनश्च[22] सकलपूर्वसंयोग्याकाशमिति भावः। नन्वाकाशस्याणुसंयोगित्वे संस्थानवत्त्वसावयवत्वाविभुत्वानि स्युः, अणोः[23] [24]साक्षात्सम्बन्धवत्त्वेन[25] संस्थानवत्त्वादिनियमादित्यत आह—

---

12. ०मितोऽर्थः C. 13-14. सर्वगति गमनं C. 15. नन्वाकाशमूर्त्त० C. 16. ०गतिश्चास्या A. 17. वाकाशधर्माः A, C. Traditional reading retained in view of the remark "...आकाशस्य च विभुत्वेन स्पर्शविरहात्" etc. 18. चित्तत्वेन C. 19. ०विरहात् C. 20. ०जन्यमहत्संयोगात् A. 21. रिक्तत्वाच्च C. 22. व्यतिरेकित्वान्वयि० C. 23. अथः A, अथ C. 24-25. साक्षात्सत्ववत्त्वेन C.

अव्यूहेनेति। व्यूहः संस्थानवत्त्वम्, विष्टम्भः सावयवत्वम्, अव्यूहना-दीनामाकाशे[26] प्रमाणसिद्धत्वादुक्तनियमो नास्तीति भावः ॥ २१ ॥

आक्षिपति—

मूर्त्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ २२ ॥

मूर्त्तत्वेन सावयवत्वनियमादणोरवयवसद्भाव इत्यर्थः। परमाणुः साव-यवः, मूर्त्तत्वादिति भावः। यद् वा—मूर्त्तत्वेन संस्थानवत्त्वमनुमेयम्, तेन सावयवत्वं साध्यमिति भावः ॥ २२ ॥

[27]सावयवत्वसाधकान्तरमाह—

संयोगोपपत्तेः ॥ २३ ॥

परमाणुः सावयवः, संयोगित्वात्। निरवयवत्वेऽव्याप्यवृत्तेरवच्छेदकं विनाऽनुपपद्यमानस्य संयोगस्य तत्रानुपपत्तिः स्यादत एवाकाशादिकम-प्यसत्, असंयोगि वेति भावः। द्रव्यारम्भकसंयोगवत्त्वादित्यर्थ इत्यपि [28]वदन्ति ॥ २३ ॥

समाधत्ते—

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ २४ ॥

मूर्त्तत्वादिना निरवयवत्वप्रतिषेधो न, तेषामनवस्थाकारित्वात्। ननु प्रामाणिकत्वादियमनवस्था न दोषायेत्यत आह—अनवस्थानुपपत्तेश्चेति। अनवस्थाया अप्रामाणिकत्वाच्चेत्यर्थः। न हि मूर्त्तत्वादेः सावयवत्व-व्याप्यत्वे मानमस्तीति भावः। संयोगश्च परमाणौ दिगाद्यवच्छेदेनैव वर्त्तत इत्यवधेयम्।

नव्यास्तु—आकाशेत्यादिसूत्रेणाकाशान्यत्वे [29]सत्याकाशसंयोगित्वं परमाणोः सावयवत्वसाधनाय हेतूकृतम्। तृतीयसूत्रेणानिष्टमुपदर्शयता

26. ०माकाशो A, C. 27. सावयवत्व० om, A. 28. ०दित्यनु इत्यादि C. 29. ०आकाशस्यत्वे A.

स्वरूपासिद्धिर्वारिता[30]। [31]यो पुनरन्तर्बहिर्वस्त्वं हेतूकरोति, तन्मतं स्वरूपासिद्धिशङ्कया दूषयति—अन्तरिति। ये पुनराकाशासर्वगतत्वमङ्गीकृत्याकाशसंयोगित्वमप्यसिद्धं ब्रुवते[32], तन्मतं दूषयति—शब्देति। "वस्तुतस्त्वि"त्यादिना व्याख्यातमेतत्। अव्यूहनेति सूत्रमपि हेत्वन्तरमाह। मूर्त्तीति सर्वमन्यद् व्याख्यातार्थमेवेत्याहुः ॥ २४ ॥

॥ समाप्तं निरवयवत्वप्रकरणम् ॥

30. ०वाधिया A. 31. येन पुन० A. 32. प्रव्रते C.

^A^अथ प्रसङ्गाद् बाह्यापह्नवनिराकरणप्रकरणम्^A^। तत्र पूर्वपक्षसूत्रम्—

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटानुपलब्धिवत् ॥ २५ ॥

^A^घटादीनां याथात्म्यं ज्ञानान्यत्वम्, बुद्ध्या विवेचनादुपपत्तेः, तेन नोपलभ्यते ज्ञानानतिरिक्तत्वमुपलभ्यत इति यावत्। यद् वा—भावानां ज्ञेयानां याथात्म्यानुपलब्धि^A^र्ज्ञानानतिरिक्तत्वम्, बुद्ध्या गृह्यमाणत्वादित्यर्थः। ^A^तज्ज्ञानविषयो न^A^तज्ज्ञानान्यः, तद्धीविषयत्वात्, तज्ज्ञानवदिति तु निष्कर्षः। 'अयं घट' इत्यादिज्ञानस्य स्वविषयकत्वेनैव सविषयकत्वोपपत्तौ नातिरिक्तविषयसिद्धिर्गौरवादिति भावः। अत्रैव समुचितं परमतसिद्धं दृष्टान्तमाह—तन्त्विति। यथा तन्तुव्यतिरिक्ते पटोपलब्धिर्नास्ति, 'पट' इति प्रतीतेस्तन्तुविषयकत्वेनैवोपपत्तेः, गौरवेणातिरिक्तविषयकत्वाकल्पनात्, तथात्रापीति भावः। यद् वा—भावानां घटत्वादिधर्माणां[1] याथात्म्यानुपलब्धिर्ज्ञानान्यस्मिन्ननुपलब्धिः, बुद्ध्या विवेचनात् ज्ञानप्रकारत्वात्। घटत्वादि ज्ञानान्यानुपलब्धिकं ज्ञानान्यावृत्ति वा, ज्ञानप्रकारत्वात्, ज्ञानत्ववदिति। घटो ज्ञानं ज्ञेयत्वादिति वाऽर्थः[2]। पक्षतावच्छेदकावच्छेदेन [3]ज्ञानत्वसिद्धेरुद्देश्यत्वम्। 'अयं घट' इत्यादि ^A^प्रतीतेः अस्मिन् घटत्वादि^A^विषयत्वेनैवोपपत्तेर्नातिरिक्तघटादि कल्प्यते गौरवादिति भावः। न च घटत्वादिस्वीकारे बाह्याभ्युपगमापत्तिः, घटत्वादेर्ज्ञानवृत्तिधर्मत्वेनान्तरत्वात्[4] ॥ २५ ॥

राद्धान्तसूत्रम्—

व्याहतत्वादहेतुः ॥ २६ ॥

तन्त्वोः पटरूपताया व्याहतत्वादप्रामाणिको दृष्टान्त इति भावः। न हि बौद्धानामिवास्माकमपि नातिरिक्तः पट इति भावः ॥ २६ ॥

A—A in A only. 1. घटत्वादीनां धर्माणां A. 2. ०ज्ञेयत्वादित्यर्थः A.
3. ज्ञानत्वसत्त्वे० A. A—A in A only. 4. ०नान्तरत्वात् C.

ननु पटस्य तन्त्वन्यत्वे[5] तन्त्वविषयकलौकिकसाक्षात्कारविषयत्वरूपं पृथग्ग्रहणं स्याद् घटादिवेत्यत आह—

तदाश्रयग्रहणादपृथग्ग्रहणम् ॥ ३७ ॥

तन्त्वाश्रयकत्वात् पटस्य न [A]पृथग्ग्रहणमित्यर्थः। पटचक्षुःसंयोगदशायां तन्तुचक्षुःसंयोगस्यापि सत्त्वान्न पृथग्ग्रहणमिति भावः इति सम्प्रदायः।

नव्यास्तु—उक्तहेतावुक्तसाध्यव्याप्तेर्मानाभावेन व्याहतत्वान्न स हेतुरिति व्याहतत्वादिति सूत्रार्थः। भवन्मते ज्ञानान्यस्य व्याहतत्वादप्रसिद्धत्वादप्रसिद्धसाधको हेतुरित्यर्थ इत्यपि केचित्। ननु घटज्ञानस्य घटान्यत्वे पटज्ञानस्येव[6] घटाविषयकसाक्षात्कारविषयत्वलक्षणं[A] पृथग्ग्रहणं स्यादित्यत आह—तदाश्रयत्वादिति[?]। तद्विषयकत्वादित्यर्थः। विषयिण एव विषयसन्निकर्षान्न[7] पृथग्ग्रहणमिति भाव इत्याहुः ॥ ३७ ॥

ननूक्तदृष्टान्तस्याप्रमितत्वेऽपि न क्षतिः, न हि तत्र व्याप्तिर्गृह्यते येन व्याप्त्यग्रहः स्यात्, व्याप्तिग्रहविषयीभूतदृष्टान्तस्य च बहुशो दर्शितत्वात् साध्याप्रसिद्धेश्च निवारितत्वाल्लाघवादेव चोक्तव्याप्तिग्रह इति न तदनुपपत्तिगन्धोऽपीत्यत आह—

प्रमाणतश्चार्थप्रतिपत्तेः ॥ २८ ॥

अर्थानां बाह्यानां पटघटादीनां प्रत्यक्षादिप्रमाण(तः)प्रतिपत्तेरिति भावः। न हि प्रामाणिकः पदार्थो गौरवेण निवार्यते, चित्तस्यापि विलोपापत्तेः। तदुक्तं वार्त्तिककृता—

"यदि चोपलभ्यमानं जाग्रदवस्थायां [8]बाह्यमसन्तमिति[9] मन्यसेऽथ चित्तमस्तीत्यत्र को हेतुः" [न्या. वा. ४।२।३२, पृ० १०७८] इतीति भावः ॥ २८ ॥

---

5. तन्त्वस्यत्वे C. A—A in A only 6. पटज्ञानस्यैव A. 7. कर्षकत्वान्न C. 8—9. बाह्यगमतमिति C

अथ प्रतीयत एव बाह्यं घटादीति सत्यम्, न तु [10]मानत इत्यत आह—

प्रमाणोपपत्त्यनुपपत्तिभ्याम् ।। २९ ।।

व्याघात इति शेषः। यदि बाह्ये[11] प्रमाणमुपपन्नं तर्हि न [12]बाह्यापलापः, [13]अथ न तदुपपन्नं तर्हि तत्प्रत्ययोऽपि न स्यात्, तस्य प्रमाणाधीनत्वादिति भावः। यद् वा—ननु बाह्यं चक्षुरादिना प्रतीयते, न च चक्षुरादि प्रमाणम्, असद्बाह्यविज्ञप्तिजनकत्वादित्यत आह—प्रमाणेति। चक्षुरादीत्यर्थः। यदि चक्षुराद्युपपन्नं वस्तुपत्, न तर्हि सर्वबाह्यापलापः; अथानुपपन्नमसत्, न तर्हि तस्य प्रत्यायकत्वम्, असतोऽजनकत्वादिति भावः ॥ २९ ॥

चक्षुरादितो न बाह्यप्रत्ययः, किन्तु [14]स्वप्नादिवद् वासनावशात्, न च वासना प्रमाणम्, तथात्वे स्वप्नादिविषयस्यापि प्रामाणिकतापत्तेरित्यभिप्रायवान् शङ्कते—

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ।। ३० ।।

[15]प्रमाणं तत्त्वेनाभिमतं चक्षुरादि, प्रमेयं घटादि ॥ ३० ॥

जाग्रदवस्थविज्ञानस्य [16]वासनाप्रयोज्यत्वादृष्टेनेदमभिधानं[17] युक्तमित्यत आह—

मायागन्धर्वनगरमृगतृष्णिकावद्वा ।। ३१ ।।

स्पष्टार्थमेतत् ।। ३१ ॥

---

10. मणित C. 11. बाह्यं: C. 12. बाह्याप० C. 13. तथ C. 14. स्वप्नादि० A, त्वप्रादि० C. 15. प्रमाणत्वेनाभिमतं A. 16–17. वासनाप्रयोज्यत्वाबृष्टोनेदम० C.

उत्तरम्—

हेत्वभावादसिद्धिः ॥ ३२ ॥

[18]घटादिनामसत्त्वे सन्निकर्षादीनां प्रतीतिहेतूनामभावादसिद्धिः[19] अप्रतीतिः [20]स्यादित्यर्थः। न ह्यसति सन्निकर्षव्याप्तिः [१०कर्षख्यातिः] शक्तिर्वा वर्त्तते, तथात्वेऽसत्त्वव्याघातापत्तेरिति भावः। घटादीनामसत्त्वे प्रमाणाभावादसत्त्वासिद्धिरिति वाऽर्थः ॥ ३२ ॥

नन्वसतः अभाने कथं स्वप्नविषयस्यासतः [21]प्रतिभानमित्यत आह—

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ३३ ॥

पूर्वोपलब्धविषयः [इति शेषः]। स्मृतिवद्[22] बाह्यमानसज्ञानवच्च स्वप्नविषयाभिमानोऽपि पूर्वोपलब्धसत्पदार्थविषय एवेत्यर्थः। यद् वा—ननु सन्निकर्षादिविरहिणोऽभाने कथं स्वप्नयिषयस्य Aतथाविधस्य [23]प्रतिभानमत आह—स्मृतीतिA। तथा च तत्र[24] ज्ञानमेव सन्निकर्ष इति भावः ॥ ३३ ॥

ननु शुक्तिरजतादीनां पारमार्थिकत्वे शुक्तौ रजतप्रतीतेरविच्छेदः स्यादित्यत आह—

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानवत् प्रतिबोधे ॥ ३४ ॥

विनाशोऽनुत्पत्तिरेवं प्रणाशोऽपि। तत्त्वज्ञानस्य 'नेदं रजतमि'त्याकार-'स्येदं रजतमि'त्याकारमिथ्याधीविरोधित्वात्, [25]तत्सत्त्वदशायां विच्छेद उपपद्यत इति भावः ॥ ३४ ॥

---

18. घटादिना॰ C. 19. ॰भावासिद्धिः C. 20. सपदीत्यर्थः C.
21. प्रतीतान॰ C. 22. स्मृतिवः C. A—A in A only.
23. प्रतीभान॰ A. 24. तत्र om. A. 25. सत्त्वदशायां C.

ननु शुक्तिरजतादीनां पारमार्थिकत्वे शुक्ता'विदं रजतमि'ति प्रतीतेः प्रमात्वं स्यात्, पारमार्थिकविषयकत्वादित्यत आह—

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ३५ ॥

एवं प्रमात्वम्, निमित्तस्य प्रकारीभूतधर्मस्य विशेष्ये सद्भावात्। Aउपलम्भः प्रमाणसूचनायA। तथा च तदभावान्न तस्य प्रमात्वमिति भावः।

परे तु नन्वेवं बुद्धिलोपः, अर्थस्यैवोल्लेखात्, तथा च बुद्धिलोपादर्थगन्धोऽपीत्यत आह—बुद्धेश्चेति। एवम् अर्थवत् प्रत्ययः, निमित्तम् इन्द्रियसन्निकर्षादि, तत्सद्भावादित्यर्थः। एवम्A अर्थवदप्रतिषेधः, बुद्धिः प्रत्ययः[26], निमित्तं सन्निकर्षादि, बुद्धिस्वरूपसद्भावात्[27], निमित्तस्य विषयस्येव[28] बुद्धेः स्वरूपोलम्भादिति वाऽर्थA इत्याहुः ॥ ३५ ॥

न'न्विदं रजतमि'ति प्रत्ययस्य भ्रमत्वे[29] तत्रेदन्त्वं न स्यात्, प्रमात्वे रजतत्वमपि स्यात्; न च तत्र[30] [31]प्रमात्वमप्रमात्वञ्च, विरोधात्; तत्रेदं रजताकारं ज्ञानमवभासत इत्युपेयत इत्यत आह—

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ३६ ॥

तत्त्वं धर्मिरूपम्, प्रधानमारोप्यम्, तद्भेदान्मिथ्याबुद्धेः प्रमात्वाप्रमात्वरूपद्वैविध्योपपत्तिरित्यर्थः। एकत्र तत्प्रमात्वाप्रमात्वे एव विरुद्धे, न त्वेकस्य प्रमात्वमन्यस्याप्रमात्वमपीति भावः ॥ ३६ ॥

॥ समाप्तं बाह्यार्थभङ्गनिराकरणप्रकरणम् ॥

A—A in A only. A—A in A only. 26. बुद्धिप्रत्ययः A. 27. ०स्वरूपासम्भवात् A. 28. विषयस्यैव A. 29. भ्रमत्वं A. 30. तत्त्व C. 32. प्रमात्वञ्च C.

उत्पन्नेऽपि द्वित्रिकतत्त्वज्ञाने तद्विनाशादनन्तरं [१ ०नाशानन्तरं] मिथ्याज्ञानोत्पत्तौ बाधकाभावादनुपपन्नोऽपवर्ग इति तत्त्वज्ञानविवृद्धि-प्रकरणमारभ्यते। विवृद्धिस्तु स्वोत्तरवर्त्तिस्वसमानाधिकरणमिथ्याज्ञान-कान्यत्वे सति [स्व]समानाधिकरणतत्त्वज्ञानपूर्ववर्त्तित्वम्। तत्र तत्त्व-ज्ञानविवृद्धौ हेतुमाह—

समाधिविशेषाभ्यासात् ॥ ३७ ॥

समाधिविशेषस्तत्त्वबुभुत्सयाऽन्यतः प्रत्याहृतस्य धारकेण[1] प्रयत्नेन धार्यमाणस्य हृत्पुण्डरीकादौ मनस आत्मसंयोगः, [2]तदभ्यासः तत्-प्रौनःपुन्यम्, तस्मात्[3]; तत्त्वज्ञानविवृद्धिरिति शेषः। पञ्चमी च प्रयोज्यत्व इति भावः ॥ ३७ ॥

आक्षिपति—

नार्थविशेषप्राबल्यात् ॥ ३८ ॥

न [4]समाधिविशेषाभ्यासः, अर्थविशेषाणां स्रक्चन्दनादीनां बलवत्त्वा-दित्यर्थः ॥ ३८ ॥

क्षुदादिभिः[5] प्रवर्त्तनाच्च ॥ ३९ ॥

न समाधिरित्यनुषज्यते[6] ॥ ३९ ॥

उत्तरम्—

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ४० ॥

जन्मान्तरकृतयोगाभ्यासादिसंस्कारस्य प्रतिबन्धकोत्सारकस्यानुबन्धात् तथाभूतसमाधिसिद्धिर्येन योगोत्सङ्गाः सन्तोऽप्यकिञ्चित्करा इति भावः ॥ ४० ॥

1. धातृकेण C. 2—3. तदभ्याससम्भात् पौनःपुन्यं तस्मात् A. 4. साधि-विशेष० C. 5. क्षुद्रादिभिश्च A, C. Since the additional च has not been stated or explained in the commentary, we have etained the traditional reading. 6. ०सज्यते C.

अन्यथाऽपि प्रत्यनीकपरीहारमाह—

[7]अरण्यगुहापुलिनादिषु[8] योगाभ्यासोपदेशः ॥ ४१ ॥

तत्र बाह्यव्यासङ्गाभावात् [A]नानुपपन्नः समाधिः[A] इति भावः ॥ ४१ ॥

[A]तटस्थः शङ्कते—

अपवर्गेऽप्येवं प्रसङ्गः ॥ ४२ ॥

यदि बाह्यव्यासङ्गाभावादेव तत्त्वज्ञानं तद्यपवर्गेऽपि तत्त्वज्ञानं स्यात्, तदाऽपि बाह्यव्यासङ्गाभावादिति भावः[A] ॥ ४२ ॥

समाधत्ते—

न निष्पन्नस्यावश्यम्भावित्वात् ॥ ४३ ॥

निष्पन्ने शरीरादिसहकारिसम्पन्ने[9] तत्त्वज्ञानस्यावश्यम्भावित्वात्[10], न तु बाह्यव्यासङ्गाभाव [11]एवेत्यर्थः ॥ ४३ ॥

अपवर्गे च शरीरादि नास्तीति न तदा [12]ज्ञानोत्पत्तिरित्यभिप्रायवानाह—

तदभावश्चापवर्गे ॥ ४४ ॥

तस्य शरीरादेरभाव [13]इत्यर्थः ।

यद् वा—ननु परकीयशरीरादिसहकारिबलादेव मुक्तस्य ज्ञानमस्तु, सामान्यत एव शरीरादेः सहकारित्वावधारणादित्यत आह—तदिति । तदात्मीयज्ञानसहकारिशरीरादेरभाव इत्यर्थः। स्वकर्मविशेषोपपत्तेरेव[14] शरीरादि सहकारि, न च [15]मुक्तस्य तदस्तीति भावः ॥ ४४ ॥

समाधिसहकारिणो दर्शयति—

तदर्थं [16]यमनियमाभ्यामात्मसंस्कारो योगाच्चात्मविध्युपायैः ॥ ४५ ॥

---

7. अनन्य० A. 8. ०प्रजिनादिषु A. A—A in A only. 9. ०सम्पन्ने om. C. 10. ०भावित्व C. 11. एव om. C. 12. ०पत्ति नित्यप्राय० C. 13. तात्पर्यः C. 14. ०पत्तेमेव A, C. 15. सूक्तस्य C. 16. ०नियमाभ्यासात् ससंस्कारो A.

तदर्थं विशिष्टतत्त्वज्ञानार्थं समाध्यर्थं वा। यमो निषिद्धवर्जनम्। नियमः शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि[17]। यमः सर्वाश्रमसाधारणो धर्मः अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाः पञ्च, नियम एकैकाश्रमनियतो धर्मं इत्यप्याहुः।[18]

ताभ्यामात्मसंस्कारः पापहीनादृष्टोनपादरूपः। योगो योगशास्त्रम्, प्रतिपाद्यत्वं पञ्चम्यर्थः। तथा च योगशास्त्रप्रतिपादितैरुपायभूतैरात्मविधिभिः[19] तपःप्रत्याहारप्राणायामध्यानधारणैकान्तावस्थानाहारनियमादिरूपैश्चात्मसंस्कार इत्यर्थः। आत्मानमधिकृत्य[20] ये विधयस्तत्प्रतिपादितोपायकरणको योगः प्राणायामादिलक्षणस्तस्माच्च[22] आत्मसंस्कार इति वाऽर्थः॥ ४५ ॥

उपायान्तरमाह—

[23]ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥ ४६ ॥

[24]तदर्थमिति प्रकृतम्। ज्ञायतेऽनेनेति ज्ञानं शास्त्रम्, तस्य ग्रहणमध्ययनादि, अभ्यास आवृत्तिरवधानेन[25]। अभ्यासः संस्कारविशेष इति वाऽर्थः। तद्विद्यैरध्यात्मविद्याभियुक्तैः सह संवादोऽध्यवसायार्थः ॥ ४६ ॥

[26]संवादमेव स्पष्टयति—

तं शिष्यगुरुसब्रह्मचारिशिष्टश्रेयोर्थिभि[27]रनसूयिभिरभ्युपेयात् ॥ ४७ ॥

तम् आत्मानम्। 'तं' शून्यमपि सूत्रमिच्छन्ति। सब्रह्मचारी सहाध्यायी [28]शिष्टः श्रेयोऽर्थी एभ्योऽन्ये भ्रान्ताः, [29]मुक्तप्रायोतस्य जन्मान्तरे-

17. cf. योगसूत्रम्, साधनपादः, सू ३१. 18. cf. योगसूत्रम्, साधनपादः, सू० ३०. 19. ०भूतैरवात्म० A. 20. आत्म नेमधिकृत्य C. 21. विवस्तत्० C. 22. ०लक्षणस्थस्मारः C. 23. ज्ञान om. C. 24. तदनुमिति C. 25. ०अध्ययनेन C 26. सत्वाद० A. 27. श्रेयोत्तभि० C. 28. शिष्टवयो C. 29. युक्तयन्नीतस्य C.

ऽध्ययनादिसत्त्वात्। एषामसूयित्वे एषां प्रतारणा उपेक्षा वा सम्भवतीत्यनसूयिभिरित्युक्तम्। अभ्युपेयात् अभिमुखमुपेत्य जानीयात् तत्रोदं [१ संवादं] कुर्यादिति वाऽर्थः ॥ ४७ ॥

ननु वादेऽपि स्थापनाकार्कश्येन[31] [31]गुर्वादीनां द्वेषः स्यात्, तथा च न तत्त्वमुपदिशेदित्यत आह—

प्रतिप्रक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४८ ॥

गुर्वादिभिस्तमभ्युपेयादिति वर्त्तते।[33] जिज्ञासायां सत्यां प्रयोजनसिद्धये[34] प्रतिपक्षहीनं यथा स्यात् तथा गुर्वादिभिस्तमभ्युपेयादित्यर्थः। प्रतिपक्षहीनमपि [35]एभिर्वादं कुर्यादिति वाऽर्थः। तथा विनयादि कर्त्तव्यं [C]यथा ते तत्त्वमुप[C]दिशन्तीति भावः ॥ ४८ ॥

॥ समाप्तं तत्त्वज्ञानविवृद्धिप्रकरणम् ॥

---

30. जातीयात् A. 31. ०कार्कस्येन C. 32. गर्वादीनां A. 33–34. जिज्ञायां सप्रतिप्रयोजनादिच्छाये C. 35. अभिवादं A. C—C—in C only. The corresponding portion in A has become smudged.

†अथ त्रयीबाह्यैरहंमानिभिः [1]प्रावादुकैरधिक्षिप्ते[2] [तत्त्वे] सर्वमिदं प्रागेव [3]विघटिष्यतीत्यफल एतावान् [4]प्रयासः स्यादतस्तत्परिपालन-[5]प्रकरणमारभते[6] । तत्र परिपालनप्रकारमाह—

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ४९ ॥

[7]तत्त्वाध्यवसायस्य संरक्षणं [8]भ्रमत्वशङ्कानिवृत्तिः ॥ ४९ ॥

ननु तत्त्वबुभुत्सोर्वाद एव काङ्क्षित इति कथं जल्पवितण्डयोस्तत्-परिपालनार्थत्वमत[9] आह—

ताभ्यां विगृह्य कथनम् ॥ ५० ॥

ताभ्यां जल्पवितण्डाभ्यां विजिगीषयैव कथा कर्त्तव्या, तेन यदायं [10]प्रावादुकस्तत्त्वमाक्षिपति तदा [11]सताऽसता वोत्तरेणाहङ्कारशातनम-वश्यकर्त्तव्यं[12] तत्त्वपालनायानेन, [13]अन्यथा लोका अयथार्थबुद्धयः [14]स्युस्तथा च तेषां तत्त्वाध्यवसायार्थं प्रवृत्तिर्न स्यादिति भावः ॥ ५० ॥

॥ समाप्तं तत्त्वज्ञानपरिपालनप्रकरणम् ॥

॥ द्वितीयमाह्निकञ्च ॥

॥ इति महामहोपाध्यायश्रीभट्टाचार्यचूडामणितनयश्रीभट्टाचार्य-सार्वभौम-रामभद्रविनिर्मिते न्यायरहस्ये चतुर्थोऽध्यायः[16] ॥ ० ॥

---

† Mss. D starts here. 1. प्राबाधकैः A, प्रावा बके C. 2. ०बाधक्षिप्तं A, ०बाधक्षिप्ते C, D. Reading determined in the light of GSP. 3. विघटीष्य० C. 4—5. प्रमाणस्यास्तदस्ततत्परि-शासन० C. 6. ०रम्यते C. 7. तद्ध्यवसाय० C. 8. भ्रमत्वसंज्ञा० C. 9. ०नात्मत्वमत D. 10. प्रावच्वेक A, प्रवेत्वेक० C, प्रारब्धक० D. 11—12. सताऽसतावोत्तरेणाहङ्कार ते नमस्य कर्तव्यम् A, सभासभावोत्तरे-णाऽङ्कारात् नमस्य कर्त्तव्यम् C, सक्तासतावोत्तरेणाह संस्करणत् समस्य कर्त्तव्यम् D. 13. अन्यथा लोकार्थ यथा० A, अन्यथा हलाका यथा० C. 14. सुस्तथा C. 15. ०वृत्तिर्वा A. 16. ओँ नमो भगवते वासुदेवाय ॥ शकाब्दाः १५४० ॥ तेरीख १८ फाल्गुन शुक्लाद्वादशीदिने ॥ श्रीगोपालाय नमः ॥ श्रीहरये नमः ॥ श्रीकामदेवदत्तेन लिखितं यथादृष्टमित्यादि ॥ श्रीरामः ॥ add. A. श्रीगणेशाय नमः add. D.

Prabal Kumar Sen (1946-) is Professor of Philosophy at the University of Calcutta. His main area of interest is Nyāya, Vaiśeṣika, Pūrva Mīmāṃsā, Buddhism and Vedānta. He has previously edited a number of hitherto unpublished texts of Nyāya Philosophy like *Ākhyāta-vādavyākhyā* and *Mokṣavāda* of Rāmabhadra Sārvabhauma, and he also has to his credit several research articles published in different journals, festschrifts and commemorative volumes.